॥ श्रीजिनाय नमः ॥

( सान्वयगूर्जरभाषांतरसहीतं च )

# ॥ श्रीवासुपूज्यचरित्रम् ॥ भाग सातमो ॥

( मूळकर्ता—वर्धमानसूरी )

अन्वय सहीत भाषांतर कर्ता तथा छपावी प्रसिद्ध करनार पंडित हीरालाल हंसराज.

आ ग्रंथना अन्वय तथा भाषांतरना प्रसिद्ध कर्ताए सर्व हक्क स्वाधिन राख्या छे.

सने १९२९. मूल्य रु. ७—०—० सं. १९८५.

Printed at Jain Bhaskaroday Printing Press—JAMNAGAR.

॥ श्रीजिनाय नमः ॥
( श्रीचारित्रविजयगुरुभ्यो नमः )
( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ अथ श्रीवासुपूज्यचरित्रं प्रारभ्यते ॥ ( भाग सातमो )

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय सहित गुजराती भाषांतरकर्ता पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

## ॥ चतुर्थः सर्गः ॥

**अथ प्रतस्थे पृथिवीं पावयन्स्वपदैः प्रभुः । अन्वीयमानो मुनिभिर्विनयः सद्गुणैरिव ॥ १ ॥**

अन्वयः– अथ सद्गुणैः विनयः इव, मुनिभिः अन्वीयमानः प्रभुः, पृथिवीं पावयन् प्रतस्थे. ॥ १ ॥

अर्थः–हवे सद्गुणो जेम विनयने अनुसरे छे, तेम मुनिओथी अनुसराता प्रभु, पोताना चरणोवडे पृथ्वीने पवित्र करता थका

( त्यांथी ) विचरवा लाग्या. ॥ १ ॥

जघन्यतोऽप्यभूत्कोटिः प्रभोः पार्श्वे सुपर्वणाम् । ऋतुवातेन्द्रियार्थाश्चानुकूलाः सर्वतोऽन्वहम् ॥ २ ॥
द्रुमाः कल्पद्रुमस्यास्य गच्छतो नतशीर्षकाः । अजायन्त जगद्भर्तुः शकुनाश्च प्रदक्षिणाः ॥३॥ युग्मम् ॥

अन्वयः-जघन्यतः अपि प्रभोः पार्श्वे सुपर्वणां कोटिः अभूत्, च अन्वहं सर्वतः ऋतु वात इंद्रिय अर्थाः अनुकूलाः, ॥ २ ॥ कल्पद्रुमस्य अस्य जगत् भर्तुः गच्छतः द्रुमाः नत शीर्षकाः, च प्रदक्षिणाः शकुनाः अजायंत. ॥ ३ ॥ युग्मं ॥

अर्थः-जघन्यथी पण प्रभुनी पासे एक क्रोड देवो (सेवामाटे) रहेता हता, तथा हमेशां सर्व जगोए ऋतुओ, वायु, तथा इंद्रियोना विषयो पण अनुकूल थता हता, ॥ २ ॥ वळी कल्पवृक्ष सरखा आ प्रभुना विहारसमये वृक्षो पोतानां मस्तको नमावतां हतां, अने उत्तम (जमणां) शकुनो थतां हतां. ॥ ३ ॥ युग्मं ॥

स्वदुर्मुखत्वं जानन्तो लज्जिता इव कण्टकाः । अधोमुखत्वमभजन्पथि प्रचलतः प्रभोः ॥ ४ ॥

अन्वयः—पथि प्रचलतः प्रभोः स्वदुर्मुखत्वं जानंतः कंटकाः लज्जिताः इवः अधोमुखत्वं अभजन्. ॥ ४ ॥

अर्थः-मार्गे चालता प्रभुनी पासे पोतानुं दुर्मुखपणुं जाणता कांटाओ जाणे शरमाइ गया होय नही! तेम नीचुं मुख करी जता हता.

यत्रेशोऽगान्न तत्रातिवृष्ट्यवृष्टिरुजः क्वचित् । मारिवैरेतिदुर्भिक्षस्वान्यचक्रभयान्यपि ॥ ५ ॥

अन्वयः—यत्र ईशः अगात्, तत्र कचित् अतिवृष्टि अवृष्टि रुजः मारि वैर ईति दुर्भिक्ष स्व अन्य चक्र भयानि अपि न. ॥५॥
अर्थः–ज्यां आ प्रभु जता हता, त्यां कोइ पण जगोए अतिवृष्टि अवृष्टि, रोगो, मरकी, वैर, ईति, दुष्काळ, अने स्वसैन्यनो के परसैन्यनो भय पण नहोतां थतां. ॥ ५ ॥

**अप्रवृद्धनखश्मश्रुकेशो देशेषु संचरन् । स्याद्वादी द्वारिकापुर्याः पर्यन्तोर्वी क्रमादगात् ॥ ६ ॥**

अन्वयः—अप्रवृद्ध नख श्मश्रु केशः, स्याद्वादी, देशेषु संचरन् क्रमात् द्वारिका पुर्याः पर्यंत उर्वी अगात्. ॥ ६ ॥
अर्थः—जेमना नखो तथा दाढी मूछना केशो वृद्धि पामता नथी, एवा, तथा स्याद्वादनो उपदेश देनारा ते प्रभु देशोमां विहार करताथका अनुक्रमे द्वारिकानगरीनी नजीकनी भूमिमां गया. ॥ ६ ॥

**अस्यां सुरौघैः समवसरणे विहिते क्षणात् । तत्र प्राग्वत्प्रविश्यालंचक्रे सिंहासनं जिनः ॥ ७ ॥**

अन्वयः—अस्यां सुर ओघैः क्षणात् समवसरणे विहिते जिनः प्राग्वत् तत्र प्रविश्य सिंहासनं अलंचक्रे. ॥ ७ ॥
अर्थः–ते भूमिपर देवोना समूहोए क्षणवारमां समवसरण रच्याबाद प्रभु पूर्वनी पेठे तेमां प्रवेश करीने सिंहासनने शोभाववा लाग्या.

**राजमान्या द्विपृष्ठस्य तन्नरा द्वारिकापतेः । तदा समवसृत्याद्यं मनःस्वाद्यं न्यवेदयन् ॥ ८ ॥**

अन्वयः—तदा राज मान्याः तन्नराः द्वारिका पतेः द्विपृष्ठस्य मनः स्वाद्यं समवसृति आद्यं न्यवेदयन्. ॥ ८ ॥
अर्थः–ते वखते राजाना विश्वास पात्र ते भूमिना चोकीदार मनुष्योए ते द्वारिकानगरीना राजा द्विपृष्ठवासुदेवने मनमां आनंद

उपजावनारुं प्रभुना समवसरण आदिकनुं ( वृत्तांत ) निवेदन कर्युं. ॥ ८ ॥

**सार्धा द्वादश रूप्यस्य कोटीस्तेभ्यो ददौ मुदा । प्रभोः समवसृत्यां च नृपः सविजयो ययौ ॥ ९ ॥**

अन्वयः–नृपः तेभ्यः मुदा रूप्यस्य सार्धा द्वादश कोटीः ददौ, च सविजयः प्रभोः समवसृत्यां ययौ. ॥ ९ ॥

अर्थः–( त्यारे ) ते राजाए तेओने हर्षथी साडाबार क्रोड रूपामोहोरो आपी, अने विजयनामना ( पोताना म्होटा भाइ बलदेव साथे ) ते प्रभुना समवसरणमां गयो. ॥ ९ ॥

**प्रभुं प्रदक्षिणीकृत्य कृतीन्दुः प्रणिपत्य च । द्विपृष्ठो बन्धुना सार्धमाऽऽसामासाऽनुवासवम् ॥ १० ॥**

अन्वयः–कृति इंदुः द्विपृष्ठः प्रभुं प्रदक्षिणीकृत्य च प्रणिपत्य बंधुना सार्धं अनुवासवं आसामास. ॥ १० ॥

अर्थः–कृतज्ञोमां चंद्र सरखो ते द्विपृष्ठ वासुदेव प्रभुने प्रदक्षिणा देइने, तथा वांदीने बंधुसहित इंद्रनी पाछळ बेठो. ॥ १० ॥

**अथ विश्वत्रयीनाथो विश्वभाषानुगामिनीम् । विश्वलोकप्रबोधार्थं विदधे धर्मदेशनाम् ॥ ११ ॥**

अन्वयः–अथ विश्व त्रयी नाथः विश्व लोक प्रबोध अर्थं विश्व भाषा अनु गामिनीं धर्म देशनां विदधे. ॥ ११ ॥

अर्थः–पछी त्रणे जगतना स्वामी एवा ते प्रभुए जगतना सर्व लोकोने प्रतिबोधवा माटे सघळी भाषाओनुं अनुकरण करनारी धर्मदेशना आपवा मांडी. ॥ ११ ॥

भवा जन्तोरनन्ताः स्युर्नृभवः शस्यते परम् । यदर्ज्यन्तेऽमुना स्वर्गापवर्गाद्याः सुखश्रियः ॥ १२ ॥

अन्वयः—जंतोः अनंताः भवाः स्युः, परं नृभवः शस्यते, यत् अमुना स्वर्ग अपवर्ग आद्याः सुख श्रियः अर्ज्यंते. ॥ १२ ॥

अर्थः—प्राणीने अनंता भवो थाय छे, परंतु तेमां मनुष्यभव प्रशंसाने पात्र छे, केमके तेथी स्वर्ग तथा मोक्ष आदिकनां सुखोनी लक्ष्मी उपार्जन कराय छे. ॥ १२ ॥

एषोऽपि पुरुषार्थानां कर्तृत्वेन विदां मुदे । तान्विना तेन किं जन्मसंख्यापूरणहेतुना ॥ १३ ॥

अन्वयः—एषः अपि विदां पुरुषार्थानां कर्तृत्वेन मुदे, तान् बिना जन्म संख्या पूरण हेतुना तेन किं ? ॥ १३ ॥

अर्थः—ते मनुष्य भव पण विद्वानोने पुरुषार्थ साधवाथी हर्षदायक थाय छे, केमके ते पुरुषार्थविना फक्त जन्मोनी संख्या पूरी करवाने, कारणभूत थयेला, एवा ते मनुष्य भवथी पण शुं लाभ थवानो छे.? ॥ १३ ॥

स श्लाघ्यः पुरुषो यस्मिन्पुरुषार्थाः स्फुरन्त्यलम् । सरस्तदेव सेव्यं हि यत्रापः प्रापुरास्पदम् ॥ १४ ॥

अन्वयः—यस्मिन् पुरुषार्थाः अलं स्फुरंति, सः पुरुषः श्लाघ्यः, हि तत् एव सरः सेव्यं, यत्र आपः आस्पदं आपुः. ॥ १४ ॥

अर्थः—जे पुरुषमां पुरुषार्थो सारीरीते स्फुरायमान थायछे, ते पुरुषज प्रशंसाने पात्र छे, केमके तेज तळाव सेववालायक थाय छे, के जेमां जल भराइने स्थिर रहे छे. ॥ १४ ॥

**धर्मार्थकाममोक्षाख्याश्चत्वारस्ते जने श्रुताः। किंत्वर्थकाममोक्षाणां धर्म एव निबन्धनम् ॥ १५ ॥**

अन्वयः–धर्म अर्थ काम मोक्ष आख्याः ते चत्वारः जने श्रुताः, किंतु अर्थ काम मोक्षाणां निबंधनं धर्मः एव. ॥ १५ ॥

अर्थः—धर्म, अर्थ, काम, अने मोक्षनामथी ते चारे पुरुषार्थो लोकोमां प्रसिद्ध छे. परंतु अर्थ, काम अने मोक्षनुं कारण तो धर्मज छे. ॥ १५ ॥

**तस्माद्विश्वार्थवृक्षाणां धर्मो बीजमिति ध्रुवम्। मन्वानैरमलज्ञानैर्जनैः सेव्योऽयमन्वहम् ॥ १६ ॥**

अन्वयः–तस्मात् विश्व अर्थ वृक्षाणां बीजं ध्रुवं धर्मः, इति मन्वानैः अमल ज्ञानैः जनैः अयं अन्वहं सेव्यः. ॥ १६ ॥

अर्थः–माटे सर्व पदार्थोरूपी वृक्षोनुं बीज खरेखर धर्मज छे, एम माननारा निर्मल ज्ञानवाळा मनुष्योए ते धर्मने हमेशां सेववो.

**एतस्य वृद्धये शुद्धबुद्धिभिर्गृहमेधिभिः। विज्ञाय सेवनीयानि व्रतानि द्वादशान्यपि ॥ १७ ॥**

अन्वयः–एतस्य वृद्धये शुद्धबुद्धिभिः गृह मेधिभिः, द्वादशानि व्रतानि अपि विज्ञाय सेवनीयानि. ॥ १७ ॥

अर्थः—ते धर्मनी वृद्धिमाटे शुद्ध बुद्धिवाळा गृहस्थोए बारे व्रतोने समजीने सेववां जोइए. ॥ १७ ॥

**तत्राहिंसा च सत्यं चास्तेयब्रह्मापरिग्रहाः। यतेर्महाव्रतानि स्युः पञ्चैतानि तु सर्वतः ॥ १८ ॥**

अन्वयः–तत्र अहिंसा, च सत्यं, च अस्तेय ब्रह्म अपरिग्रहाः, एतानि पंच महाव्रतानि यतेः तु सर्वतः. ॥ १८ ॥

अर्थः—तेमां अहिंसा, सत्य, अचौर्य, ब्रह्मचर्य अने परिग्रहनो त्याग, ए पांच महाव्रतो मुनिने तो सर्वथी होय छे. ॥ १८ ॥

**देशतोऽमूनि पञ्चाणुव्रतानि गृहशालिनाम् । दिग्भोगानर्थदण्डाख्यं त्रिधा ज्ञेयं गुणव्रतम् ॥ १९ ॥**

अन्वयः—गृह शालिनां अमूनि पंच अणुव्रतानि देशतः, दिग् भोग अनर्थ दंड आख्यं त्रिधा गुणव्रतं ज्ञेयं. ॥ १९ ॥

अर्थः–( वळी ) गृहस्थीओने ते पांचे अणुव्रतो देशथी होय छे, तेमज तेओने दिगवकाश, भोगोपभोग, अने अनर्थदंड नामनां त्रण प्रकारनां गुणव्रतो पण जाणवां. ॥ १९ ॥

**सामायिकं च देशावकाशः पोषधसेवनम् । संविभागोऽतिथेश्चत्वार्येवं शिक्षाव्रतान्यपि ॥ २० ॥**

अन्वयः–सामायिकं, च देश अवकाशः, पोषध सेवनं,अतिथेः संविभागः, एवं चत्वारि शिक्षाव्रतानि अपि. ॥ २० ॥

अर्थः–( वळी ) सामायिक, तथा देशावकाश, पौषधनुं सेववुं, तथा अतिथिनो संविभाग, एम चार प्रकारनां शिक्षाव्रतो पण तेओने माटे होय छे. ॥ २० ॥

**द्वादशानां व्रतानां तु सम्यक्त्वं जीवितं परम् । यथा गुणानामौदार्यं तपसां वा क्षमोच्चयः ॥ २१ ॥**

अन्वयः—तु द्वादशानां व्रतानां परं जीवितं सम्यक्त्वं यथा गुणानां औदार्यं, वा तपसां क्षमा उच्चयः. ॥ २१ ॥

अर्थः–परंतु ते बारे व्रतोना उत्कृष्ट जीवनरूप सम्यक्त्व छे, जेमके गुणोनुं जीवन उदारता, अथवा तपनुं जीवन क्षमानो समूह छे. ॥ २१ ॥

सर्वज्ञे सद्गुरौ धर्मे या श्रद्धा हृदि निश्चला । सम्यक्त्वमिति तत्त्वज्ञैर्विज्ञेयं हितमात्मनः ॥ २२ ॥

अन्वयः-सर्वज्ञे, सद्गुरौ, धर्मे या हृदि निश्चला श्रद्धा, इति सम्यक्त्वं तत्त्वज्ञैः आत्मनः हितं विज्ञेयं. ॥ २२ ॥

अर्थः-सर्वज्ञ प्रभुमां, सद्गुरुमां अने धर्ममां अंतःकरणपूर्वक जे निश्चल श्रद्धा ते सम्यक्त्व कहेवाय, अने ते सम्यक्त्वने तत्वज्ञोए आत्मानुं हित करनारुं जाणवुं. ॥ २२ ॥

अस्य प्रभावाज्जायन्ते देवाः सेवाभृतो नृणाम् । विस्तारिण्यः श्रियः सर्वा यथा विक्रमभूपतेः ॥ २३ ॥

अन्वयः-अस्य प्रभावात् यथा विक्रम भूपतेः, नृणां देवाः सेवा भृतः, विस्तारिण्यः सर्वाः श्रियः जायंते. ॥ २३ ॥

अर्थः—ते सम्यक्त्वना प्रभावथी विक्रम राजानीपेठे माणसोने देवो पण सेवा करनारा थाय छे, तथा सघळी विस्तीर्ण लक्ष्मी पण प्राप्त थाय छे, ॥ २३ ॥

तथाहि—जम्बूद्वीपेऽस्ति कुसुमपुरं कुसुमसंनिभम् । यत्र स्वर्णमयावासभासः केसरतां दधुः ॥ २४ ॥

अन्वयः-तथाहि-जंबू द्वीपे कुसुम सन्निभं कुसुमपुरं अस्ति, यत्र स्वर्णमय आवास भासः केसरतां दधुः. ॥ २४ ॥

अर्थः-ते विक्रमराजानुं दृष्टांत कहे छे, जंबूद्वीपमां पुष्पसरखुं कुसुमपुर नामनुं नगर छे, के जेमां (रहेला) सुवर्णना मेहेलोनी कांति (ते पुष्पना) केसरतंतुपणाने धारण करे छे. ॥ २४ ॥

**राजास्मिन्हरितिलको भूवधूतिलकोऽजनि । नाम्ना गौरीति कान्तास्य गौरी कान्तगुणैरभूत् ॥ २५ ॥**

अन्वयः—अस्मिन् भू वधू तिलकः हरितिलकः राजा अजनि, अस्य कांत गुणैः गौरी गौरी इति नाम्ना कांता अभूत्. ॥२५॥
अर्थः—ते नगरमां पृथ्वीरूपी स्त्रीना तिलकसरखो हरितिलकनामे राजा हतो, तेने मनोहर गुणोथी शोभती गौरीनामनी राणी हती.

**उपयाचितलक्षाभिर्दक्षलक्ष्यसुलक्षणः । तयोरपुत्रतादोषच्छेदनो नन्दनोऽभवत् ॥ २६ ॥**

अन्वयः—उपयाचित लक्षाभिः तयोः दक्ष लक्ष्य सुलक्षणः, अपुत्रता दोष च्छेदनः नंदनः अभवत्. ॥ २६ ॥
अर्थः—लाखो गमे मानताओवडे तेओने, चतुर माणसोने देखातां उत्तम लक्षणोवाळो, तथा अपुत्रपणाना दोषने दूर करनारो पुत्र थयो. ॥ २६ ॥

**अस्मिन्गर्भस्थिते राज्ञा जिता विक्रमतोऽरयः । अतो विक्रम इत्याख्यामस्याम्बाकारयन्महैः ॥ २७ ॥**

अन्वयः—अस्मिन् गर्भ स्थिते राज्ञा विक्रमतः अरयः जिताः, अतः अंबा महैः अस्य विक्रमः इति आख्यां अकारयत्. ॥२७॥
अर्थः–ते पुत्र गर्भमां आव्येथी राजाए (पोताना) विक्रमथी शत्रुओने जीत्या, तेथी माताए महोत्सवपूर्वक तेनुं ‘विक्रम’ नाम पाड्युं.

**समये विनयी सोऽयमुपाध्यायवशंवदः । अधीती सर्वशास्त्रेषु निष्णः कृत्स्नकलास्वभूत् ॥ २८ ॥**

अन्वयः—समये विनयी, उपाध्याय वशंवदः सः अयं सर्व शास्त्रेषु अधीती, कृत्स्न कलासु निष्णः अभूत्. ॥ २८ ॥

अर्थः—समय आवे विनयी अने अध्यापकना कहेवा प्रमाणे वर्तनारो ते आ विक्रमकुमार सर्व शास्त्रोनो अभ्यासी तथा सर्व कलाओमां निपुण थयो. ॥ २८ ॥

**कामेभक्रीडनारण्ये तारुण्ये यातुमुद्यतम् । द्वात्रिंशन्नृपकन्याभिर्नृपस्तं पर्यणाययत् ॥ २९ ॥**

अन्वयः—काम इभ क्रीडन अरण्ये तारुण्ये यातुं उद्यतं तं, नृपः द्वात्रिंशत् कन्याभिः पर्यणाययत्. ॥ २९ ॥

अर्थः—कामदेवरूपी हाथीने क्रीडा करवाना वनसरखा यौवनने प्राप्त थवाने तैयार थयेला एवा ते कुमारने राजाए बत्रीस कन्याओसाथे परणाव्यो. ॥ २९ ॥

**यावद्दिव्येष्वसौ ताभिर्द्वात्रिंशद्वासवेश्मसु । रन्तुं प्रववृते तावदकस्माद्व्याधिभिर्वृतः ॥ ३० ॥**

अन्वयः—यावत् असौ दिव्येषु द्वात्रिंशत् वासवेश्मसु ताभिः रंतुं प्रववृते, तावत् अकस्मात् व्याधिभिः वृतः ॥ ३० ॥

अर्थः—पछी जेवामां ते मनोहर बत्रीस आवासोमां रहीने तेओनी साथे विलासमां जोडायो, एवामां अचानक ते रोगोवडे घेराइ गयो.

**कुष्टकासज्वरश्वासशोफशूलजलोदरैः । शिरोऽर्तिगडुदृक्पीडावान्तिवातैश्च सोऽर्दितः ॥ ३१ ॥**

अन्वयः—कुष्ट कास ज्वर श्वास शोफ शूल जलोदरैः, च शिरः अर्ति गडु दृक् पीडा वांति वातैः सः अर्दितः ॥ ३१ ॥

अर्थः—कोढ, खांसी, ताव, श्वास, सोजा, शूल, जलोदर, तथा मस्तकनो दुःखावो, गड, आंखोनी व्याधि, उलटी अने वायुवडे ते पीडावा लाग्यो. ॥ ३१ ॥

उपयाचितबस्त्यादिकर्ममन्त्रौषधक्रियाः । सर्वं व्यर्थमभूदस्मिन्हितं वाक्यं जडे यथा ॥ ३२ ॥

अन्वयः—यथा जडे हितं वाक्यं, (तथा) अस्मिन् उपयाचित बस्ति आदि कर्म मंत्र औषध क्रियाः, सर्वं व्यर्थं अभूत्. ॥३२॥

अर्थः–जेम मूर्खने कहेलुं हितवचन निष्फल जाय, तेम तेनेमाटे करेली मानताओ, जुलाबआदिकनी क्रिया, मंत्र तथा औषधोनी क्रिया, ए सघलुं निष्फल थयुं. ॥ ३२ ॥

शीर्णनासौष्ठहस्तांघ्रिरत्यर्थं व्यथितोऽर्तिभिः । अनल्पं तल्पगः कष्टं रारटीति स्म सोऽनिशम् ॥ ३३ ॥

अन्वयः–शीर्णनासा ओष्ठ हस्त अंघ्रिः सः अर्तिभिः अत्यर्थं व्यथितः तल्पगः अनिशं कष्टं रारटीतिस्म. ॥ ३३ ॥

अर्थः–सडी गयां छे नासिका, होठ, हाथ तथा पगो जेना एवो ते व्याधिथी अत्यंत पीडायोथको हमेशां कष्टपूर्वक बूमो मारी रडवा लाग्यो. ॥ ३३ ॥

ततः पुरबहिःस्थस्य प्रसिद्धस्यार्तिशान्तये । धनंजयस्य यक्षस्य स मेने महिषाञ्शतम् ॥ ३४ ॥

अन्वयः–ततः सः अर्तिं शांतये पुर बहिः स्थस्य धनंजयस्य यक्षस्य शतं महिषान् मेने. ॥ ३४ ॥

अर्थः–पछी तेणे ते पीडानी शांतिमाटे नगरनी बहार रहेला धनंजयनामना यक्षने एकसो पाडा चडाववानी मानता करी. ।३४।

तदा विमलकीर्त्याख्यः केवली केलिकानने । दुःकर्मतिमिरत्रासवासरः समवासरत् ॥ ३५ ॥

अन्वयः—तदा केलि कानने दुःकर्म तिमिर त्रास वासरः विमलकीर्ति आख्यः केवली समवासरत्. ॥ ३५ ॥

अर्थः—ते वखते क्रीडावननी अंदर दुष्कर्मरूपी अंधकारनो नाश करवामां सूर्यसरखा विमलकीर्तिनामना केवली भगवान् (आवीने) समोसर्या. ॥ ३५ ॥

**ततः केवलिनं नन्तुं भूभर्ता भूरिभक्तिभाक् । चचालानन्दसंदर्भोज्जागरैर्नागरैर्वृतः ॥ ३६ ॥**

अन्वयः— ततः भूरि भक्तिभाक्, आनंद संदर्भ उज्जागरैः नागरैः वृतः भूभर्ता केवलिनं नंतुं चचाल. ॥ ३६ ॥

अर्थः—पछी घणी भक्तिवाळो, तथा आनंदना उभराथी उत्सुक थयेला नगर जनोथी वींटायेलो ते हरितिलकराजा ते केवली भगवानने वांदवामाटे चाल्यो. ॥ ३६ ॥

**तद्विज्ञाय तदा विज्ञो विक्रमोऽपि व्यचिन्तयत् । लाभैर्लोभा इव रुजो हा वर्धन्ते ममौषधैः ॥ ३७ ॥**

अन्वयः—तत् विज्ञाय तदा विज्ञः विक्रमः अपि व्यचिंतयत्, हा ! लाभैः लोभाः इव मम रुजः ओषधैः वर्धंते. ॥ ३७ ॥

अर्थः—ते जाणीने ते वखते ते चतुर विक्रम कुमार पण विचारवा लाग्यो के, अरेरे ! लाभथी लोभनी पेठे मारा रोगो तो औषधोथी ( उलटा ) वृद्धि पामे छे. ॥ ३७ ॥

**मुद्रामण्डलमन्त्रैस्तैरौषधैरुपयाचितैः । भग्नं मद्व्याधिपूदग्रैर्दन्तिदन्तैरिवाद्रिषु ॥ ३८ ॥**

अन्वयः—अद्रिषु उदग्रैः दंति दंतैः इव, मद् व्याधिषु तैः मुद्रा मंडल मंत्रैः, औषधैः उपयाचितैः भग्नं. ॥ ३८ ॥

अर्थः—पर्वतोमते हाथीना मजबूत दांतोनीपेठे, मारी आ व्याधिओ पासे ते मुद्राओ, मंडलो, मंत्रो, औषधो तथा मानताओ पण थाकी गयां. ॥ ३८ ॥

**तन्मे दर्पादमी रोगसर्पाः सर्पन्ति यद्बलात् । तत्तमः शमयाम्यद्य ज्ञानभानुं भजे मुनिम् ॥ ३९ ॥**

अन्वयः—तत् मे अमी रोग सर्पाः यत् बलात् दर्पात् सर्पंति, तत् तमः अद्य शमयामि, ज्ञान भानुं मुनिं भजे. ॥ ३९ ॥

अर्थः—माटे मारा आ रोगोरूपी सर्पो जेना बलथी पोतानुं जोर तजे ते अज्ञानरूपी अंधकारने हुं उपशमावुं, अने ते माटे ज्ञानथी सूर्यसरखा एवा, आ मुनिराजनी हुं सेवा करूं. ॥ ३९ ॥

**अथ व्यजिज्ञपद् भूपमसावुद्यमसाहसी । शमराशिं नमस्कर्तुं समं नयत मामिति ॥ ४० ॥**

अन्वयः—अथ उद्यम साहसी असौ भूपं इति व्यजिज्ञपत्, शम राशिं नमस्कर्तुं मां समं नयत? ॥ ४० ॥

अर्थः—पछी उद्यम करवामां साहसिक एवा ते विक्रम कुमारे राजाने एवी विनंति करी के, शांतिना समूह सरखा ( ते केवली भगवानने ) वांदवामाटे मने साथे लेइ जाओ ? ॥ ४० ॥

**मुक्तालिखचितश्मश्रु मुखमश्रुकणैः सृजन् । नृपोऽथ नृविमानेन समं तमनयत्सुखम् ॥ ४१ ॥**

अन्वयः—अथ नृपः अश्रु कणैः मुक्ता आलि खचित श्मश्रु मुखं सृजन्, तं नृ विमानेन सुखं समं अनयत्. ॥ ४१ ॥

अर्थः—पछी ते राजा आंसुओना बिंदुओथी (जाणे) मोतीओनी श्रेणिथी भरेलां दाढी मूछवाळां (पोतानां) मुखने रचतोथको ते

विक्रमकुमारने पालखीमां बेसाडीने मुखेथी साथे लेइ गयो. ॥ ४१ ॥

**स्वर्णाब्जविष्टरक्रोडनिविष्टं कलभाषिणम् । नृपः समं कुमारेण मुनिहंसं ननाम तम् ॥ ४२ ॥**

अन्वयः–स्वर्ण अब्ज विष्टर क्रोड निविष्टं, कल भाषिणं तं मुनि हंसं नृपः कुमारेण समं ननाम. ॥ ४२ ॥

अर्थः—सुवर्णना कमलपर रहेलां सिंहासनना मध्य भागमां बिराजेला, तथा मधुर वचन बोलता, एवा मुनिराजरूपी हंसने राजाए कुमारसहित वंदन कर्युं. ॥ ४२ ॥

**ततो मुनिर्मनुष्याणां हरन्पापमिषं विषम् । वाचा सुधाद्रवाचारधारिण्या धर्ममादिशत् ॥ ४३ ॥**

अन्वयः–ततः मनुष्याणां पाप मिषं विषं, सुधा द्रव आचार धारिण्या वाचा हरन् मुनिः धर्मं आदिशत्. ॥ ४३ ॥

अर्थः–पछी मनुष्योनां पापरूपी विषने, अमृतरसना प्रवाहसरखी वाणीथी हरताथका ते मुनिमहाराज धर्मदेशना आपवा लाग्या. ४३

**पप्रच्छ देशनान्तेऽथ विक्रमोक्त्या मुनिं नृपः । किं कुमारोऽयमारोग्यमारोहति न सर्वथा ॥ ४४ ॥**

अन्वयः–अथ देशना अंते नृपः विक्रम उक्त्या मुनिं पप्रच्छ, अयं कुमारः सर्वथा आरोग्यं किं न आरोहति ? ॥ ४४ ॥

अर्थः—पछी देशना पूरी थयाबाद राजाए ते विक्रम कुमारना कहेवाथी मुनिराजने पूछयुं के, ( हे भगवन्! ) आ ( मारो ) कुमार सर्वथा प्रकारे निरोगी केम थतो नथी ? ॥ ४४ ॥

व्यक्तदृश्यस्फुरद्धर्म इवास्ये दशनांशुभिः । ऊचेऽथ केवली ज्ञानकवलीकृतसंशयः ॥ ४५ ॥

अन्वयः-अथ दशन अंशुभिः आस्ये व्यक्त दृश्य स्फुरत् धर्मः इव, ज्ञान कवलीकृत संशयः केवली ऊचे. ॥ ४५ ॥

अर्थः—त्यारे दांतोना किरणोवडे मुखमां प्रगट देखाता स्फुरायमान जाणे साक्षात् धर्मज होय नही एवा, तथा ज्ञानवडे नष्ट करेल छे संदेह जेमणे, एवा ते केवली भगवान् बोल्या के, ॥ ४५ ॥

पुरेऽपरविदेहोर्वीरत्ने रत्नस्थलाभिधे । पद्माख्यश्छद्मनां सद्म कुराजन्यः पुराजनि ॥ ४६ ॥

अन्वयः-पुरा अपर विदेह उर्वी रत्ने रत्न स्थल अभिधे पुरे छद्मनां सद्म पद्म आख्यः कुराजन्यः अजनि. ॥ ४६ ॥

अर्थः—पूर्वे अपर विदेहनी भूमिपर रत्नसरखा रत्नस्थल नामना नगरमां कपटना स्थानसरखो पद्मनामे (एक) दुष्ट राजा हतो.

स मृगव्यरसव्यग्रो भूतलं वन्यमन्यदा । ययौ सुयशसं साधुं कयोत्सर्गे ददर्श च ॥ ४७ ॥

अन्वयः—मृगव्य रस व्यग्रः सः अन्यदा वन्यं भूतलं ययौ, च कायोत्सर्गे सुयशसं साधुं ददर्श. ॥ ४७ ॥

अर्थः—शिकारना रसमां आसक्त थयेलो ते राजा एक दिवसे वनभूमिमां गयो, अने (त्यां) तेणे कायोत्सर्गध्यानमां रहेला सुयशनामना मुनिने जोया. ॥ ४७ ॥

स धर्मज्ञानयोर्वैरी धर्मज्ञानसमाश्रये । साधोरुरसि निःशङ्कः कङ्कपत्रं निखातवान् ॥ ४८ ॥

अन्वयः-धर्म ज्ञानयोः वैरी सः, धर्म ज्ञान समाश्रये साधोः उरसि निःशंकः कंकपत्रं निखातवान्. ॥ ४८ ॥

अर्थः—धर्म अने ज्ञानना शत्रु एवा ते पद्मराजाए, धर्म अने ज्ञानना स्थान सरखां ते साधुना हृदयमां निःशंकपणे छरी भोंकी दीधी. ४८

**मिथ्यादुःकृतवाक्साधुः स्वव्यलीकविशङ्कया । पपात घातव्यग्राऽथ धर्माधारतरुर्धराम् ॥ ४९ ॥**

अन्वयः— अथ स्व व्यलीक विशंकया मिथ्या दुःकृत वाक्, धर्म आधार तरुः साधुः घात व्यग्रः धरां पपात. ॥ ४९ ॥

अर्थः—त्यारे मारी पोतानी कंइक भूल थइ छे, एवी शंकाथी "मिथ्या दुष्कृत" बोलता, अने धर्मना आधारभूत वृक्षसरखा, ते साधु ते छरीना घाथी बेभान थइने पृथ्वीपर पडी गया. ॥ ४९ ॥

**जनं धिगिति जल्पन्तं निघ्नन्भूपोऽथ मन्त्रिभिः । पापश्रीकौतुकशुकः कृतः क्षिप्त्वाशु पञ्जरे ॥ ५० ॥**

अन्वयः—अथ धिक् इति जल्पंतं जनं निघ्नन् भूपः मंत्रिभिः आशु पंजरे क्षिप्त्वा पाप श्री कौतुक शुकः कृतः. ॥ ५० ॥

अर्थः—पछी ( आ दुष्कार्यथी ) तेने धिक्कार आपता लोकोने मारता एवा आ राजाने मंत्रिओए तुरत पांजरामां पूरीने पापलक्ष्मीने क्रीडा करवाना शुकसरखो बनावी दीधो. ॥ ५० ॥

**न्यस्य तस्य सुतं राज्ये पुण्डरीकं स भूपतिः । सचिवैः पञ्जराद्युक्तममोचि निरयोचितः ॥ ५१ ॥**

अन्वयः—तस्य सुतं पुंडरीकं राज्ये न्यस्य, निरय उचितः सः भूपतिः सचिवैः पंजरात् युक्तं अमोचि. ॥ ५१ ॥

अर्थः—पछी तेना पुंडरीकनामना पुत्रने राज्यपर स्थापन करीने, नरकमां जवाने योग्य एवा ते राजाने मंत्रीओए युक्तिपूर्वक पांजरामांथी छुटो कर्यो. ॥ ५१ ॥

सुयशा मुनिराजस्तु स्मरन्पञ्चनमस्कृतीः । षड्जीववर्गान्क्षमयन्सुरोऽभूल्लवसत्तमः ॥ ५२ ॥

अन्वयः—सुयशाः मुनिराजः तु पंच नमस्कृतीः स्मरन् षड् जीव वर्गान् क्षमयन् लव सत्तमः सुरः अभूत्. ॥ ५२ ॥

अर्थः—हवे ते सुयश मुनिराज तो पंच परमेष्टिना नमस्कारोनुं स्मरण करताथका, तथा छकायना जीवोने खमावताथका देव थया.

स तु राजा वहन्वैरं साधुवर्गे निरर्गलम् । न जनैर्निन्द्यमानोऽपि तत्पुरोद्यानमत्यजत् ॥ ५३ ॥

अन्वयः-सः राजा तु साधु वर्गे निरर्गलं वैरं वहन्, जनैः निंद्यमानः अपि तत् पुर उद्यानं न अत्यजत्. ॥ ५३ ॥

अर्थः—ते दुष्ट राजाए तो साधुओना समुदायपर अत्यंत वैर धारण करतां थकां, अने लोकोवडे निंदातां छतां पण, ते नगरना वननो त्याग कर्यो नही. ॥ ५३ ॥

ध्यानाधीनो यशोधौतव्योमा सोमाभिधो मुनिः । तेनोर्व्यां दण्डपातेनापाति स्वात्मेव दुर्गतौ ॥ ५४ ॥

अन्वयः-ध्यान अधीनः, यशः धौत व्योमा, सोम अभिधः मुनिः, तेन स्व आत्मा दुर्गतौ इव, दंड पातेन उर्व्यां अपाति.।५४।

अर्थः—( पछी एक दिवसे ) ध्यानने आधीन थयेला, तथा ( पोताना ) यशथी आकाशने पण निर्मल करनारा, एवा सोमनामना मुनिने, ते (दुष्ट) राजाए, जाणे पोताना आत्माने दुर्गतिमां पाडतो होय नही! तेम दंडना घातथी पृथ्वीपर पाडी नाख्या.

क्ष्माजन्तून्क्षमयित्वाङ्गं संमार्ज्य प्रतिमास्थितः । मुनिस्तथैव घातेनापाति पातकिनामुना ॥ ५५ ॥

अन्वयः—क्ष्माजंतून् क्षमयित्वा, अंगं प्रमार्ज्य, तथैव प्रतिमा स्थितः मुनिः अमुना पातकिना घातेन अपाति. ॥ ५५ ॥

अर्थः—( पछी ) पृथ्वीकायना जीवोने खमावीने, तथा शरीर प्रमार्जीने पाछा पूर्वनीपेठेज कायोत्सर्ग ध्यानमां उभेला ते मुनिने ते पापी राजाए ( पाछो ) प्रहार करीने पाडी नाख्या. ॥ ५५ ॥

**इत्येष पौनःपुन्येन कुर्वन्पुण्येन साधुना । अवधिज्ञानविज्ञाततद्भावेनेति भर्त्सितः ॥ ५६ ॥**

अन्वयः—इति पौनःपुन्येन कुर्वन् एषः, अवधि ज्ञान विज्ञात तद्भावेन पुण्येन साधुना इति भर्त्सितः. ॥ ५६ ॥

अर्थः—ए रीते वारंवार करता एवा ते राजाने, अवधिज्ञानथी जाणेलो छे तेना मननो भाव जेणे, एवा ते पवित्र साधुए नीचे मुजब तिरस्कार आप्यो. ॥ ५६ ॥

**निघ्नन्साधूञ्शमागाधान्रे रे दुष्ट स्वतुष्टये । न चेद्भीतोऽस्यघात्तत्किं मादृग्भ्योऽपि बिभेषि न ॥ ५७ ॥**

अन्वयः—रे ! रे ! दुष्ट ! स्व तुष्टये शम अगाधान् साधून् निघ्नन्. चेत् अघात् न भीतः असि, मादृग्भ्यः अपि किं न बिभेषि?

अर्थः—अरेरे ! दुष्ट ! पोतानी मोज माटे, शांतिथी गंभीर साधुओने मारतां जो तुं कदाच पापथी नथी डरतो, तोपण माराजेवाथी पण शुं तुं डरतो नथी? ॥ ५७ ॥

**शमिनः सुयशोमुख्या हन्त त्वामसहन्त रे । नाहं सहिष्ये हन्म्येष स्वाभीष्टं स्मर दैवतम् ॥५८॥**

अन्वयः—रे ! हंत ! सुयशः मुख्याः शमिनः त्वां असहंत, एषः अहं न सहिष्ये, हन्मि, स्व अभीष्टं दैवतं स्मर? ॥ ५८ ॥

अर्थः—अरेरे! दुष्ट! सुयशआदिक मुनिओए तारुं सहन कर्युं छे, आ हुं ते सहन करवानो नथी, (हमणा तने) मारी नाखुं छुं, माटे तारा इष्टदेवनुं तुं स्मरण कर? ॥ ५८ ॥

इत्युक्त्वा तडितेव द्रुं तं तेजोलेश्यया मुनिः । भस्मीकृत्य द्रुतं प्राप पयोद इव शान्तताम् ॥ ५९ ॥

अन्वयः—इति उक्त्वा मुनिः, तडिता द्रुं इव तेजोलेश्यया द्रुतं तं भस्मीकृत्य पयोदः इव शांततां प्राप. ॥ ५९ ॥

अर्थः—एम कहीने ते मुनि, वीजळीथी वृक्षनी पेठे, तेजोलेश्याथी तुरत तेने (बाळीने) भस्मीभूत करी मेघनी पेठे शांत थया.

भूपोऽथ पापभारेण समुत्पतितुमक्षमः । अधोगतीनामवधिं सप्तमीं दुर्गतिं गतः ॥ ६० ॥

अन्वयः—अथ पाप भारेण समुत्पतितुं अक्षमः भूपः, अधः गतीनां अवधिं सप्तमीं दुर्गतिं गतः ॥ ६० ॥

अर्थः—पछी पापना भारथी उंचे जवाने असमर्थ एवो ते राजा, नीचीगतिनी सीमासरखी सातमी नरकमां गयो. ॥ ६० ॥

सोऽप्यालोच्य प्रतिक्रम्म तदतिक्रम्य पातकम् । मुनिस्तीव्रतपस्तप्त्वा दिवमायुःक्षयादगात् ॥ ६१ ॥

अन्वयः—सः मुनिः अपि आलोच्य, प्रतिक्रम्य तत् पातकं अतिक्रम्य तीव्र तपः तप्त्वा आयुः क्षयात् दिवं अगात्. ॥ ६१ ॥

अर्थः—(पछी) ते सोममुनि पण आलोचना लेइने, पडिक्कमीने, ते पापने ओळंगीने, आकरो तप तपी आयु समाप्त थयेथी देवलोकमां गया. ॥ ६१ ॥

स भूरमणजीवस्तु स्वयंभूरमणार्णवे । अप्रतिष्ठाननरकादुध्धृतस्तमितां गतः ॥ ६२ ॥

अन्वयः–सः भू रमण जीवः तु अप्रतिष्ठान नरकात् उध्धृतः, स्वयंभू रमण अर्णवे तिमितां गतः. ॥ ६२ ॥

अर्थः—(पछी) ते राजानो जीव तो ते सातमी नरकमांथी उद्धरीने स्वयंभूरमण नामना महासागरमां मत्स्यपणे उत्पन्न थयो.

**स तिमिः सप्तमीमेव जगाम जगतीं ततः । ततोऽप्युध्धृत्य मत्स्योऽभूद्गतः षष्ठीं च दुर्गतिम् ॥ ६३ ॥**

अन्वयः–सः तिमिः ततः सप्तमीं एव जगतीं गतः, ततः अपि उध्धृत्य मत्स्यः अभूत्, च षष्ठीं दुर्गतिं गतः ॥ ६३ ॥

अर्थः–ते मत्स्य त्यांथी पाछो सातमीज नरकमां गयो, अने त्यांथी पण निकळीने पाछो मत्स्य थयो, अने त्यांथी निकळीने छठ्ठी नरके गयो. ॥ ६३ ॥

**चण्डालस्त्रीभवं प्राप्य पुनस्तत्रैव यातवान् । ततः कुम्भीनसो भूत्वा स भूमीं पञ्चमीं गतः ॥ ६४ ॥**

अन्वयः—चंडाल स्त्री भवं प्राप्य, पुनः तत्र एव यातवान्, ततः कुंभीनसो भूत्वा सः पंचमीं भूमिं गतः. ॥ ६४ ॥

अर्थः—पछी चंडालनी स्त्रीनो भव पामीने पाछो तेज छठ्ठी नरकमां गयो, त्यांथी भयंकर सर्प थइने ते पांचमी नरके गयो.

**पुनर्जगाम तामेव भुवं मीनभवान्तरः । मृगनाथः स भूत्वाथ तुरीयं निरयं गतः ॥ ६५ ॥**

अन्वयः–पुनः मीन भव अंतरः तां एव भुवं जगाम, अथ मृगनाथः भूत्वा सः तुरीयं निरयं गतः. ॥ ६५ ॥

अर्थः—वळी पाछो वच्चे मत्स्यनो भव करीने तेज पांचमी नरकमां गयो. तथा पछी सिंह थइने ते चोथी नरके गयो. ॥६५॥

**पुनस्तत्रैव पाठीनशरीरान्तरितोऽगमत् ॥ श्येनीभूय तृतीयं स इयाय निरयं ततः ॥ ६६ ॥**

अन्वयः—पुनः पाठीन शरीर अंतरितः तत्र एव अगमत्, ततः श्येनीभूय सः तृतीयं निरयं इयाय. ॥ ६६ ॥

अर्थः—पाछो वच्चे मत्स्य थइने ते त्यां चोथी नरकमांज गयो, अने पाछो सकरो थइने ते त्रीजी नरके गयो. ॥ ६६ ॥

**गृध्रदेहं गृहीत्वाथ गतस्तामेव दुर्गतिम् । द्वितीयां भुजगो भूत्वा जगाम जगतीं च सः ॥ ६७ ॥**

अन्वयः–अथ गृध्र देहं गृहीत्वा तां एव दुर्गतिं गतः, च भुजगः भूत्वा सः द्वितीयां जगतीं जगाम. ॥ ६७ ॥

अर्थः—वळी गीधनुं शरीर धारण करीने पाछो तेज त्रीजी नरके गयो, तथा पछी सर्प थइने ते बीजी नरके गयो. ॥ ६७ ॥

**सोऽगमद्भोगभृद्भूय तत्र भूयोऽपि दुर्गतौ । तिमीभूयागमदसौ प्रथमां पृथिवीमथ ॥ ६८ ॥**

अन्वयः—भोगभृत् भूय सः भूयः अपि तत्र दुर्गतौ गतः, अथ तिमीभूय असौ प्रथमां पृथिवीं अगमत्. ॥ ६८ ॥

अर्थः—वळी सर्प थइने ते पाछो तेज बीजी नरके गयो, तथा पछी मत्स्य थइने ते पहेली नरके गयो. ॥ ६८ ॥

**अजायत स जीवोऽथ पक्ष्येको विकलेन्द्रियः । हीनेन्द्रियचयस्तिर्यग्नीचजातिर्नरः सुरः ॥ ६९ ॥**

अन्वयः—अथ सः जीवः पक्षी, एकः, विकल इंद्रियः, हीन इंद्रिय चयः, तिर्यक्, नीच जातिः नरः सुरः अजायत. ॥ ६९ ॥

अर्थः–वळी ते जीव पक्षी, एकेंद्रिय, विकलेंद्रिय, इंद्रियोना हिन समूह वाळो तिर्यंच, नीच जातिवाळो मनुष्य अने देव थयो. ६९

नारकश्चेति शतशः सोऽभूद्भवचरश्चिरम् । नानायोनिभवां भूरिपराभूतिं समाश्रयत् ॥ ७० ॥

अन्वयः—च नारकः, इति सः शतशः भवचरः अभूत्, चिरं नाना योनि भवां भूरि पराभूतिं समाश्रयत्. ॥ ७० ॥

अर्थः–पाछो (वच्चे भवांतर करीने) ते नारकी थयो, एम ते सेंकडो वखत विविध भवोमां रखड्यो, अने घणा काळसुधी ते ते विविध जन्मोमां थयेली घणी वेदनाओ तेणे सहन करी. ॥ ७० ॥

आकुलः कष्टकोटीभिर्बन्धव्यथवधादिभिः । भवे भवे स पश्चत्वमवाप व्यापदां पदम् ॥ ७१ ॥

अन्वयः–व्यापदां पदं सः बंध व्यथ वध आदिभिः कष्टकोटीभिः आकुलः सः भवे भवे पंचत्वं अवाप. ॥ ७१ ॥

अर्थः—दुःखोनां स्थानसरखो ते बंधनोनी पीडा, तथा वध आदिक क्रोडोगमे कष्टोथी व्याकुल थयो थको ते भवो भवमांमृत्यु पाम्यो. ॥ ७१ ॥

इत्यापदोऽतिगहनाः सहमानेन संसृतौ । तेन बह्व्योऽवसर्पिण्य उत्सर्पिण्यश्च निन्यिरे ॥ ७२ ॥

अन्वयः—इति संसृतौ अति गहनाः आपदः सहमानेन तेन बह्व्यः अवसर्पिण्यः च उत्सर्पिण्यः निन्यिरे. ॥ ७२ ॥

अर्थः–एरीते संसारमां अति भयंकर आपदाओने सहन करतांथकां तेणे घणी अवसर्पिणीओ अने उत्सर्पिणीओने व्यतीत करी.

सोऽकामनिर्जराक्षामकर्माथ तनुभूरभूत् । गृहिणः सिंहदत्तस्य वसन्तपुरवासिनः ॥ ७३ ॥

अन्वयः-अथ अकाम निर्जरा क्षाम कर्मा सः वसंतपुर वासिनः सिंहदत्तस्य गृहिणः तनुभूः अभूत्. ॥ ७३ ॥

अर्थः—पछी अकाम निर्जराथी कर्मोने खपावीने ते वसंतपुरमां रहेनारा सिंहदत्तनामना गृहस्थीनो पुत्र थयो. ॥ ७३ ॥

**तारुण्ये तापसीभूय तपस्तप्त्वा स दुस्तपम् । फलं त्वज्ञानकष्टस्य प्राप त्वत्पुत्रतामयम् ॥ ७४ ॥**

अन्वयः—तारुण्ये सः अयं तापसीभूय दुस्तपं तपः तप्त्वा अज्ञान कष्टस्य तु फलं त्वत् पुत्रतां प्राप. ॥ ७४ ॥

अर्थः—पछी यौवन वयमां ते तापस थइने, तथा आकरो तप तपीने, ते अज्ञानकष्टना फलरूप आपना पुत्रपणाने प्राप्त थयो.

**ऋषिघातप्रवचनद्वेषजं पापमेष तत् । तीव्राभिः कष्टकोटीभिस्ताभिस्ताभिरशोषयत् ॥ ७५ ॥**

अन्वयः—ऋषि घात प्रवचन द्वेष जं तत् पापं एषः, ताभिः ताभिः तीव्राभिः कष्ट कोटीभिः अशोषयत्. ॥ ७५ ॥

अर्थः—मुनिनी हिंसा तथा जैनशासनना द्वेषथी उत्पन्न थयेलां ते पापने तेणे ते ते आकरा क्रोडोगमे कष्टो सहन करीने खपाव्युं.

**तेन शोषितशेषेण दुरितेन तवात्मजः । अयं बभूव भूपाल रोगजालस्य भाजनम् ॥ ७६ ॥**

अन्वयः-(हे) भूपाल! शोषित शेषेण तेन दुरितेन अयं तव आत्मजः रोग जालस्य भाजनं बभूव. ॥ ७६ ॥

अर्थः-हे राजन्! खपावतां खपावतां बाकी रहेलां ते दुष्कर्मथी आ तमारो पुत्र रोगोना समूहना पात्ररूप थयो छे. ॥ ७६ ॥

**इत्युक्तिं दुःश्रवां श्रुत्वा चकम्पे चकितो नृपः । स विक्रमकुमारस्तु जातजातिस्मृतिर्जगौ ॥ ७७ ॥**

अन्वयः–इति दुःश्रवां उक्तिं श्रुत्वा चकितः नृपः चकंपे, सः विक्रम कुमारः तु जात जातिस्मृतिः जगौ. ॥ ७७ ॥

अर्थः–एवी रीतनां (ते मुनिनां) दुःश्रव वचनो सांभळीने भयभीत थयेलो राजा तो कंपवा लाग्यो, अने ते विक्रम कुमार तो (पोताने) जातिस्मरण ज्ञान थवाथी बोल्यो के, ॥ ७७ ॥

**विवेकदीपमप्राप्य प्रभो मोहतमोहतः । हहा कष्टमहासिन्धौ मार्गभ्रष्टः पुरापतम् ॥ ७८ ॥**

अन्वयः—(हे) प्रभो! हहा! पुरा विवेक दीपं अप्राप्य, मोह तमः हतः मार्ग भ्रष्टः कष्ट महासिंधौ अपतं ॥ ७८ ॥

अर्थः—हे प्रभु! अरेरे! पूर्वे विवेकरूपी दीपक नही मळवाथी मोहरूपी अंधकारथी अंध थइने कुमार्गमां अथडातो थको हुं कष्टरूपी महासागरमां पड्यो. ॥ ७८ ॥

**इतश्चेतश्च चण्डाभिस्ताड्यमानस्तदूर्मिभिः । दैवात्तत्तीरमेत्यास्मिन्मग्नो रुक्पङ्कसंकटे ॥ ७९ ॥**

अन्वयः—चंडाभिः तत् ऊर्मिभिः इतः च इतः च ताड्यमानः दैवात् तत्तीरं एत्य अस्मिन् रुक् पंक संकटे मग्नः ॥ ७९ ॥

अर्थः–तेना भयंकर मोजांओथी आमतेम भटकातो एवो हुं दैवयोगे ते कष्टसागरने किनारे आवीने आ रोगोरूपी कादवना संकटमां सपडाइ गयो छुं. ॥ ७९ ॥

**जगद्गुरो करालम्बं तद्यच्छानवलम्बितम् । आकर्ष मामितः स्वामिन्निरीह करुणां कुरु ॥ ८० ॥**

अन्वयः—( हे ) जगत् गुरो ! ( हे ) स्वामिन् ! ( हे ) निरीह ! तत् अनवलंबितं कर आलंबं यच्छ ? मां इतः आकर्ष ? इह करुणां कुरु ? ॥ ८० ॥

अर्थः–हे जगत् स्वामी ! हे प्रभु ! हे निःस्पृह ! माटे हवे तुरत आपना हाथनो टेको आपो ? अने आ कादवमांथी मने खेंचो ? तथा मारापर कृपा करो ? ॥ ८० ॥

**सम्यक्त्वैकगुणप्रोतद्वादशव्रतभूषणम् । श्राद्धधर्ममथो हस्तमिव व्यस्तारयद्विभुः ॥ ८१ ॥**

अन्वयः–अथो विभुः हस्तं इव, सम्यक्त्व एक गुण प्रोत द्वादश व्रत भूषणं श्राध्ध धर्मं व्यस्तारयत्. ॥ ८१ ॥

अर्थः–पछी ते केवली भगवाने ( पोताना ) हाथनीपेठे सम्यक्त्वरूपी एक गुणथी ( दोरीथी ) परोवेला ( गुंथेला ) एवा बार व्रतोरूपी आभूषणवाळा श्रावकधर्मने विस्तार्यो, ॥ ८१ ॥

**रोमहर्षाङ्कुराकीर्णो हर्षाश्रुकणमिश्रदृक् । जग्राह श्रावकं धर्मं विक्रमोऽथ यथाविधि ॥ ८२ ॥**

अन्वयः—अथ रोम हर्ष अंकुर आकीर्णः, हर्ष अश्रु कण मिश्र दृक् विक्रमः यथाविधि श्रावकं धर्मं जग्राह. ॥ ८२ ॥

अर्थः—पछी हर्षथी रोमांचित थयेला, तथा हर्षाश्रुना बिंदुओथी भरेली आंखोवाळा ते विक्रम कुमारे विधिपूर्वक श्रावक धर्मने अंगीकार कर्यो. ॥ ८२ ॥

भूपोऽभूद्भद्रको नत्वा तौ मुनिं पुरमीयतुः । व्यहरद्वसुधां बोधिंसुधाम्भोधिस्ततो मुनिः ॥ ८३ ॥

अन्वयः–ततः भूपः भद्रकः अभूत्, मुनिं नत्वा तौ पुरं ईयतुः, बोधि सुधा अंभोधिः मुनिः वसुधां व्यहरत्. ॥ ८३ ॥

अर्थः—पछी राजा पण भद्रकपरिणामी थयो, त्यारबाद ते मुनिराजने वांदीने तेओ बन्ने नगरमां गया, अने ज्ञानरूपी अमृतना महासागर सरखा ते मुनिराज पण पृथ्वीपर विहार करवा लाग्या. ॥ ८३ ॥

धर्मद्रुमूलसम्यक्त्वरसास्वादकृतादरः । छिन्नाघकन्दैर्मुमुचे व्याधिभिर्विक्रमः क्रमात् ॥ ८४ ॥

अन्वयः–धर्ममूल सम्यक्त्व रस आस्वाद कृत आदरः विक्रमः क्रमात् छिन्न अघ कंदैः व्याधिभिः मुमुचे. ॥ ८४ ॥

अर्थः—धर्मनां मूळसरखां सम्यक्त्वनो रस चाखवामां करेलो छे आदर जेणे, एवो ते विक्रमकुमार अनुक्रमे पापोनां मूळो छेदीने रागोथी मुक्त थयो. ॥ ८४ ॥

नवोल्लासितलावण्यपुण्यसर्वाङ्गचङ्गिमा । धर्मालंकरणः सोऽभून्मुक्तेरपि मनोरमः ॥ ८५ ॥

अन्वयः–नव उल्लासित लावण्य पुण्य सर्व अंग चंगिमा, धर्म अलंकरणः सः मुक्तेः अपि मनोरमः अभूत्. ॥ ८५ ॥

अर्थः—नवां प्रफुल्लित थयेलां लावण्यथी पवित्र थयेल छे सर्व शरीरनी शोभा जेनी, तथा धर्मरूपी आभूषणवाळो ते विक्रमकुमार मुक्तिने पण मनोहर लागवा लाग्यो. ॥ ८५ ॥

निशाशेषेऽन्यदा यक्षः प्रत्यक्षः स जगाद तम् । मच्छक्त्या सज्जदेहोऽसि देहि मे महिषाञ्शतम् ॥८६॥

अन्वयः–अन्यदा सः यक्षः निशा शेषे प्रत्यक्षः तं जगाद, मत् शक्त्या सज्ज देहः असि, मे शतं महिषान् देहि ? ॥ ८६ ॥

अर्थः—पछी एक दिवसे ते धनंजय यक्षे पाछली रात्रिए प्रत्यक्ष थइने तेने कह्युं के, मारी शक्तिथी तुं निरोगी शरीरवाळो थयोछुं, ( माटे हवे ) मने एकसो पाडाओनुं बलिदान आप ? ॥ ८६ ॥

तमूचे विक्रमो याचन्लुलायान्किं न लज्जसे । जज्ञेऽङ्गं मुनिदिष्टेन सज्जं धर्मौषधेन मे ॥ ८७ ॥

अन्वयः–तं विक्रमः ऊचे, लुलायान् याचन् किं न लज्जसे ? मे अंग मुनि दिष्टेन धर्म औषधेन सज्जं जज्ञे. ॥८७ ॥

अर्थः–(त्यारे) तेने ते विक्रमकुमारे कह्युं के, ( हे यक्ष ! ) पाडाओनी मागणी करतां शुं तुं शरमातो नथी? मारुं शरीर तो मुनिराजे उपदेशेला धर्मरूपी औषधथी सारुं थयुं छे. ॥ ८७ ॥

धर्माख्यमौषधं दृष्टप्रत्ययं कष्टतोऽर्जितम् । जीवव्यापादपापाब्धौ यक्ष कः क्षिपति प्रधीः ॥ ८८ ॥

अन्वयः–(हे) यक्ष ! दृष्ट प्रत्ययं, कष्टतः अर्जितं धर्म आख्यं औषधं कः प्रधीः जीव व्यापाद पाप अब्धौ क्षिपति ? ॥ ८८ ॥

अर्थः—हे यक्ष ! जेनी खातरी प्रत्यक्ष जोयेली छे, तथा जे महाकष्टे मळेलुं छे, एवुं धर्मनामनुं औषध कयो सुबुद्धि माणस जीवहिंसारूपी पापना महासागरमां फेंकी दे ? ॥ ८८ ॥

आचचक्षे च यक्षेशो ददास्यन्यस्य मद्यशः । ततस्तत्ते करिष्यामि कामं येनानुतप्यसे ॥ ८९ ॥

अन्वयः-च यक्ष इशः आचचक्षे, मद्यशः अन्यस्य ददासि, ततः ते तत् करिष्यामि, येन कामं अनुतप्यसे. ॥ ८९ ॥

अर्थः-पछी ते यक्षेंद्रे कह्युं के, मारो यश जे तुं बीजाने आपे छे, तेथी तने हुं एवुं करी बतावीश, के जेथी तने खूब पश्चात्ताप थशे.

इत्युदित्वा तिरोभूते यक्षे दक्षैकशेखरः । अनाकुलमनाश्चक्रे कृत्यकर्माणि विक्रमः ॥ ९० ॥

अन्वयः—इति उदित्वा यक्षे तिरोभूते दक्ष एक शेखरः विक्रमः अनाकुल मनाः कृत्य कर्माणि चक्रे. ॥ ९० ॥

अर्थः—एम कहीने ते यक्ष अदृश्य थयाबाद चतुरशिरोमणि एवो ते विक्रमकुमार मनमां व्याकुल थयाविना (पोतानुं) नित्य कार्य करवा लाग्यो. ॥ ९० ॥

तत्रामरनिकेताख्योद्यानश्रीशेखरेऽन्यदा । जिनागारे कुमारेन्दुर्ययौ कल्याणकोत्सवे ॥ ९१ ॥

अन्वयः-अन्यदा कुमार इंदुः तत्र अमर निकेत आख्य उद्यान श्री शेखरे जिनागारे कल्याणक उत्सवे ययौ. ॥ ९१ ॥

अर्थः-एक वखते ते कुमारचंद्र त्यां अमरनिकेतनामना उद्याननी लक्ष्मीना मुकुटसरखा जिनमंदिरमां (प्रभुना) कल्याणकना महोत्सवमां गयो. ॥ ९१ ॥

ततः स्नात्रविलेपार्चाप्रेक्षणीयस्तवक्षणैः । जिनेन्दोर्जनयित्वैष यात्रां यावन्न्यवर्तत ॥ ९२ ॥

**अस्तम्भयद्भयव्यग्रं तावत्तस्याखिलं बलम् । निजक्रीडावनक्रोडे स धनञ्जयगुह्यकः ॥ ९३ ॥ युग्मम् ।**

अन्वयः-ततः स्नात्र विलेप अर्चा प्रेक्षणीय स्तव क्षणैः जिन इन्दोः यात्रां जनयित्वा यावत् एषः न्यवर्तत, ॥ ९२ ॥ तावत् सः धनंजय गुह्यकः निजक्रीडा वन क्रोडे तस्य भय व्यग्रं अखिलं बलं अस्तंभयत्. ॥ ९३ ॥ युग्मं ॥

अर्थः-पछी ( त्यां ) स्नात्र, विलेपन, पूजन, नाटक तथा स्तवनना महोत्सवथी ते जिनचंद्रनी भक्ति करीने जेवामां ते कुमार पाछो वळयो, ॥९२॥ तेवामां ते धनंजय यक्षे पोताना क्रीडावननी अंदर भयभीत थयेलां तेना सर्व सैन्यने स्तंभी राख्युं. ॥९३॥

**यमाग्निकौणपध्वान्तकोटिक्लृप्तामिवाथ सः । हताम्बरचरस्फूर्तिं मूर्तिं निर्माय मायया ॥ ९४ ॥**

**रोषप्लोषितया भीष्मघनघर्घरघोषया । तं क्षोणिपसुतं यक्षः साक्षेपमिदमब्रवीत् ॥ ९५ ॥ युग्मम् ॥**

अन्वयः—अथ सः यक्षः यम अग्निकौणप ध्वांत कोटि क्लृप्तां इव, हत अंबर चर स्फूर्तिं मूर्तिं मायया निर्माय, रोष प्लोषितया, भीष्म घन घर्घर घोषया ( वाचा ) तं क्षोणिप सुतं साक्षेपं इदं अब्रवीत्. ॥ ९४ ॥ ९५ ॥ युग्मं ॥

अर्थः—पछी ते यक्ष यम, अग्नि, राक्षस, तथा अंधकारना सारथी जाणे बनावी होय नही ! एवी, तथा खेचरोना गमनने पण हणनारी, एवी पोतानि मूर्ति मायाथी बनावीने, रोष भरेली, तथा भयंकर मेघगर्जना सरखा घर्घर अवाजवाळी ( भाषाथी ) ते राजपुत्रने धमकावीने कहेवा लाग्यो के, ॥ ९४ ॥ ९५ ॥ युग्मं ॥

न रे नराधम कथं ददासि मम कासरान् । आयुःकाण्डमकाण्डेऽपि समापयसि किं स्वकम् ॥ ९६ ॥

अन्वयः—रे! नर अधम! मम कासरान् कथं न ददासि? अकांडे अपि स्वकं आयुः कांडं किं समापयसि? ॥ ९६ ॥

अर्थः—अरे अधम पुरुष! मने पाडा केम आपतो नथी? तथा कवखते पण पोतानुं आयु शामाटे समाप्त करे छे? ॥ ९६ ॥

स्मितधौताधरोऽधत्त कुमारो भारतीमथ । भो यक्ष न क्षिपामि स्वं तनुमद्घातपातके ॥ ९७ ॥

अन्वयः—अथ स्मित धौत अधरः कुमारः भारतीं अधत्त, भोः यक्ष! तनुमत् घात पातके स्वं न क्षिपामि. ॥ ९७ ॥

अर्थः—पछी हास्यथी धोयेल छे होठ जेणे एवो ते कुमार वचन बोल्यो के, हे यक्ष! जीवहिंसाना पापमां हुं मारा आत्माने धकेलवानो नथी. ॥ ९७ ॥

अप्यारब्धबहुत्राणाः प्राणाः कस्यापि न स्थिराः । तत्कृत्याकृत्यवित्कुर्यादकृत्यं तत्कृतेऽपि कः ॥ ९८ ॥

अन्वयः—आरब्ध बहु त्राणाः अपि कस्य अपि प्राणाः स्थिराः न, तत् कः कृत्य अकृत्यवित् तत् कृते अकृत्यं अपि कुर्यात्?

अर्थः—घणुं रक्षण कर्या छतां पण कोइना पण प्राणो स्थिर रही शकता नथी, माटे कार्य अकार्यने जाणनारो कयो माणस ते प्राणोमाटे अकार्य पण करे? ॥ ९८ ॥

इत्याकर्ण्य क्रुधा यक्षो विक्रमं क्रमसंग्रहात् । उत्पाट्यास्फालयद्वीचीमिवाभ्यर्णाचलेऽर्णवः ॥ ९९ ॥

अन्वयः–इति आकर्ण्य यक्षः क्रुधा, अर्णवः अभ्यर्ण अचले वीचीं इव, विक्रमं क्रम संग्रहात् उत्पाट्य आस्फालयत्. ॥९९॥

अर्थः—ते सांभळीने यक्षे क्रोधथी, महासागर नजीकना खडकपर जेम मोजांओने पछाडे, तेम ते विक्रमकुमारने पग पकडी उपाडीने पछाड्यो. ॥ ९९ ॥

**मूर्छामुच्छिद्य यक्षस्तं क्रुधान्धः पुनरभ्यधात् । रे रे ददासि नाद्यापि किं मद्देयमदेयवत् ॥ १०० ॥**

अन्वयः–यक्षः मूर्छां उच्छिद्य क्रुधा अंधः पुनः तं अभ्यधात्, रेरे! अदेयवत् अद्य अपि मद्देयं किं न ददासि ? ॥ १०० ॥

अर्थः—पछी यक्षे तेनी मूर्छा दूर करी क्रोधांध थइ फरीने तेने कह्युं के, अरे! जाणे देवुं न होय! तेम हजु पण शुं तारे मारुं करज आपवुं नथी ? ॥ १०० ॥

**कृपां करोषि जीवेषु स्वजीवे न करोषि किम् । मद्वध्यतां गतेऽमुष्मिन्धर्माविष्कारकारणे ॥ १ ॥**

अन्वयः–जीवेषु कृपां करोषि, धर्म आविष्कार कारणे, मद् वध्यतां गते अमुष्मिन् स्व जीवे (कृपां) किं न करोषि ? ॥१॥

अर्थः—(तुं बीजा) जीवोनी तो दया करे छे, अने धर्म प्रगट करवाना कारणभूत, तथा माराथी हणाता, एवा आ पोताना जीवपर (तुं) केम दया करतो नथी ? ॥ १ ॥

**धर्माधारः कुमारोऽथ गिरं जग्राह साहसी । स्वैकजीवकृते जीवशतं को हन्ति धर्मवित् ॥ २ ॥**

अन्वयः–अथ धर्माधारः साहसी कुमारः गिरं जग्राह, धर्मवित् कः स्व एक जीव कृते जीव शतं हंति? ॥ २ ॥

अर्थः–त्यारे धर्मनो आधारभूत ते साहसिक विक्रमकुमार बोल्यो के, धर्मने जाणनारो कयो माणस पोताना एक जीवमाटे सो जीवनी हिंसा करे? ॥ २ ॥

**फलं तवापि धिग्यक्ष जीवलक्षनिपातनैः । इहामगन्धिकं धाम परत्र नरकव्यथा ॥ ३ ॥**

अन्वयः–(हे) यक्ष! धिक्! जीव लक्ष निपातनैः इह तव अपि आमगंधिकं धाम फलं, परत्र नरक व्यथा. ॥ ३ ॥

अर्थः–हे यक्ष! धिक्कर छे! के, लाखोगमे जीवोनी हिंसार्थी अहीं आ (भवमां तने) आ तारां दुर्गंधयुक्त स्थानरूपी फल मळेल छे, अने परभवमां नरकनी वेदनारूपी फळ मळशे. ॥ ३ ॥

**त्वं धर्मादेव देवत्वं यातोऽसि प्राग्भवं स्मर । पातके जातकेलिस्तत्किमसि ज्ञानवानपि ॥ ४ ॥**

अन्वयः—त्वं प्राग् भवं स्मर? धर्मात् एव देवत्वं यातः असि, तत् ज्ञानवान अपि पातके जात केलिः किं असि? ॥ ४ ॥

अर्थः–तुं तारा पूर्व भवने याद कर? धर्मथीज तुं देवपणुं पाम्यो छे, माटे ज्ञानी होवा छतां पण तुं पापकार्योमां शामाटे क्रीडा करी रह्यो छे? ॥ ४ ॥

**पुण्यैकपरिणामेन जगदुल्लासहेतुना । तवापि युज्यते धर्तुमानन्दं वन्दनादिना ॥ ५ ॥**

अन्वयः-पुण्य एक परिणामेन, जगत् उल्लास हेतुना, वंदन आदिना तव अपि आनंदं धर्तुं युज्यते. ॥ ५ ॥
अर्थः—(माटे) पुण्यनाज एक परिणामवाळा, तथा जगतने हर्षना कारणरूप एवां वंदनआदिकथीज (संतुष्ट थइने) तारे पण आनंद पामवो लायक छे. ॥ ५ ॥

**इति तस्योक्तिभिर्युक्तिभिन्नाभिर्भिन्नमानसः । यक्षोऽभ्यधादहो साधु त्वयाहं प्रतिबोधितः ॥ ६ ॥**

अन्वयः-इति युक्ति भिन्नाभिः तस्य उक्तिभिः भिन्न मानसः यक्षः अभ्यधात्, अहो! त्वया अहं साधु प्रतिबोधितः. ॥ ६ ॥
अर्थः-एरीते युक्तिवाळां तेनां वचनोथी नम्र थयेला मनवाळा ते यक्षे कह्युं के, अहो! तें मने ठीक प्रतिबोध आप्यो. ॥ ६ ॥

**ततो नाद्यापि माद्यामि पापार्हैरङ्गिनां वधैः । नृणां प्रणाममात्रेण गमिष्यामि प्रसन्नताम् ॥ ७ ॥**

अन्वयः-ततः अद्य अपि पाप अर्हैः अंगिनां वधैः न माद्यामि, प्रणाम मात्रेण नृणां प्रसन्नतां गमिष्यामि. ॥ ७ ॥
अर्थः—माटे हवे आजथी हुं पाप उपार्जन करनारी जीवहिंसाथी खुशी थइश नही, परंतु फक्त प्रणामथीज हुं लोकोपर प्रसन्न रहीश. ॥ ७ ॥

**कुरु त्वमपि मे नाम प्रणाममलाशय । तेनैव तेऽनुमंस्येऽहं संपूर्णमखिलं खलु ॥ ८ ॥**

अन्वयः—हे! अमल आशय! त्वं अपि मे नाम प्रणामं कुरु? तेन एव ते अहं अनुमंस्ये, अखिलं खलु संपूर्णं. ॥ ८ ॥
अर्थः—हे निर्मल आशयवाळा विक्रम कुमार! तुं पण मने फक्त प्रणाम कर?, अने तेथीज तारापर हुं प्रसन्न थइश, (हवे बीजी)

सघळी (हकीकत) हुं मांडी वाळुं छुं. ॥ ८ ॥

**कुमारोऽथ जगौ यक्ष नमस्कारो हि पञ्चधा । प्रहासविनयप्रेमप्रभुभावप्रभेदभाक् ॥ ९ ॥**

अन्वयः-अथ कुमारः जगौ, हे यक्ष! नमस्कारः हि प्रहास विनय प्रेम प्रभु भाव प्रभेद भाक् पंचधा. ॥ ९ ॥

अर्थः-त्यारे कुमारे कह्युं के, हे यक्ष! नमस्कार खरेखर हांसी, विनय, प्रेम, मालिक अने भावना भेदथी पांच प्रकारनो छे.

**स प्रहासप्रणामः स्याच्चित्तोत्सङ्गितमत्सरैः । यः क्रियेत परिज्ञातविक्रियेभ्योऽपि सत्क्रियैः ॥ १० ॥**

अन्वयः—चित्त उत्संगित मत्सरैः सत्क्रियैः परिज्ञात विक्रियेभ्यः अपि यः क्रियेत, सः प्रहास प्रणामः स्यात्. ॥ १० ॥

अर्थः—मनमां मत्सर लावीने सत्कार करवानो डोळ करीने, जाणेलो छे (पोताप्रतेनो) तिरस्कार जेओनो, एवा माणसोने पण जे प्रणाम कराय छे, ते हांसीयुक्त प्रणाम कहेवाय. ॥ १० ॥

**तमामनन्ति विनयप्रणामं नयपण्डिताः । पित्रादिभ्या विधीयेत पुत्राद्यैर्विनयेन यः ॥ ११ ॥**

अन्वयः-पितृ आदिभ्यः पुत्र आद्यैः विनयेन यः विधीयेत, तं नय पंडिताः विनय प्रणामं आमनंति. ॥ ११ ॥

अर्थः-पिताआदिकोने पुत्रआदिको विनयथी जे प्रणाम करे छे, तेने नीतिकोविदो विनयप्रणाम माने छे. ॥ ११ ॥

**प्राहुः प्रेमप्रणामं तं प्रणयिभ्यः क्रियेत यः । कामं सप्रेमकोपेभ्यो मित्रादिभ्यः प्रसत्तये ॥ १२ ॥**

अन्वयः—प्रणयिभ्यः यः क्रियते तं प्रेम प्रणामं प्राहुः, कामं सप्रेम कोपेभ्यः मित्रादिभ्यः प्रसत्तये. ॥ १२ ॥

अर्थः—प्रीति राखनाराओ प्रते जे कराय छे, तेने प्रेमप्रणाम कहे छे. अने ते प्रायें करीने प्रेम सहित कोपातुर थयेला मित्रो आदिकने प्रसन्न करवामाटे कराय छे. ॥ १२ ॥

**यस्तु स्वामिनि संमानमानश्रीदानशालिनि । ऐहिकः क्रियते स्वामिनमस्कारमुशन्ति तम् ॥ १३ ॥**

अन्वयः—तु संमान मान श्री दान शालिनि स्वामिनि यः ऐहिकः क्रियते तं स्वामि नमस्कारं उशंति. ॥ १३ ॥

अर्थः—वळी सत्कार, आदरमान तथा लक्ष्मीदान आपनारा मालिकप्रते जे आ लोकना लाभमाटे नमस्कार करवो, तेने स्वामिनमस्कार कहे छे. ॥ १३ ॥

**यः सद्गुरौ च देवे च वीतरागे विरच्यते । तं तु भावनमस्कारं निर्दिशन्ति विशारदाः ॥ १४ ॥**

अन्वयः—सद्गुरौ च वीतरागे देवे च यः विरच्यते, तं तु विशारदाः भाव नमस्कारं निर्दिशंति. ॥ १४ ॥

अर्थः—वळी उत्तम गुरुप्रते तथा रागरहित तीर्थंकर प्रभुप्रते जे नमस्कार कराय छे, तेने विद्वानो भावनमस्कार कहे छे. ॥१४॥

**विचारय त्वमेतेषु कं नमस्कारमर्हसि । इत्याकर्ण्य कुमारोक्तिमभ्यधत्त धनंजयः ॥ १५ ॥**

अन्वयः—त्वं विचारय? एतेषु कं नमस्कारं अर्हसि? इति कुमार उक्तिं आकर्ण्य धनंजयः अभ्यधत्त. ॥ १५ ॥

अर्थः—(माटे हे यक्ष!) तुं विचार के, ते पांचे नमस्कारोमांथी कया नमस्कारने तुं लायक छे? एवीरीतनुं कुमारनुं वचन सां-

भळीने धनंजये कह्युं के, ॥ १५ ।'

**त्वं कुमार नमस्कारं कुरु भावमयं मयि । यद्देवोऽस्मि जगत्कारसंहारोद्धारकारणम् ॥ १६ ॥**

अन्वयः-(हे) कुमार! त्वं मयि भावमयं नमस्कारं कुरु? यत् जगत्कार संहार उद्धार कारणं देवः अस्मि. ॥ १६ ॥

अर्थः—हे कुमार! तुं मने भावमय नमस्कार कर? केमके हुं जगतने उत्पन्न करवामां, संहार करवामां, तथा तेनो उद्धार करवामां कारणरूप देव छुं. ॥ १६ ॥

**भवार्णवसमुत्तारतरीभूतविभूतयः । मदंशा एव भासन्ते सर्वदर्शनदेवताः ॥ १७ ॥**

अन्वयः—भव अर्णव समुत्तार तरीभूत विभूतयः, सर्व दर्शन देवताः मत् अंशाः एव भासंते. ॥ १७ ॥

अर्थः-(केमके) संसारसागरनो पार पामवामाटे नावसरखी समृद्धिवाळा सर्व दर्शनोना देवो मारा अंशरूपेज प्रकाशी रह्या छे. १७

**मन्नमस्कारमात्रेण तव संसारसागरः । विक्रम क्रमलङ्घ्यत्वमनुल्लङ्घ्यो गमिष्यति ॥ १८ ॥**

अन्वयः-(हे) विक्रम! मत् नमस्कार मात्रेण अनुल्लंघ्यः तव संसार सागरः क्रम लंघ्यत्वं गमिष्यति. ॥ १८ ॥

अर्थः-हे विक्रम! मने फक्त नमस्कार करवाथीज, न उल्लंघी शकाय एवो पण (आ) तारो संसारसागर एक पगलेज उल्लंघी शकाशे.

**अथाब्रूत स्मितस्यूतवदनो नृपनन्दनः । मयाकृष्टः क्रियापापाद्वाकूपापे यक्ष मा पत ॥ १९ ॥**

अन्वयः—अथ स्मित स्यूत वदनः नृपनंदनः अब्रूत, हे यक्ष! मया क्रिया पापात् आकृष्टः, वाक् पापे मा पत ? ॥ १९ ॥

अर्थः—पछी हास्यथी सीवाइ गयेला मुखवाळा ते राजकुमारे कह्युं के, हे यक्ष! में तने दुष्क्रियारूपी पापमांथी तो बहार कहाड्यो छे, हवे (पाछो) तुं वचनरूपी पापमां नही पड ? ॥ १९ ॥

**जगतां सृष्टिसंहारोद्धाराः सन्ति न सन्ति वा । इति सम्यग्न जानासि स्वमाख्यासि च तत्क्षमम् ॥२०॥**

अन्वयः—जगतां सृष्टि संहार उद्धाराः संति वा न संति, इति सम्यक् न जानासि, च स्वं तत् क्षमं आख्यासि. ॥ २० ॥

अर्थः—जगतनी उत्पत्ति, विनाश, के उद्धार छे के नही, तेसंबंधी पण तने पूरी समज नथी, अने पोताने ते ते कार्योमाटे समर्थ कहे छे! ॥ २० ॥

**यदङ्गमहसा दृष्टिः सहसा तव लुप्यते । तैः सुरेन्द्रैः स्तुतान्ख्यासि स्वांशान्दर्शनदेवताः ॥ २१ ॥**

अन्वयः—यत् अंग महसा सहसा तव दृष्टिः लुप्यते, तैः सुरेंद्रैः स्तुतान् स्व अंशान् दर्शन देवताः ख्यासि. ॥ २१ ॥

अर्थः—जेना शरीरना तेजथी एकदम तारी आंखो पण अंजाइ जाय, एवा देवेंद्रोए (पण) स्तवेला (देवाधिदेवोने) तुं तारा अंशरूप दर्शनिओना देवो कहे छे! ॥ २१ ॥

**स्वयं भवाब्धौ मत्स्यस्त्वं चापलेनोपलक्ष्यसे । नमस्कारात्तदुत्तारं कुतो दिशसि मे ततः ॥ २२ ॥**

अन्वयः—त्वं स्वयं भव अब्धौ चापलेन मत्स्यः उपलक्ष्यसे, ततः नमस्कारात् तत् उत्तारं मे कुतः दिशसि ? ॥ २२ ॥

अर्थः—तुं पोते आ संसारसागरमां चपलपणाथी मत्स्यसरखो देखाय छे, तो पछी नमस्कारथी ते भवसागरथी मने पार उतारवानुं शीरीते कहे छे? ॥ २२ ॥

**वचसा निष्फलेनैव तत्पापं मा वृथा कृथाः । भवेन्मम नमस्कारो भवेऽस्मिन्न जिनं विना ॥ २३ ॥**

अन्वयः-तत् निष्फलेन एव वचसा वृथा पापं मा कृथाः? अस्मिन् भवे जिनं विना मम नमस्कारः न भवेत्. ॥ २३ ॥

अर्थः-माटे निरर्थक वचनथीज तुं फोकट पाप न कर? केमके आ जन्ममां तीर्थंकरप्रभुविना मारो नमस्कार थइ शके एम नथी.

**इति वादिनि यक्षेन्दुर्मेदिनीनाथनन्दने । गिरं जागरयामास विवेकविमलामिमाम् ॥ २४ ॥**

अन्वयः—मेदिनी नाथ नंदने इति वादिनि यक्ष इंदुः इमां विवेक विमलां गिरं जागरयामास ॥ २४ ॥

अर्थः—ते राजकुमारे एम कहेवाथी ते यक्षराज नीचेमुजब विवेकथी निर्मल थयेली वाणी बोलवा लाग्यो के, ॥ २४ ॥

**ददृशे त्वादृशः कोऽपि पुमाननुपमाकृतिः । धीरो धर्मी च वाग्मी च राजपुत्र न कुत्रचित् ॥ २५ ॥**

अन्वयः—(हे) राजपुत्र! त्वादृशः अनुपम आकृतिः, धीरः, धर्मी च वाग्मी च कः अपि पुमान् कुत्रचित् न ददृशे. ॥२५॥

अर्थः-हे! राजपुत्र! तारासमान अनुपम स्वरूपवाळो, धैर्यवंत, धर्मी तथा वाचाळ कोइ पण पुरुष क्यांयें पण में जोयो नथी.२५

**जितस्त्वयाहं वचनैस्तेनास्मि तव किंकरः । शुद्धधर्मोपदेशाच्च मम त्वमसि सद्गुरुः ॥ २६ ॥**

अन्वयः—त्वया अहं वचनैः जितः, तेन तव किंकरः अस्मि, च शुद्ध धर्म उपदेशात् त्वं मम सद्गुरुः असि. ॥ २६ ॥

अर्थः–तें मने वचनोथी जीत्यो, माटे (हुं) तारो नोकर छुं, तथा (मने) शुद्ध धर्मनो उपदेश देवाथी तुं मारो सद्गुरु छे.।२६।

**स्वचित्तकोणं वासाय निजदासाय यच्छ मे । त्वच्छिष्यो यदि जानामि तद्गतां त्वद्गुणावलीम् ॥२७॥**

अन्वयः–निज दासाय मे वासाय स्व चित्त कोणं यच्छ, यदि त्वत् शिष्यः तत् गतां त्वत् गुण आवलीं जानामि. ॥ २७ ॥

अर्थ.–तारा सेवक एवा मने वसबा माटे तारां हृदयनो (एक) खूणो आप? के जेथी तारो शिष्य थयेलो हुं तेमां रहेली तारा गुणोनी श्रेणिने जाणी शकुं. ॥ २७ ॥

**विभो विरहयिष्यामि निजं चेतो न च त्वया । कदापि यदि वेत्तीदं जिनसेवोत्सवं तव ॥ २८ ॥**

अन्वयः—(हे) विभो! च त्वया निजं चेतः न विरहयिष्यामि, यदि कदापि इदं तव जिन सेवा उत्सवं वेत्ति. ॥ २८ ॥

अर्थः—हे प्रभु! वळी तारी साथे मारां हृदयनो हुं विरह करीश नही, के जेथी कोइक दिवसे पण आ मारुं हृदय तारा जिन-सेवाना महोत्सवने जाणी शकशे. ॥ २८ ॥

**भर्तः स्मर्तव्य एवाहमुत्कटे संकटे क्वचित् । अयमेव हि भृत्यानां स्वामिन्यवसरः परः ॥ २९ ॥**

अन्वयः–(हे) भर्तः क्वचित् उत्कटे संकटे अहं स्मर्तव्यः एव, हि भृत्यानां स्वामिनि अयं एव परः अवसरः. ॥ २९ ॥

अर्थः–हे स्वामी! कोइक विकट संकट वखते मने याद करवोज, केमके नोकरोनो स्वामिना संबंधमां तेज उत्कृष्टो अव-सर होय छे. ॥ २९ ॥

**इत्युदित्वैनमापृच्छ्यावगूह्य च स गुह्यकः । ययौ निजाश्रयं चित्रतच्चरित्रचमत्कृतः ॥ ३० ॥**

अन्वयः–इति उदित्वा एनं आपृच्छ्य, च अवगूह्य सः गुह्यकः चित्र तत् चरित्र चमत्कृतः निज आश्रयं ययौ. ॥ ३० ॥

अर्थः–एम कहीने, तथा तेनी रजा लेइने, अदृश्य थइ ते यक्ष तेना आश्चर्यकारक चरित्रथी चमत्कार पामीने पोताने स्थानके गयो.

**ततः प्रत्यूषशेषायां रजन्यां राजपुङ्गवः । द्रुतं विज्ञातवृत्तान्तः कुमारोपान्तमापतत् ॥ ३१ ॥**

अन्वयः—ततः विज्ञात वृत्तांतः राजपुंगवः प्रत्यूष शेषायां रजन्यां द्रुतं कुमार उपांतं आपतत्. ॥ ३१ ॥

अर्थः–पछी आ वृत्तांत जाणीने राजा ( पोते ) रात्रि वीत्याबाद तुरत ते राजकुमारनी पासे आव्यो. ॥ ३१ ॥

**मुदा कुमारमालिङ्ग्य पत्तनाय निनाय सः । बालार्करश्मिकाश्मीरनीरश्रीरम्यया भुवा ॥ ३२ ॥**

अन्वयः–सः मुदा कुमारं आलिंग्य बाल अर्क रश्मि काश्मीर नीर श्री रम्यया भुवा पत्तनाय निनाय. ॥ ३२ ॥

अर्थः—पछी ते यक्ष हर्षथी कुमारने भेटीने, उगता सूर्यनां किरणसरखां केसरना जलनी शोभाथी मनोहर थयेली जमीनपरथी नगरमां लेइ गयो. ॥ ३२ ॥

**प्रत्यध्वपौरगौराङ्गीदृक्तामरसतोरणे । कुमारमुत्सवेनाथ नृपः प्रावीविशत्पुरे ॥ ३३ ॥**

अन्वयः–अथ नृपः प्रति अध्व पौर गौर अंगी दृक् तामरस तोरणे पुरे उत्सवेन कुमारं प्रावीविशत्. ॥ ३३ ॥

अर्थः—पछी राजाए मार्गे मार्गे नगरनी स्त्रीओनी आंखोरूपी कमलोना तोरणोवाळां नगरमां महोत्सवपूर्वक ते विक्रमकुमारने प्रवेश कराव्यो. ॥ ३३ ॥

**कालेन केनचिद्राज्यभारमारोप्य विक्रमे । जगाम नामशेषत्वमेष भूपालपुङ्गवः ॥ ३४ ॥**

अन्वयः—केनचित् कालेन एषः भूपालपुंगवः विक्रमे राज्य भारं आरोप्य नाम शेषत्वं जगाम. ॥ ३४ ॥

अर्थ —पछी केटलेक काले ते राजा ते विक्रमकुमारने राज्यनो भार सोंपीने पंचत्व पाम्यो. ॥ ३४ ॥

**कुर्वन्ननित्यताध्यानसुधासिन्धूर्मिमज्जनम् । पितृशोकाग्निजं तापममुञ्चद्विक्रमो नृपः ॥ ३५ ॥**

अन्वयः–विक्रमः नृपः अनित्यता ध्यान सुधा सिंधु ऊर्मि मज्जनं कुर्वन् पितृ शोक अग्निजं तापं अमुंचत्. ॥ ३५ ॥

अर्थः—पछी ते विक्रमराजाए अनित्यपणाना ध्यानरूपी अमृतसागरना मोजांओमां स्नान करतांथकां पिताना शोकरूपी अग्निथी उत्पन्न थयेला तापने शांत कर्यो. ॥ ३५ ॥

**विवेकं पितृशोकाग्निविशेषविशदं ततः । हृदलंकरणं चक्रे निष्कवद्विक्रमो नृपः ॥ ३६ ॥**

अन्वयः—ततः विक्रमः नृपः निष्कवत् पितृ शोक अग्नि विशेष विशदं विवेकं हृद् अलंकरणं चक्रे. ॥ ३६ ॥

अर्थः—पछी ते विक्रमराजाए सुवर्णनीपेठे, पिताना शोकरूपी प्रबल अग्निथी निर्मल थयेला विवेकने पोताना हृदयमां आभूषणनीपेठे धारण कर्यो. ॥ ३६ ॥

न्यायकल्पद्रुमारामच्छायामध्ये निवेश्य भूः । तेनाभूष्यत सर्वाङ्गमर्हद्गृहविभूषणैः ॥ ३७ ॥

अन्वयः–तेन न्याय कल्प द्रुम आराम च्छायामध्ये निवेश्य भूः सर्व अंगं अर्हद् गृह विभूषणैः अभूष्यत. ॥ ३७ ॥

अर्थः—पछी तेणे न्यायरूपी कल्पवृक्षोना बगीचानी छायामां बेसीने, पृथ्वीने सर्व बाजुएथी तीर्थंकर प्रभुना मंदिरोरूपी आभूषणोवडे शणगारी. ॥ ३७ ॥

सप्तव्यसननिर्मुक्तममुक्तसुकृतोद्यमम् । अभूद्भूपेऽत्र भूपीठं राजन्ते राजवत्प्रजाः ॥ ३८ ॥

अन्वयः–अत्र भूपे भू पीठं सप्त व्यसन निर्मुक्तं, अमुक्त सुकृत उद्यमं अभूत्, प्रजाः राजवत् राजंते. ॥ ३८ ॥

अर्थः—आ राजा राज्य करते छते पृथ्वीतळ साते व्यसनोथी रहित थयुं अने पुण्यसंबंधी उद्यमवाळुं थयुं, केमके प्रजा पण राजासरखीज तेजवाळी थाय छे. ॥ ३८ ॥

आगात्तद्देशभङ्गाय कलिङ्गाधिपतिर्यमः । कदाप्याकस्मिकापातः संनिपात इवोत्कटः ॥ ३९ ॥

अन्वयः–कदापि उत्कटः संनिपातः इव, कलिंग अधिपतिः यमः आकस्मिक आपातः तत् देशभंगाय आगात्. ॥ ३९ ॥

अर्थः–पछी एक दिवसे विकट संनिपातनीपेठे कलिंगदेशनो राजा यम, अचानक हल्लापूर्वक तेना देशनो विनाश करवामाटे आव्यो.

दूरं देवस्य कस्यापि प्रभावादद्भुतौजसा । हरिः स हरिणेनेवाचक्रमे तेन विक्रमः ॥ ४० ॥

अन्वयः—हरिणेन हरिः इव अद्भुत ओजसा तेज कस्य अपि देवस्य प्रभावात् सः विक्रमः आचक्रमे. ॥ ४० ॥

अर्थः—पछी हरिण जेम इंद्रपर आक्रमण करे, तेम अति बळवडे करीने तेणे कोइक देवना माहात्म्यथी ते विक्रमराजापर हल्लो कर्यो. ॥ ४० ॥

**शूरमण्डलतेजांसि दूरयन्सैन्यरेणुभिः । विक्रमोऽथ धरित्रीन्दुरभ्यमित्रीणतां गतः ॥ ४१ ॥**

अन्वयः—अथ सैन्य रेणुभिः शूर मंडल तेजांसि दूरयन धरित्री इंदुः विक्रमः अभ्यमित्रीणतां गतः. ॥ ४१ ॥

अर्थः—त्यारे सैन्यनी रजथी सूर्यमंडलना तेजने पण आच्छादित करतोथको ते विक्रमराजा पण तेनी सामे थयो. ॥ ४१ ॥

**यमविक्रमयोर्जाग्रदुग्रविक्रमकर्मणोः । तयोः प्रववृते वीरसिंहसंहरणो रणः ॥ ४२ ॥**

अन्वयः—जाग्रत् उग्र विक्रम कर्मणोः तयोः यमविक्रमयोः वीर सिंह संहरणः रणः प्रववृते. ॥ ४२ ॥

अर्थः—प्रगट थता प्रचंड पराक्रमवाळा एवा ते यम तथा विक्रमराजावच्चे शूरवीरोरूपी सिंहोनो विनाश करनारो रणसंग्राम थवा लाग्यो. ॥ ४२ ॥

**जातदेवानुभावौजःसंक्रमो विक्रमं यमः । जितोत्कटचमूकोटिर्विकटे संकटेऽनयत् ॥ ४३ ॥**

अन्वयः—जात देव अनुभाव ओजः संक्रमः, जित उत्कट चमू कोटिः यमः विक्रमं विकटे संकटे अनयत्. ॥ ४३ ॥

अर्थः—देवना प्रभावथी जेनामां तेजनुं संक्रमण थयेलुं छे एवा, तथा जीतेल छे विकट सैन्यनी कोटि जेणे एवा ते यमराजाए

त विक्रमराजाने अतिसंकटमां नाख्या. ॥ ४३ ॥

**पादान्ते ढौकणीकृत्य कृतदोःसंयमं यमम् । स्मृतिमात्रागतो यक्षस्तदा विक्रममैक्षत ॥ ४४ ॥**

अन्वयः–तदा स्मृति मात्र आगतः यक्षः, कृतदोः संयमं यमं पाद अंते ढौकणीकृत्य विक्रमं ऐक्षत. ॥ ४४ ॥

अर्थः—ते वखते फक्त याद करवाथीज आवी पहोंचेलो ते धनंजययक्ष हाथ बांधेला ते यमराजाने पगपासे भेट धरीने विक्रमराजाने जइ मळ्यो. ॥ ४४ ॥

**हीनोद्यमं दीनमुखं विद्विषं वीक्ष्य विक्रमः । बन्धादुन्मोच्य देशायादिदेशाढ्यकृपाशयः ॥ ४५ ॥**

अन्वयः–हीन उद्यमं, दीन मुखं विद्विषं वीक्ष्य, आढ्य कृपा आशयः विक्रमः बंधात् उन्मोच्य देशाय आदिदेश. ॥ ४५ ॥

अर्थः–(कंइ पण) उद्यमविनाना अने दीनमुखवाळा ते शत्रुने जोइने उल्लसेली दयाना आशयवाळा ते विक्रमराजाए तेने बंधनरहित करावीने तेना देशमां जवानी आज्ञा आपी. ॥ ४५ ॥

**मानयित्वा च नत्वा च यक्षमक्षीणसौहृदम् । अनुज्ञाय निवासय स्वपुरायाचलन्नृपः ॥ ४६ ॥**

अन्वयः–च अक्षीण सौहृदं यक्षं मानयित्वा च नत्वा निवासाय अनुज्ञाय नृपः स्वपुराय अचलत्. ॥ ४६ ॥

अर्थः—पछी गाढ मित्राइवाळा ते यक्षने सन्मान करीने, नमीने तथा तेने स्थाने जवानी रजा आपी ते राजा पोताना नगरतरफ चाल्यो. ॥ ४६ ॥

पुर्यां मङ्गलशृङ्गारहृद्यायां हृदयेऽविशत् । प्रतोलीदृक्पथेनाथ भूनाथः कीर्तिभूषणः ॥ ४७ ॥

अन्वयः–अथ कीर्ति भूषणः भूनाथः मंगल शृंगार हृद्यायाः पुर्याः हृदये प्रतोली दृक् पथेन अविशत्. ॥ ४७ ॥

अर्थः–पछी कीर्तिरूपी आभूषणवाळो ते राजा मंगलिक अने शणगारथी मनोहर थयेली ते नगरीना मध्यमां दरवाजारूपी दृष्टिने मार्गे दाखल थयो. ॥ ४७ ॥

तस्मिन्राजनि राजन्तः पौराः सौराज्यसंपदा । महोत्सवैर्दिवो देवान्धरामानिन्यिरेऽन्वहम् ॥ ४८ ॥

अन्वयः–तस्मिन् राजनि सौराज्य संपदा राजंतः पौराः महोत्सवैः अन्वहं देवान् दिवः धरां आनिन्यिरे. ॥ ४८ ॥

अर्थः—ते राजा राज्य करते छते स्वराज्यनी समृद्धिथी शोभता नागरिको महोत्सवोथी हमेशां देवोने देवलोकमांथी पृथ्वीपर लाववा लाग्या. ॥ ४८ ॥

व्रजन्भूपोऽन्यदा बाह्यावनीं वाह्यालिकेलये । किमप्योकः क्षणक्षीवास्तोकलोकमलोकत ॥ ४९ ॥

अन्वयः—अन्यदा वाह्य आलि केलये बाह्य अवनीं व्रजन् भूपः, क्षण क्षीव अस्तोक लोकं किं अपि ओकः अलोकत. ॥४९॥

अर्थः—एक दिवसे घोडाओनी श्रेणिने खेलाववामाटे बहारनी भूमिपर जता ते राजाए महोत्सवमां लीन थयेला घणां मनुष्योथी भरेलुं कोइक घर जोयुं. ॥ ४९ ॥

वाहयित्वा हयान्भूपो वलमानस्तदैव सः । अमन्दाक्रन्दसंदर्भगर्भमैक्षत मन्दिरम् ॥ ५० ॥

अन्वयः—हयान् वाहयित्वा तदैव वलमानः स भूपः मंदिरं अमंद आक्रंद संदर्भ गर्भ ऐक्षत. ॥ ५० ॥

अर्थः—(पछी) घोडाओ खेलावीने तेज वखते पाछा वळेला ते विक्रमराजाए (तेज) घर अति विलापना उछाळावाळुं जोयुं.

**विस्मयव्याकुलेनैको नरः पार्श्वचरस्ततः । पृष्टस्तत्कारणं राज्ञा विज्ञायेति व्यजिज्ञपत् ॥ ५१ ॥**

अन्वयः—ततः विस्मय व्याकुलेन राज्ञा एकः पार्श्वचरः नरः तत् कारणं पृष्टः, विज्ञाय इति व्यजिज्ञपत्. ॥ ५१ ॥

अर्थः—पछी आश्चर्यथी व्याकुल थयेला ते राजाए नजीकमां जनारा कोइक पुरुषने तेनुं कारण पूछवाथी तपास करीने तेणे कह्युं के, ॥ ५१ ॥

**स्वामिन्नेतद्गृहेशस्य महेभ्यस्य गतेऽहनि । अपुत्रकस्य पुत्रोऽभूदन्धस्येव दृगुद्गमः ॥ ५२ ॥**

अन्वयः—(हे) स्वामिन्! गते अहनि एतद् गृह ईशस्य अपुत्रकस्य महेभ्यस्य, अंधस्य दृग् उद्गमः इव पुत्रः अभूत्.

अर्थः—हे! स्वामी! गइ काले आ घरना पुत्र रहीत मालीक एवा एक म्होटा शेठने त्यां, अंधने आंखो प्रगट थवानीपेठे, पुत्रनो जन्म थयो हतो. ॥ ५२ ॥

**इदानीमेव वाह्यालिविलासगमनक्षणे । तन्निमित्तभवोऽदर्शि देवेनेह महोत्सवः ॥ ५३ ॥**

अन्वयः—इदानीं एव वाह्य आलि विलास गमन क्षणे, देवेन इह तन्निमित्त भवः महोत्सवः अदर्शि. ॥ ५३ ॥

अर्थः—हमणाज घोडाओनी श्रेणिने खेलाववा जती वेळाए आपे आ घरमां ते पुत्रजन्मना निमित्तथी महोत्सव थतो जोयो हतो.

**अधुनैव पुनर्दैवयोगतः स मृतः शिशुः । तद्वियोगार्तिमार्गेण तत्पिताति तमन्वगात् ॥ ५४ ॥**

अन्वयः-पुनः अधुना एव दैव योगतः सः शिशुः मृतः, तत् वियोग अर्ति मार्गेण तत् पिता अपि तं अन्वगात्. ॥ ५४ ॥

अर्थः—परंतु हमणाज दैवयोगे ते बाळक मरण पाम्यो छे, अने तेना वियोगनी पीडाने मार्गे तेनो पिता पण तेनी पाछळ गयो छे, (अर्थात् मरण पाम्यो छे.) ॥ ५४ ॥

**तत्कुटुम्बजनः सर्वः पुत्रजन्मोत्सवागतः । प्रत्युत द्विगुणे दुःखे पतितो रारटीत्ययम् ॥ ५५ ॥**

अन्वयः-पुत्र जन्म उत्सव आगतः सर्वः अयं तत्कुटुंब जनः प्रत्युत द्विगुणे दुःखे पतितः रारटीति. ॥ ५५ ॥

अर्थः—पुत्रना जन्मोत्सवमाटे आवेला आ सघळा तेना कुटुंबी लोको उलटा बेवडा दुःखमां पडी विलाप करी रह्या छे. ॥५५॥

**भवनाटककौटिल्यादथोत्कण्टकविग्रहः । अव्याकुलचलच्चेताः क्षितिनेता व्यचिन्तयत् ॥ ५६ ॥**

अन्वयः—अथ भव नाटक कौटिल्यात् उत्कंटक विग्रहः, अव्याकुल चलत् चेताः क्षिति नेता व्यचिंतयत्. ॥ ५६ ॥

अर्थः—हवे आवा संसारनाटकनी मायाथी रोमांचित शरीरवाळो, तथा व्याकुलतारहित चपळ हृदयवाळो ते राजा विचारवा लाग्यो के, ॥ ५६ ॥

**विदामप्यपरिच्छेद्या संसारस्य विचित्रता । जनोऽयं चिन्तयत्युच्चैरन्यदन्यच्च जायते ॥ ५७ ॥**

अन्वयः-संसारस्य विचित्रता विदां अपि अपरिच्छेद्या, अयं जनः उच्चैः अन्यत् चिंतयति, च अन्यत् जायते. ॥ ५७ ॥

अर्थः–संसारनुं विचित्रपणुं विद्वानो पण न जाणी शके तेवुं छे, केमके आ लोको होंसथी चिंतवे छे बीजुं, अने थाय छे तेथी बीजुं.

**सुखाय च्छायामायाति ग्रीष्मतापातुरस्तरोः । नरस्तत्कोटरस्थेन दश्यते हा महाहिना ॥ ५८ ॥**

अन्वयः–ग्रीष्म ताप आतुरः नरः सुखाय तरोः छायां आयाति, हा! तत् कोटरस्थेन महाहिना दश्यते. ॥ ५८ ॥

अर्थः—उनाळाना तापथी व्याकुल थयेलो माणस शांति मेळववामाटे वृक्षनी छायामां आवे छे, परंतु अरेरे! एवामां तेना बिलमां रहेलो महान सर्प तेने दंशे छे. ॥ ५८ ॥

**वहत्यहो नरः शस्त्रं रिपोर्दारणकारणं । कदाचिदेष तेनैव दैवात्तेनैव हन्यते ॥ ५९ ॥**

अन्वयः—अहो! नरः रिपोः दारण कारणं शस्त्रं वहति, कदाचित् एषः दैवात् तेन एव तेन एव हन्यते. ॥ ५९ ॥

अर्थः–अहो! मनुष्य शत्रुने विदारवाना कारणरूप शस्त्रने धारण करे छे, परंतु कोइक दिवसे ते पोते दैवयोगे तेज शस्त्रवडे तेज शत्रुथी हणाय छे. ॥ ५९ ॥

**मनोरथानुरूपं यत्फलमाप्नोति कश्चन । महाविडम्बनाजालक्षेपविश्वासकं हि तत् ॥ ६० ॥**

अन्वयः—कश्चन मनोरथ अनुरूपं फलं यत् आप्नोति, तत् हि महा विडंबना जाल क्षेप विश्वासकं. ॥ ६० ॥

अर्थः—कोइक मनुष्य (पोताना) मनोरथमुजब जे अनुकूल फल पामे छे, ते खरेखर तेने महोटी आपदाओना समूहमां नाखवामाटे विश्वास उपजाववारूप होय छे. ॥ ६० ॥

एकान्तदुःखदे लोको विरज्य मयि मुक्तये । मा धावत्विति संसारो दत्ते सुखकणानपि ॥ ६१ ॥

अन्वयः-एकांत दुःखदे मयि विरज्य लोकः मुक्तये मा धावतु ? इति संसारः सुख कणान् अपि दत्ते. ॥ ६१ ॥

अर्थः—फक्त एकलुं दुःखज आपनारा एवा मारामते विरक्त थइने लोको मोक्षमाटे न दोडे तो ठीक, एम विचारीने आ संसार तेओने सुखनो लेश पण आपे छे. ॥ ६१ ॥

या संसारसुखावाप्तिर्दुरन्तैव नरस्य सा । मत्स्यस्य गलिकायन्त्रनियुक्तकवलोपमा ॥ ६२ ॥

अन्वयः-नरस्य या संसार सुख अवाप्तिः, सा मत्स्यस्य गलिका यंत्र नियुक्त कवल उपमा दुरंता एव. ॥ ६२ ॥

अर्थः—मनुष्यने संसारमां जे सुखनी प्राप्ति थाय छे, ते मत्स्योने पकडवाना यंत्रमां मूकेला कोळीयानीपेठे (अथवा मत्स्यगलागलन्यायनीपेठे) परिणामे दुःखदाइज छे. ॥ ६२ ॥

अयं जनो मनो लोलं कथं नु कथयत्यदः । भवभावेषु यद्वज्रलेपेनेव नियन्त्रितम् ॥ ६३ ॥

अन्वयः—वज्र लेपेन इव भव भावेषु यत् नियंत्रितं, अदः मनः अयं जनः लोलं नु कथं कथयति ? ॥ ६३ ॥

अर्थः-जाणे वज्रलेपथी चोडयुं होय नही ! तेम सांसारिक भावोमां जे चीटकी बेठेलुं छे, एवां पण मनने लोको चपल ते केम कहेता हशे ? ॥ ६३ ॥

अलोकव्योम्नि ये लोकव्योम क्षेप्तुं क्षमा जिनाः । तदाश्रयबलाच्चित्तं कृषामि भवभावतः ॥ ६४ ॥

अन्वयः-ये जिनाः लोक व्योम अलोक व्योम्नि क्षेप्तुं क्षमाः, तत् आश्रय बलात् चित्तं भव भावतः कृषामि. ॥ ६४ ॥

अर्थः—जे तीर्थंकरो लोकाकाशने अलोकाकाशमां फेंकी देवाने समर्थ छे, तेमनी सहायना बलथी (हुं मारां) मनने आ सांसारिक भावमांथी (जालमांथी) खेंची कहाडुं. ॥ ६४ ॥

**इति ध्यायन्ययौ धाम त्वरितं नृपविक्रमः । चन्द्रसेनं सुतं राज्ये न्यस्य तस्थौ व्रतोत्सुकः ॥ ६५ ॥**

अन्वयः-इति ध्यायन् नृप विक्रमः त्वरितं धाम ययौ, चंद्रसेनं सुतं राज्ये न्यस्य व्रत उत्सुकः तस्थौ. ॥ ६५ ॥

अर्थः—एम विचारतो एवो ते विक्रमराजा तुरत पोताने स्थानके गयो, तथा (पोताना) चंद्रसेन नामना पुत्रने राज्यपर स्थापन करीने (पोते) चारित्र लेवाने उत्कंठित थइने रह्यो. ॥ ६५ ॥

**ज्ञानविज्ञाततद्भावः स्वभावकरुणाकरः । सद्गुरुः केवली काले तत्र तत्पुरमासदत् ॥ ६६ ॥**

अन्वयः-ज्ञान विज्ञात तद्भावः, स्वभाव करुणाकरः केवली सद्गुरुः तत्र काले तत् पुरं आसदत्. ॥ ६६ ॥

अर्थः-ज्ञानथी जाणेल छे तेना हृदयनो भाव जेमणे, तथा स्वभावथीज दया लावनारा, केवलज्ञानी सद्गुरु ते समये ते नगरपासे (उद्यानमां) पधार्या. ।। ६६ ॥

**तद्वार्तावादिनं दानैरानन्द्योद्यानपालकम् । विक्रमः प्रमदस्मेरो जगामाराममुत्सुकः ॥ ६७॥**

अन्वयः—तद् वार्ता वादिनं उद्यान पालकं दानैः आनंद्य प्रमद स्मेरः विक्रमः उत्सुकः आरामं जगाम. ॥ ६७ ॥

अर्थः-ते समाचार कहेनारा उद्यानपालने दानथी खुशी करीने हर्षथी प्रफुल्लित थयेलो ते विक्रमराजा उत्कंठित थइने ते उद्यानमां गयो. ॥ ६७ ॥

**सोऽथ प्रदक्षिणीचक्रे गुरुं कर्मेन्धनानलम् । चिरानुरागसंबद्धां श्रद्धां परिणयन्निव ॥ ६८ ॥**

अन्वयः—अथ सः चिर अनुराग संबद्धां श्रद्धां परिणयन् इव, कर्म इंधन अनलं गुरुं प्रदक्षिणीचक्रे. ॥ ६८ ॥

अर्थः—पछी ते घणा काळना प्रेमथी संबंधमां आणेली श्रद्धाने जाणे परणतो होय नही! तेम तेणे कर्मोरूपी काष्टोने बाळवामां अग्निसरखा ते गुरुमहाराजनी प्रदक्षिणा करी. ॥ ६८ ॥

**नत्वा गुरुं धराजानिर्यथायुक्तमथासनम् । भेजे रेजे च तद्वाणीवृष्टिसंपातचातकः ॥ ६९ ॥**

अन्वयः-अथ धरा जानिः गुरुं नत्वा यथायुक्तं आसनं भेजे, च तत् वाणी वृष्टि संपात चातकः रेजे. ॥ ६९ ॥

अर्थः—पछी ते राजा गुरुमहाराजने नमीने योग्य आसनपर बेठो, तथा तेमनी वाणीरूपी (अमृतनी) वृष्टिने चातकपक्षीनीपेठे (पीतोथको) शोभवा लाग्यो. ॥ ६९ ॥

**अथ व्रतार्थमभ्यर्थ्य यतीशं जगतीपतिः । प्रभावनार्थं तीर्थस्य जगाम नगरं पुनः ॥ ७० ॥**

अन्वयः—अथ जगती पतिः व्रतार्थं यति ईशं अभ्यर्थ्य तीर्थस्य प्रभावनार्थं पुनः नगरं जगाम. ॥ ७० ॥

अर्थः-पछी ते राजा दीक्षा लेवामाटे ते मुनिराजने प्रार्थना करीने शासननी उन्नति करवामाटे पाछो नगरमां गयो. ॥ ७० ॥

धनंजयाख्ययक्षेशकृतसान्निध्यबन्धुरः । सुरासुरचमत्कारकरोदारमहोत्सवः ॥ ७१ ॥
प्रभावनाभिर्यक्षेन्द्रकृताभिः सुकृताब्धिभिः । वैधर्मिकैरपि स्तुत्यं जनयञ्जिनशासनम् ॥ ७२ ॥
पुराद्गुरुमगाद्भूपः सिद्धिलोभनरूपभाक् । भेजे भवशिरःशूलं मूलं ज्ञानतरोर्व्रतम् ॥ ७३ ॥

अन्वयः—(अथ) धनंजय आख्य यक्ष ईश कृत सान्निध्य बंधुरः, सुर असुर चमत्कार कर उदार महोत्सवः, ॥ ७१ ॥ यक्ष इंद्र कृताभिः, सुकृत अब्धिभिः प्रभावनाभिः, वैधर्मिकैः अपि स्तुत्यं जिन शासनं जनयन्, ॥ ७२ ॥ सिद्धि लोभन रूप भाक् भूपः पुरात् गुरुं अगात्, भव शिरः शूलं, ज्ञान तरोः मूलं व्रतं भेजे. ॥ ७३ ॥ त्रिभिर्विशेषकं ॥

अर्थः-पछी धनंजय नामना यक्षेंद्रे करेली सहायथी मनोहर थयेलो, तथा देवो अने दानवोने पण आश्चर्य उपजावनारा उत्तम महोत्सववाळो, ॥ ७१ ॥ अने यक्षेंद्रे करेली, पुण्यना महासागरसरखी प्रभावनाथी अन्यदर्शनीओने पण प्रशंसवालायक जिनशासनने करतो थको, ॥ ७२ ॥ मुक्तिने ललचावनारां रूपवाळो ते विक्रमराजा नगरमांथी गुरुमहाराज पासे गयो, (अने) संसारना मस्तकमां शूल उपजावनारुं, तथा ज्ञानरूपी वृक्षना मूलसरखुं चारित्र तेणे अंगीकार कर्युं. ॥ ७३ ॥ त्रिभिर्विशेषकं ॥

नृचन्द्रे चन्द्रसेनेऽथ नत्वा नगरगामिनि । विजहार महीं राजमहर्षिर्गुरुभिः सह ॥७४॥

अन्वयः-अथ नृ चंद्रे चंद्रसेने नत्वा नगरगामिनि राज महर्षिः गुरुभिः सह महीं विजहार. ॥ ७४ ॥

अर्थः–पछी मनुष्योमां चंद्रसरखो ते चंद्रसेन राजा (तेमने) वांदीने नगरमां गया बाद ते विक्रमराजमहर्षि गुरुमहाराजनी साथे पृथ्वीपर विहार करवा लाग्या. ॥ ७४ ॥

**श्रद्धाशुद्धतपाः शुद्धसिद्धान्तपठनक्रमः । बोधयित्वा धरां ज्ञानी स परं पदमासदत् ॥ ७५ ॥**

अन्वयः–श्रद्धा शुद्ध तपाः, शुद्ध सिद्धांत पठन क्रमः, सः ज्ञानी धरां बोधयित्वा परं पदं आसदत्. ॥ ७५ ॥

अर्थः–श्रद्धापूर्वक शुद्ध तप करनारा, तथा निर्मलपणे आगमोना अभ्यासक्रमवाळा ते विक्रमराजर्षि केवलज्ञान पामी, पृथ्वीपर लोकोने प्रतिबोध पमाडी मोक्षे गया. ॥ ७५ ॥

**इति तत्त्वेन सम्यक्त्वं सेव्यं विक्रमवत्ततः । जनो येन भवत्याशु लोकद्वयभयव्ययः ॥ ७६ ॥**

अन्वयः—ततः इति तत्त्वेन विक्रमवत् सम्यक्त्वं सेव्यं, येन जनः आशु लोक द्वय भय व्ययः भवति. ॥ ७६ ॥

अर्थः—माटे एरीते तत्वज्ञानपूर्वक विक्रमराजर्षिनीपेठे सम्यक्त्व सेववुं, के जेथी तुरत बन्ने लोकना भयथी मुक्त थवाय छे.

**पापध्वान्तभिदस्तस्य सम्यक्त्वस्य रवेरिव । राशिवद्द्वादशश्राद्धव्रतान्याभोगवृत्तये ॥ ७७ ॥**

अन्वयः—पाप ध्वांत भिदः रवेः इव तस्य सम्यक्त्वस्य राशिवत् आभोगवृत्तये द्वादश श्राद्ध व्रतानि. ॥ ७७ ॥

अर्थः—पापोरूपी अंधकारनो नाश करनारा सूर्यसरखा ते समकीतनी राशिओसरखा भोगववामाटेनां श्रावकना बारव्रतो छे.

निरागस्त्रसहिंसाङ्गपीडारक्षणलक्षणम् । प्रथमं तेष्वहिंसाख्यं श्राद्धानां स्यादणुव्रतम् ॥ ७८ ॥

अन्वयः—तेषु प्रथमं निरागः त्रस हिंसा अंग पीडा रक्षण लक्षणं अहिंसा आख्यं श्रावकाणां अणुव्रतं स्यात्. ॥ ७८ ॥

अर्थः—तेओमां पहेलुं निरपराधी त्रस जीवोनी हिंसा न करवारूप, तथा तेओनां शरीरने पीडा न उपजाववारूप अहिंसानामनुं श्रावकोनुं पेहेलुं व्रत होय छे. ॥ ७८ ॥

सुकृताम्भोजहंसीयमहिंसैवातिनिर्मला । भवमोक्षजलक्षीरविवेकाय निषेव्यते ॥ ७९ ॥

अन्वयः–सुकृत अंभोज हंसी, अति निर्मला इयं अहिंसा एव भव मोक्ष जल क्षीर विवेकाय निषेव्यते. ॥ ७९ ॥

अर्थः—पुण्यरूपी कमलने (शोभावनारी) हंसीसरखी, अने अतिनिर्मल एवी आ अहिंसा एटले दयाज संसार अने मोक्षरूपी जल तथा दूधने जूदा करवामाटे सेवाय छे. ॥ ७९ ॥

भूस्वर्गभोगसौख्यश्रीसोपानश्रेणिशालिनो । अहिंसा नाम निःश्रेणिर्निःश्रेयसगमावधिः ॥ ८० ॥

अन्वयः–भू स्वर्ग भोग सौख्य श्री सोपान श्रेणि शालिनी, निःश्रेयस गम अवधिः अहिंसानाम निःश्रेणिः. ॥ ८० ॥

अर्थः—पृथ्वी अने स्वर्गना भोगोनी सुखलक्ष्मीरूपी पगथीयांओनी श्रेणिथी शोभती, अने छेक मोक्षसुधी उपर चडावनारी दयानामनी निःश्रेणी छे. ॥ ८० ॥

हिंसा निरन्तरं दुःखमहिंसा तु परं सुखम् । जन्तोर्ददात्यहो सूरचन्द्रयोरिव तद्यथा ॥ ८१ ॥

अन्वयः—अहो! हिंसा निरंतरं दुःखं, अहिंसा तु परं सुखं सूर चंद्रयोः इव जंतोः ददाति, तत् यथा ॥ ८१ ॥

अर्थः—अहो! हिंसा हमेशां दुःखने, तथा अहिंसा परम सुखने सूर अने चंद्रनीपेठे प्राणीने आपे छे, तेओनुं उदाहरण नीचे-मुजब छे. ॥ ८१ ॥

**अस्ति रूपेण संपत्त्या सुकृतोपचयेन च । पुरन्दरपुराल्लब्धजयं जयपुरं पुरम् ॥ ८२ ॥**

अन्वयः—रूपेण, संपत्त्या, च सुकृत उपचयेन पुरंदर पुरात् लब्ध जयं जयपुरं पुरं अस्ति. ॥ ८२ ॥

अर्थः—(लोकोनां) रूप, समृद्धि तथा पुण्यना समूहवडे करीने, इंद्रना नगरपासेथी पण जेणे जय मेळवेलो छे, एवुं जयपुर-नामनुं नगर छे. ॥ ८२ ॥

**अभूद् भूपः श्रियां पात्रं तत्र शत्रुञ्जयाह्वयः । यद्यशःक्षीरधिर्वैरिदुर्यशःशैवलाद्बभौ ॥ ८३ ॥**

अन्वयः—तत्र श्रियां पात्रं शत्रुंजय आह्वयः भूपः अभूत्, यत् यशः क्षीरधिः वैरि दुर्यशः शैवलात् बभौ. ॥ ८३ ॥

अर्थः—ते नगरमां लक्ष्मीना भाजनरूप शत्रुंजयनामनो राजा हतो, के जेनो यशरूपी महासागर वैरिओना अपयशरूपी शेवा-ळथी शोभतो हतो. ॥ ८३ ॥

**तन्दनौ सूरचन्द्राख्यौ तस्याभूतां मतौ सताम् । सूरचन्द्राविवोन्निद्रानन्दं कर्तुमिदं जगत् ॥ ८४ ॥**

अन्वयः—इदं जगत् उन्निद्र आनंदं कर्तुं सूरचंद्रौ इव, सतां मतौ तस्य सूरचंद्र आख्यौ नदनौ अभूतां. ॥ ८४ ॥

अर्थः—आ जगतने प्रगटरीते आनंद करवाने सूर्य अने चंद्रसरखा, अने सज्जनोने माननीक एवा, ते राजाने सूर अने चंद्र नामना बे पुत्रो हता. ॥ ८४ ॥

**ज्येष्ठे श्रेष्ठगुणभ्रान्त्या बिभ्राणः स्नेहविभ्रमम् । स तस्मै सूनवे राजा युवराजपदं ददौ ॥ ८५ ॥**

अन्वयः—ज्येष्ठे श्रेष्ठ गुण भ्रांत्या स्नेह विभ्रमं बिभ्राणः सः राजा तस्मै सूनवे युवराज पदं ददौ. ॥ ८५ ॥

अर्थः—म्होटामां उत्तम गुणो होय, एवी भ्रमणाथी तेपर स्नेहविलासने धारण करनारा ते शत्रुंजयराजाए ते सूरनामना पुत्रने युवराजनी पदवी आपी. ॥ ८५ ॥

**चन्द्रस्य तु महीन्द्रेण न वृत्तिरपि निर्ममे । ततः स चिन्तयामास स्वावासशयनो निशि ॥८६ ॥**

अन्वयः—चंद्रस्य तु महींद्रेण वृत्तिः अपि न निर्ममे, ततः स्व आवास शयनः सः निशि चिंतयामास. ॥ ८६ ॥

अर्थः—चंद्रनामना ते न्हाना पुत्रनी तो राजाए कंई आजीविका पण करी आपी नही, तेथी पोताना आवासमां सूतो सूतो ते रात्रिए विचारवा लाग्यो के, ॥ ८६ ॥

**सूरोऽद्य विदधे राज्ञा युवराजः स्वयं मुदा । न पत्तिरप्यहं वृत्त्या पितुर्मोहः कियानहो ॥ ८७ ॥**

अन्वयः—राज्ञा स्वयं अद्य मुदा सूरः युवराजः विदधे, अहं वृत्त्या पत्तिः अपि न, अहो ! पितुः कियान् मोहः ! ॥ ८७ ॥

अर्थः—राजाए पोते आजे हर्षथी सूरने तो युवराज बनाव्यो, अने मने आजीविकाजेटलुं आपी पालो पण न बनाव्यो! अहो! पिताजीनी केटली गेरसमज छे? ॥ ८७ ॥

**पराभूतस्य तद्राज्ञा स्थातुं मेऽत्र न युज्यते । कलभः किं वसेद्यूथे यूथेशेनापमानितः ॥ ८८ ॥**

अन्वयः–तत् राज्ञा पराभूतस्य मे अत्र स्थातुं न युज्यते, यूथ ईशेन अपमानितः कलभः किं यूथे वसेत्? ॥ ८८ ॥

अर्थः—माटे राजाए तिरस्कारेला एवा मारे अहीं रहेवुं लायक नथी, केमके यूथनायकथी अपमान पामेलो युवान हाथी शुं पछी ते यूथमां रहे छे? ॥ ८८ ॥

**एवं विचिन्त्य निस्तन्द्रश्चन्द्रः सान्द्रपराभवः । अचलद्गलितस्नेहः स्वगेहान्निश्यलक्षितः ॥ ८९ ॥**

अन्वयः–एवं विचिन्त्य सांद्र पराभवः चंद्रः, गलित स्नेहः निशि अलक्षितः स्वगेहात् निस्तंद्रः अचलत्. ॥ ८९ ॥

अर्थः–एम विचारीने अत्यंत दुभायेलो ते चंद्रकुमार (कुटुंबप्रते) स्नेहरहित थइने रात्रिए कोइने जणाव्याविना छुपीरीते पोताने घेरथी सावधान थयोथको चाली निकळ्यो. ॥ ८९ ॥

**चित्तावेशहृतक्लेशः स्वदेशत्यागरागभृत् । कुमारः सुकुमारोऽपि दूरे देशान्तरेऽविशत् ॥ ९० ॥**

अन्वयः–चित्त आवेश हृत क्लेशः, स्व देश त्याग रागभृत्, कुमारः सुकुमारः अपि दूरे देशांतरे अविशत्. ॥ ९० ॥

अर्थः—हृदयना उत्साहथी दूर थयेल छे क्लेश जेनो, अने पोताना देशनो त्याग करवामां आनंद मानतो, एवो ते चंद्रकुमार सुकुमाल छतां पण दूर देशांतरमां दाखल थयो. ॥ ९० ॥

**रत्नपत्तनमित्यत्र पत्तनं विद्यतेऽद्‌भुतम् । तदुद्यानसमीपेऽस्थाच्चन्द्रः श्रान्तस्तरोस्तले ॥ ९१ ॥**

अन्वयः-अत्र रत्नपत्तनं इति अद्‌भुतं पत्तनं विद्यते, तत् उद्यान समीपे तरोः तले श्रांतः चंद्रः अस्थात्. ॥ ९१ ॥

अर्थः-हवे अहीं रत्नपत्तन नामनुं अद्‌भुत नगर छे, तेना उद्यानपासे आवेला एक वृक्षनी नीचे थाकी गयेलो ते चंद्रकुमार बेठो.

**श्रुतिपेयं स्वरं श्रुत्वा ततस्तदनुसारतः । विशन्नाराममद्राक्षीच्चन्द्रः साधुं सुदर्शनम् ॥ ९२ ॥**

अन्वयः—ततः श्रुति पेयं स्वरं श्रुत्वा, तत् अनुसारतः आरामं विशन् चंद्रः सुदर्शनं साधुं अद्राक्षीत्. ॥ ९२ ॥

अर्थः-पछी कर्णमां सांभळवालायक ध्वनि सांभळीने, तेने अनुसारे ते उद्यानमां दाखल थतां ते चंद्रे सुदर्शननामना मुनिने जोया.

**सभागर्भावनौ नत्वा तत्त्वार्थादेशकं मुनिम् । तन्मुखादिति शुश्राव स धर्मं भावपावनः ॥ ९३ ॥**

अन्वयः-सभा गर्भ अवनौ तत्त्व अर्थ आदेशकं मुनिं नत्वा, तद् मुखात् भाव पावनः सः इति धर्मं शुश्राव. ॥ ९३ ॥

अर्थः:—सभानी वचली भूमिमां ( बेसीने ) तत्वार्थनो उपदेश देता ते मुनिराजने नमीने, तेमना मुखथी पवित्र भाववाळो ते चंद्रकुमार नीचेमुजब धर्मदेशना सांभळवा लाग्यो. ॥ ९३ ॥

सापराधा अपि प्रायो गेहिभिः पुण्यदेहिभिः । न हन्तव्यास्त्रसास्तावत्किं पुनस्ते निरागसः ॥ ९४ ॥

अन्वयः—पुण्य देहिभिः गेहिभिः तावत् स अपराधाः अपि त्रसाः न हंतव्याः, ते निरागसः पुनः किं ? ॥ ९४ ॥

अर्थः—पवित्र शरीरवाळा गृहस्थोए तो अपराधी त्रस जीवोने पण हणवा जोइये नही, त्यारे तेवा निरपराधी जीवोमाटे तो कहेवुंज शुं ? ॥ ९४ ॥

इत्यादिदेशनां कर्णदेशनान्दीं निशम्य सः । प्रपद्य करुणामेवं स्वगिरा प्रत्यपद्यत ॥ ९५ ॥

अन्वयः-कर्ण देशनांदीं इत्यादि देशनां निशम्य सः करुणां प्रपद्य, इति स्वगिरा प्रत्यपद्यत. ॥ ९५ ॥

अर्थः—(पोताना) कर्णभागने आनंद आपनारी इत्यादि देशना सांभळीने ते चंद्रे जीवदयाने स्वीकारीने पोताना वचनथी नीचे मुजब अंगीकार कर्युं. ॥ ९५ ॥

मयापराधिनोऽप्युच्चैरुपरोधेऽपि च प्रभोः । जन्तवो हन्त हन्तव्या नान्यतः शौर्यवृत्तितः ॥ ९६ ॥

अन्वयः-मया उच्चैः अपराधिनः अपि, प्रभोः उपरोधे अपि हंत अन्यतः शौर्य वृत्तितः जंतवः न हंतव्याः. ॥ ९६ ॥

अर्थः—मारे म्होटा अपराधी जीवोने पण, स्वामिनो आग्रह छतां पण, तेम बीजी कोइ सुभटवृत्तिथी पण, अरेरे ! जीवोने मारवा नही. ॥ ९६ ॥

इत्यात्तनिश्चयश्चन्द्रो नत्वा सत्त्वगुरुर्गुरून् । पुरे तत्रैव धात्रीशं जयसेनमसेवत ॥ ९७ ॥

अन्वयः-इति आत्त निश्चयः, सत्त्व गुरुः चंद्रः गुरून् नत्वा तत्रैव पुरे जयसेनं धात्री ईशं असेवत. ॥ ९७ ॥

अर्थः—एरीते निश्चय करीने महापराक्रमी ते चंद्रकुमार ते गुरुमहाराजने वांदीने तेज नगरमां ( त्यांना ) जयसेन नामना राजानी सेवा करवा लाग्यो. ॥ ९७ ॥

**शौचसत्यौचितीदाक्ष्यदाक्षिण्यादिभिरद्भुतैः । निजैः सेवागुणैरेवाभवद्भर्तुरयं प्रियः ॥ ९८ ॥**

अन्वयः—शौच सत्य औचिती दाक्ष्य दाक्षिण्य आदिभिः अद्भुतैः निजैः सेवा गुणैः एव अयं भर्तुः प्रियः अभवत्. ॥ ९८ ॥

अर्थः—पवित्रता, सत्य, उचितता, चतुराइ तथा दाक्षिणता आदिक पोताना अद्भुत सेवागुणोथी ते राजाने प्रिय थइ पड्यो ९८

**निवेश्य रहसि प्रेमहसितस्नपिताधरः । लपति स्म पतिः शुद्धविवेकममुमेकदा ॥ ९९ ॥**

अन्वयः-एकदा प्रेमहसित स्नपित अधरः पतिः शुद्ध विवेकं अमुं रहसि निवेश्य लपतिस्म. ॥ ९९ ॥

अर्थः-एक दिवसे प्रेमवाळां हास्यथी स्नान करावेलछे होठोने जेणे एवा ते राजाए निर्मल विवेकवाळा ते चंद्रकुमारने एकांते बेसाडी कह्युं के, ॥ ९९ ॥

**अपीन्द्रसमरे धीरा वीराः क्षीराभकीर्तयः । ये सन्ति मे तृणानीव त्वद्दृष्टिस्तानपीक्षते ॥ २०० ॥**

अन्वयः-इंद्र समरे अपि ये मे क्षीर आभ कीर्तयः धीराः वीराः संति, तान् अपि त्वत् दृष्टिः तृणानि इव ईक्षते. ॥ २०० ॥

अर्थः—इंद्रसाथेना युद्धमां पण जे मारा दुधसरखी उज्जवल कीर्तिवाळा धैर्यवंत सुभटो छे, तेओने पण तारी दृष्टि तणखलांनी पेठे जोइ रही छे. ॥ २०० ॥

**क्रियाकथितनिःशेषगुणस्य तव पोरुषम् । दृष्टिर्दिशत्यसौ धैर्थरसार्णवनवाब्जिनो ॥ १ ॥**

अन्वयः—क्रिया कथित निःशेष गुणस्य तव धैर्य रस अर्णव नव अब्जिनी असौ दृष्टिः पौरुषं दिशति. ॥ १ ॥

अर्थः–कार्यथी कही आपेल छे सर्व गुणो जेणे एवो जे तुं, तेनी धैर्यरूपी रसना महासागरमां नवी कमलिनी सरखी आ दृष्टि पराक्रमने सूचवी रही छे. ॥ १ ॥

**तद्वीरवारकोटीर वैरिशल्यं मम स्खलत् । तूर्णमाकर्ष हृदयादुदयादपि रोपितम् ॥ २ ॥**

अन्वयः–तत् (हे) वीर वार कोटीर ! रोपितं स्खलत् वैरि शल्यं हृदयात् उदयात् अपि तूर्णं आकर्ष? ॥ २ ॥

अर्थः—माटे हे शूरवीर शिरोमणि! दाखल थवाथी खूंचता एवा शत्रुरूपी शल्यने ( मारा ) हृदयमांथी उगतुंज तुं तुरत ( जड-मूळथी ) खेंची कहाड ? ॥ २ ॥

**अन्यायमदिराकुम्भः कुम्भ इत्युग्रशुम्भनः । मन्न्यायवृक्षकरटी चरटीभूय वल्गति ॥ ३ ॥**

अन्वयः–अन्याय मदिरा कुम्भः, उग्र शुंभनः, मत् न्याय वृक्ष करटी कुंभः इति चरटीभूय वल्गति. ॥ ३ ॥

अर्थः—अन्यायरूपी मद्यना घडासरखो, भयंकर विनाशवाळो, तथा मारा न्यायरूपी वृक्षने उखेडी नाखवाने हाथीसरखो कुंभ-

नामनो मनुष्य धाडपाडु थइने उन्मत्तपणे कुचा करे छे. ॥ ३ ॥

**स्त्रीश्च गाश्च हरत्येष क्रूरो हन्ति यतीनपि । चमूरुद्धो यमस्यापि दुर्गमं दुर्गमञ्चति ॥ ४ ॥**

अन्वयः–एषः क्रूरः स्त्रीः, च गाः च हरति, यतीन् अपि हंति, चमू रुद्धः यमस्य अपि दुर्गमं दुर्गं अंचति. ॥ ४ ॥

अर्थः—ते दुष्ट कुंभो स्त्रीओ तथा गायोने हरी जाय छे, मुनिओने पण मारी नाखे छे, अने ज्यारे तेने सैन्यथी रोकवामां आवे छे, त्यारे ते यमराजाने पण दुर्गम एवा किल्लामां भराइ बेसे छे. ॥ ४ ॥

**तत्तद्दुर्गं महादुर्गवल्गनो वल्गुविक्रमः । गुप्तं प्रविश्य तं सुप्तं मत्प्रमोदाय दारय ॥ ५ ॥**

अन्वयः—तत् मत् प्रमोदाय महादुर्ग वल्गनः, वल्गु विक्रमः, तत् दुर्गं गुप्तं प्रविश्य तं सुप्तं दारय ? ॥ ५ ॥

अर्थः—माटे मने खुशी करवामाटे अति विकट स्फुर्तिवाळो, तथा मनोहर पराक्रमवाळो एवो तुं ते किल्लामां गुप्तरीते प्रवेश करीने तेने सूतो चीरी नाख ? ॥ ५ ॥

**इत्यात्तवाचि भूपे गां चन्द्रोऽमुञ्चत्सुधामयीम् । प्रारब्धतीर्थकृद्धर्ममहासागरजागराम् ॥ ६ ॥**

अन्वयः—भूपे इति आत्त वाचि चंद्रः, प्रारब्ध तीर्थकृत् धर्म महासागर जागरां सुधामयीं गां अमुंचत्. ॥ ६ ॥

अर्थः–राजाए एम कहेवाथी ते चंद्रकुमार तीर्थंकर प्रभुना धर्मरूपी महासागरमांथी उछळेली अमृतमय वाणी बोलवा लाग्यो के–

हन्तुं जन्तूनयुद्धेषु प्रत्याख्यानं प्रभो मम । युद्धेष्वपि परित्रस्तानस्तानन्दान्निरायुधान् ॥ ७ ॥

अन्वय:—(हे) प्रभो ! अयुद्धेषु जंतून् हंतुं मम प्रत्याख्यानं, युद्धेषु अपि परित्रस्तान्, अस्त आनंदान्, निरायुधान्. ॥ ७ ॥

अर्थः–हे स्वामी ! युद्ध नही करनारा प्राणीओने हणवानां मारे पच्चखखाण छे, तेम युद्धमां पण भयभीत थइ नाशता, उत्साहरहित थयेला अने शस्त्रविनाना जीवोने पण ( हणवानां मारे पच्चखखाण छे. ) ॥ ७ ॥

इत्यस्य निश्चयं शौर्यमयं धर्ममयं च सः । नृपो मत्वा मनश्चक्रे मदसंमदयोः पदम् ॥ ८ ॥

अन्वय:—इति अस्य शौर्यमयं च धर्ममयं निश्चयं मत्वा सः नृपः मनः मद संमदयोः पदं चक्रे. ॥ ८ ॥

अर्थः–एवीरीतनो तेनो शौर्यपणानो तथा धर्मनो निश्चय जाणीने ते राजाए पोतानां हृदयने अभिमान तथा हर्षना स्थानरूप कर्यु.

अध्यक्षमङ्गरक्षाणामग्रण्यं मन्त्रिणामपि । सर्वेश्वरं च तं चक्रे क्रमात्प्रीतः क्षमापतिः ॥ ९ ॥

अन्वयः–क्रमात् प्रीतः क्षमापतिः तं अंगरक्षाणां अध्यक्षं, मंत्रिणां अपि अग्रण्यं, च सर्व ईश्वरं चक्रे. ॥ ९ ॥

अर्थः—अनुक्रमे खुशी थयेला राजाए तेने अंगरक्षकोनो स्वामी, मंत्रीओनो पण अग्रेसर अने सर्वनो स्वामी बनाव्यो. ॥ ९ ॥

पापव्यापारपारीणो रीणातुलचमूकुलः । विवेश देशं संरम्भी स कुम्भचरटोऽन्यदा ॥ १० ॥

अन्वय:—अन्यदा पाप व्यापार पारीणः, रीण अतुल चमू कुलः, सः संरंभी कुंभ चरटः देशं विवेश. ॥ १० ॥

अर्थः—( एवामां ) एक दिवसे पाप कार्योनो पारंगामी, तथा अतुल्य सैन्यना समूहने हरावनारो ते उद्धत कुंभनामनो धाडपाडु ( ते राजाना ) देशमां दाखल थयो. ॥ १० ॥

**सारवीरचयश्चन्द्रस्तद्वधाय दधाव च । अमार्गत्वरितैः सैन्यैर्दुर्गमार्गान् रुरोध च ॥ ११ ॥**

अन्वयः—सार वीर चयः चंद्रः तत् वधाय दधाव, च अमार्ग त्वरितैः सैन्यैः च दुर्ग मार्गान् रुरोध. ॥ ११ ॥

अर्थः—शूरवीर सुभटोना समूहने ( साथे लेइने ) ते कुंभाने मारवामाटे चंद्रकुमार दोड्यो, तथा मुख्य मार्गने तजीने अवळे मार्गे वेगथी दोडता सैन्योथी तेणे ( तेना ) किल्लाना मार्गने रोकी दीधो. ॥ ११ ॥

**पलायमानमुन्निद्ररौद्रचन्द्रचमूभयात् । तं रुरोध पुरोद्धर्षसहर्षसुभटोत्करः ॥ १२ ॥**

अन्वयः—उन्निद्र रौद्र चंद्र चमू भयात् पलायमानं तं पुरा उद्धर्ष सहर्ष सुभट उत्करः रुरोध. ॥ १२ ॥

अर्थः—ते चंद्रकुमारनां सावधान तथा भयंकर लश्करना भयथी नाशता एवा ते कुंभाधाडपाडुने अगाडीना भागमां तैयार उभेला आनंदित सुभटोना समूहे घेरी लीधो. ॥ १२ ॥

**पुरतः पार्श्वतः पश्चान्मिलद्भिः स बलैरभूत् । वनेभः सर्वदिग्धावद्दवानल इवाकुलः ॥ १३ ॥**

अन्वयः—पुरतः, पार्श्वतः, पश्चात् मिलद्भिः बलैः सः सर्व दिक् धावत् दवानले वन इभः इव आकुलः अभूत्. ॥ १३ ॥

अर्थः—तेथीं आगळ, पडखेथी अने पाछळथी एकटां थयेलां लश्करवडे ते सर्व दिशाएथी दोडी आवता दावानलमां घेराइ गयेला हाथीनीपेठे व्याकुल थयो. ॥ १३ ॥

**सेनासु तासु चरटो झञ्झासु करटो यथा । कथंचिज्जीवनोपायकणिकामप्यनाप्नुवन् ॥ १४ ॥**
**न शौर्यवह्निलेशोऽपि मय्यस्तीति दिशन्निव । सनिःश्वासमुखन्यस्ततृणश्चन्द्राग्रतोऽलुठत् ॥ १५॥ युग्मं ॥**

अन्वयः–झंझासु यथा करटः, तासु सेनासु ( सः ) चरटः कथंचित् जीवन उपाय कणिकां अपि अनाप्नुवन्, ॥ १४ ॥ मयि शौर्य वह्नि लेशः अपि न अस्ति, इति दिशन् इव, सनिःश्वासं मुखन्यस्त तृणः चंद्र अग्रतः अलुठत्. ॥ १५ ॥ युग्मं ॥

अर्थः—झंझावायुथी घेरायेला कागडानीपेठे, ते सैन्योथी घेरायेलो ते कुंभोचोर, कोइ पण रीते जीववाना उपायनो लेश पण नही मळवाथी, ॥ १४ ॥ हवे मारामां शूरवीरतारूपी अग्निनो लेश पण नथी, एम जाणे जणावतो होय नही ! तेम निःश्वाससहित मुखमां घास राखीने ते चंद्रकुमारपासे लोटवा लाग्यो. ॥ १५ ॥ युग्मं ॥

**प्रसन्नहृदयः स्फीतदयस्तदयमुग्रयशाः । हृष्यद्रोमालिमालिङ्गत्कुंभमुत्थाप्य भूपभूः ॥ १६ ॥**

अन्वयः–तत् प्रसन्न हृदयः, स्फीत दयः, उग्रयशाः, अयं भूपभूः, हृष्यत् रोम आलिं कुंभं उत्थाप्य आलिंगत्. ॥ १६ ॥

अर्थः–तेथी आनंदित हृदयवाळो, विस्तीर्ण दयावाळो, तथा फेलावो पामता यशवाळो ते चंद्रराजकुमार, हर्षित रोमश्रेणिवाळा ते कुंभाने उठाडीने आलिंगन देवा लाग्यो. ॥ १६ ॥

तदादि स्फुरदादित्यमहसं बहुसंमदः । चन्द्रं नृपोऽधिकं मेने पुत्रतोऽपि स्वतोऽपि च ॥ १७ ॥

अन्वयः–तदादि बहु संमदः नृपः, स्फुरत् आदित्य महसं चंद्रं पुत्रतः अपि, च स्वतः अपि, अधिकं मेने. ॥ १७ ॥

अर्थः—त्यारथी मांडीने अत्यंत खुशी थयेलो ते राजा जाज्वल्यमान सूर्य सरखा तेजवाळा ते चंद्रकुमारने पुत्रथी तथा पोताथी पण अधिक मानवा लाग्यो. ॥ १७ ॥

चन्द्राग्रभूरतृप्तस्तु यौवराज्यश्रियापि सः । राज्याय सूरः क्रूरात्मा दधौ पितृवधे धियम् ॥ १८ ॥

अन्वयः–तु क्रूर आत्मा चंद्र अग्र भूः सः सूरः, यौवराज्य श्रिया अपि अतृप्तः, राज्याय पितृ वधे धियं दधौ. ॥ १८ ॥

अर्थः—हवे क्रूर हृदयवाळो चंद्रनो म्होटो भाइ ते सूरकुमार, युवराजनी पदवीथी पण असंतुष्ट थइने राज्य मेळववा माटे (पोताना) पिताने मारी नाखवानी बुद्धि धरवा लाग्यो. ॥ १८ ॥

निशीथे निशितास्त्रौघो दूरं वञ्चितयामिकः । उन्मार्गैः सौधमाविष्टः कालादिष्टः फणीव सः ॥ १९ ॥

अन्वयः–निशित अस्त्र ओघः, दूरं वंचित यामिकः सः काल आदिष्टः फणी इव, निशीथे उन्मार्गैः सौधं आविष्टः. ॥ १९ ॥

अर्थः–सजेलां शस्त्रोना समूहवाळो ते सूरकुमार पेहेरेगीरोने अत्यंत ठगीने, यमराजाए हुकम करेला सर्पनीपेठे मध्यरात्रिए छींडीने मार्गे राजमेहेलमां दाखल थयो. ॥ १९ ॥

**ततः पराङ्मुखं सुप्तं तीव्रेणास्त्रेण भूपतिम् । स जघान घनं लोभः शोभते मूलमंहसाम् ॥ २० ॥**

अन्वयः—ततः पराङ्मुखं सुप्तं भूपतिं सः तीव्रेण अस्त्रेण जघान, घनं लोभः अंहसां मूलं शोभते. ॥ २० ॥

अर्थः—पछी उलटे मुखे सुतेला राजाने तेणे तीक्ष्णशस्त्रथी घायल कर्यो, अति लोभ ए पापोनुं मूळ छे. ॥ २० ॥

**ततस्त्रसन्नसौ देव्या दृष्टः संमुखसुप्तया । घात्येष याति घात्येष यातीति पूत्कृतो रवः ॥ २१ ॥**

अन्वयः—ततः त्रसन् असौ संमुख सुप्तया देव्या दृष्टः, एषः घाती याति, एषः घाती याति, इति रवः पूत्कृतः. ॥ २१ ॥

अर्थः—पछी ( त्यांथी ) नाशता एवा ते सूरकुमारने सामे सूतेली राणीए जोयो, ( अने तेथी ) आ खूनी नाशी जाय छे, आ खूनी नाशी जाय छे, एम तेणीए पोकार कर्यो. ॥ २१ ॥

**धावत्सु द्वारपालेषु भूपालेनेत्यभाषि च । कश्चायं घातक इति ज्ञातव्यो मैष हन्यताम् ॥ २२ ॥**

अन्वयः—च द्वारपालेषु धावत्सु भूपालेन इति अभाषि, अयं घातकः कः ? इति ज्ञातव्यः, एषः मा हन्यतां ? ॥ २२ ॥

अर्थः—पछी पेहेरेगीरो ज्यारे तेने पकडवाने दोडवा लाग्या, त्यारे राजाए कह्युं के आ खूनी कोण छे ? तेने ओळखवो छे, माटे हाल तेने मारशो नही. ॥ २२ ॥

**तनुजं मनुजस्वामी तं विज्ञाय विकारिणं । यूथाद्विनष्टं दासेरमिव देशान्निरासयत् ॥ २३ ॥**

अन्वयः—तं तनुजं विकारिणं विज्ञाय मनुज स्वामी, विनष्टं दासेरं यूथात् इव, देशात् निरासयत्. ॥ २३ ॥

अर्थः—पछी ते पुत्रने खूनी जाणीने राजाए उद्धत थयेला उंटने जेम टोळांमांथी कहाडी मेले, तेम तेने देशमांथी कहाडी मेल्यो.

**त्वरवत्तुरगारूढैः स क्रमेलकमेलकैः । प्रधानपुंभिर्भूचन्द्रः सुतं चन्द्रमथाह्वयत् ॥ २४ ॥**

अन्वयः—अथ सः भूचंद्रः क्रमेलकमेलकैः त्वरवत् तुरग आरूढैः प्रधान पुंभिः चंद्रं सुतं आह्वयत्. ॥ २४ ॥

अर्थः—पछी ते राजाए उंटने पण पकडी पाडे एवा वेगवंत घोडाओपर स्वार थयेला मंत्रीओ मारफत ( पोताना ) ते चंद्रनामना पुत्रने बोलाव्यो. ॥ २४ ॥

**जयसेनमथापृछ्य समायातस्तथास्थितम् । पितरं प्रेक्ष्य चन्द्रोऽभूदास्पदं हर्षदुःखयोः ॥ २५ ॥**

अन्व :—अथ जयसेनं आपृछ्य समायातः चंद्रः तथा स्थितं पितरं प्रेक्ष्य हर्ष दुःखयोः आस्पदं अभूत. ॥ २५ ॥

अर्थः—पछी ते जयसेन राजानी रजा लेइने आवेलो ते चंद्रकुमार तेवी हालतवाळा पिताने जोइने हर्ष तथा दुःखना स्थानरूप थयो.

**निवेश्य तं सुतं राज्ये राजा तद्घातपीडया । सूरे समत्सरो मृत्वा द्वीपी क्वापि नगेऽभवत् ॥ २६ ॥**

अन्वयः—तं सुतं राज्ये निवेश्य, सूरे समत्सरः राजा तद् घात पीडया मृत्वा क्व अपि नगे द्वीपी अभवत्. ॥ २६ ॥

अर्थः—पछी ते चंद्रकुमारने राज्यपर बेसाडीने, ते सूरकुमारपर वैर राखतोथको ते राजा ते घानी वेदनाथी मृत्यु पामीने कोइक पर्वतपर दीपडो थयो. ॥ २६ ॥

**कलङ्कपङ्किलः सोऽपि सूरो जीवन्कुकर्मभिः । चरन्देशान्तराण्याप वनं तद्द्वीपिदीपितम् ॥ २७ ॥**

अन्वयः–कलंक पंकिलः सः सूरः अपि कुकर्मभिः जीवन्, देशांतराणि चरन् तद् द्वीपि दीपितं वनं आप. ॥ २७ ॥

अर्थः—कलंकथी मलीन थयेलो ते सूरकुमार पण कुकर्मोवडे जीवतो थको देशांतरोमां भटकतो ते दीपडाथी भयंकर थयेला वनमां आवी चड्यो. ॥ २७ ॥

**पलायमानस्तत्रायमंहःसंहृतपौरुषः । जघ्ने प्राग्वैरवैरस्यात्कोपिना द्वीपिनामुना ॥ २८ ॥**

अन्वयः–अंहः संहृत पौरुषः अयं पलायमानः प्राग् वैर वैरस्यात् अमुना कोपिना द्वीपिना तत्र जघ्ने. ॥ २८ ॥

अर्थः–पापथी नष्ट थयेला बलवाळो ते जेवामां ( त्यांथी) नाशवा लाग्यो, तेवामां पूर्वना वैरना द्वेषथी ते क्रोधातुर थयेला दीपडाए त्यांज तेने मारी नाख्यो. ॥ २८ ॥

**स सूरजीवस्तत्रैव वने यातः किरातताम् । पापर्द्धिवर्धितारम्भस्तेनैव द्वीपिना हतः ॥ २९ ॥**

अन्वयः—सः सूर जीवः तत्र एव वने किराततां यातः, पापर्द्धि वर्धित आरंभः तेन एव द्वीपिना हतः ॥ २९॥

अर्थः–( पछी ) ते सूरकुमारनो जीव तेज वनमां भिल्लपणुं पाम्यो, त्यां शिकारथी वृद्धि पामेला पापवाळा एवा तेने तेज दीपडाए मारी नाख्यो. ॥ २९ ॥

**सोऽपि द्वीपी हतः कोपाटोपान्धैस्तस्य बन्धुभिः । तावभूतामुभौ शैलवने तत्रैव पोत्रिणौ ॥ ३० ॥**

अन्वयः–कोप आटोप अंधैः तस्य बंधुभिः सः द्वीपी अपि हतः, तौ उभौ तत्र एव शैलवने पोत्रिणौ अभूतां. ॥ ३० ॥

अर्थः–क्रोधना आवेशथी अंध थयेला तेना भाइओए ते दीपडाने पण मारी नाख्यो, पछी तेओ बन्ने तेज पर्वतना वनमां वराहो थया. ॥ ३० ॥

**तत्र त्रिवत्सरौ व्यक्तमत्सरौ तौ परस्परम् । संग्रामव्यसनव्यग्रावववधील्लुब्धकव्रजः ॥ ३१ ॥**

अन्वयः–तत्र त्रिवत्सरौ, व्यक्त मत्सरौ, परस्परं संग्राम व्यसन व्यग्रौ तौ लुब्धक व्रजः अवधीत्. ॥ ३१ ॥

अर्थः–त्यां त्रण वर्षोनी उमरवाळा, प्रगटपणे द्वेष राखनारा, अने परस्पर लडवाना व्यसनमां आसक्त थयेला, एवा तेओ बन्नेने शिकारीओनी टोळीए मारी नाख्या. ॥ ३१ ॥

**ततोऽन्यतो वने क्वापि मृगावभवतामुभौ । तथैव प्रथितद्वेषसमरौ शबरोऽवधीत् ॥ ३२ ॥**

अन्वयः—ततः क्व अपि अन्यतः वने उभौ मृगौ अभवतां, तथा एव प्रथित द्वेष समरौ शबरः अवधीत्. ॥ ३२ ॥

अर्थः-पछी कोइक बीजा वनमां तेओ बन्ने हरिणो थया, तथा तेवीज रीते द्वेषथी लडी मरता एवा तेओ बन्नेने ( कोइएक ) भिल्ले मारी नाख्या. ॥ ३२ ॥

**गजपोतावथैकस्मिन्गजयूथे बभूवतुः । युध्यमानौ च तौ यूथभ्रष्टौ भिल्लगणोऽग्रहीत् ॥ ३३ ॥**

अन्वयः—अथ एकस्मिन् गज यूथे गज पोतौ बभूवतुः, च युध्यमानौ यूथ भ्रष्टौ तौ भिल्लगणः अग्रहीत्. ॥ ३३ ॥

अर्थः—पछी कोइ एक हाथीओना टोळांमां तेओ बन्ने हाथीना बच्चां थया, अने त्यां ( परस्पर ) लडताथका टोळांथी विखूटा पडी जवाथी तेओ बन्नेने भिल्लोनी टोळीए पकडी लीधा ॥ ३३ ॥

**तौ परम्परया चन्द्रनरेन्द्रालयमीयतुः । न्यषिध्येतां मुहुर्बद्धयुद्धावाधोरणैर्बलात् ॥ ३४ ॥**

अन्वयः—परंपरया तौ चंद्रनरेंद्र आलयं ईयतुः, मुहुः बद्ध युद्धौ आधोरणैः बलात् न्यषिध्येतां. ॥ ३४ ॥

अर्थः—अनुक्रमे तेओ बन्ने चंद्रराजाने वेर आव्या, त्यां वारंवार लडीमरता एवा तेओ बन्नेने महावतो बहु मुश्केलीथी मूकावता हता. ॥ ३४ ॥

**कदाचिदाययौ तत्र केवलालोकभासुरः । मुनिः सुदर्शनो नाम जिनदर्शनभास्करः ॥ ३५ ॥**

अन्वयः—कदाचित् तत्र केवल आलोक भासुरः, जिन दर्शन भास्करः सुदर्शनः नाम मुनिः आययौ. ॥ ३५ ॥

अर्थः—(एवामां) एक दिवसे त्यां केवलज्ञानरूपी प्रकाशथी तेजस्वी थयेला, जैनशासनमां सूर्यसरखा सुदर्शननामना मुनिराज पधार्या.

**मनोवृत्तीर्वहन्भक्तिगहनाः सह नागरैः । वनं ययौ मुनिं नन्तुकामः कामयिता भुवः ॥ ३६ ॥**

अन्वयः—भुवः कामयिता भक्ति गहनाः मनः वृत्तीः वहन्, नागरैः सह मुनिं नंतुकामः वनं ययौ. ॥ ३६ ॥

अर्थः—( ते वखते ) ते राजा भक्तिथी गंभीर मनोवृत्तिने धारण करतोथको नागरिकोनी साथे ते मुनिराजने वांदवानी इच्छाथी वनमां गयो. ॥ ३६ ॥

मुनिं नत्वाथ तत्त्वार्थवेदिनं मेदिनीपतिः । धर्मोपदेशपीयूषपूरं पातुमुपाविशत् ॥ ३७ ॥

अन्वयः—अथ तत्त्व अर्थ वेदिनं मुनिं नत्वा मेदिनी पतिः धर्म उपदेश पीयूष पूरं पातुं उपाविशत्. ॥ ३७ ॥

अर्थः—पछी तात्विक अर्थोने जाणनारा एवा ते मुनिने नमीने ते चंद्रराजा ( तेमनी ) धर्मदेशनारूपी अमृतनो समूह पीवाने बेठा.

व्याख्यान्तेऽथ नृपोऽपृच्छत्केवली च न्यवेदयत् । तयोर्वारणयोर्वैरकारणं दूरदारुणम् ॥ ३८ ॥

अन्वयः—अथ व्याख्या अंते नृपः अपृच्छत्, च केवली तयोः वारणयोः दूर दारुणं वैर कारणं न्यवेदयत्. ॥ ३८ ॥

अर्थः—पछी धर्मदेशनाने अंते राजाए पूछवाथी ते केवली भगवाने ते बन्ने हाथीओ वच्चेनुं अति भयंकर वैरनुं कारण जणावी दीधुं ॥ ३८ ॥

तच्चरित्रात्तसंवेगो भवोद्वेगेन वेगतः । प्रवव्राज स राजन्यः कृत्वा राजानमात्मजम् ॥ ३९ ॥

अन्वयः-तत् चरित्र आत्त संवेगः सः राजन्यः वेगतः भव उद्वेगेन आत्मजं राजानं कृत्वा प्रवव्राज. ॥ ३९ ॥

अर्थः—तेओना वृत्तांतथी थयेलो छे वैराग्य जेने, एवा ते चंद्रराजाए एकदम संसारथी कंटाळीने, पोताना पुत्रने राजा करीने दीक्षा लीधी. ॥ ३९ ॥

विरराज स राजर्षिस्तपस्तपनतेजसा । ततोऽगाद्दिवमुद्दामसंमदामृतदीर्घिकाम् ॥ ४० ॥

अन्वयः—सः राजर्षिः तपः तपन तेजसा विरराज, ततः उद्दाम संमद अमृत दीर्घिकां दिवं अगात्. ॥ ४० ॥

अर्थः—पछी ते चंद्रराजर्षि तपरूपी सूर्यना तेजथी दीपवा लाग्या, अने त्यारपछी अति हर्षरूपी अमृतनी वाव सरखा देवलोकमां ते गया. ॥ ४० ॥

**विवर्धिष्णुविरोधोर्मिदुर्धरौ तौ तु सिन्धुरौ । आद्यं दुःखरसास्वादकरकं नरकं गतौ ॥ ४१ ॥**

अन्वयः—विवर्धिष्णु विरोध ऊर्मि दुर्धरौ तौ सिंधुरौ तु दुःख रस आस्वाद करकं आद्यं नरकं गतौ. ॥ ४१ ॥

अर्थः—विशेष प्रकारे वृद्धि पामता वैरना मोजांओथी उद्धत थयेला ते बन्ने हाथीओ तो, दुःखरसना स्वादना भाजन (कमंडलु) सरखी पेहेली नरकमां गया. ॥ ४१ ॥

**तदुद्वृत्तौ च तौ लब्धजन्मानौ पापयोनिषु । अनन्तभवसंतप्तात्मानौ संचरतोऽभितः ॥ ४२ ॥**

अन्वय—च तत् उद्वृत्तौ तौ पाप योनिषु लब्ध जन्मानौ अनंत भव संतप्त आत्मानौ अभितः संचरतः. ॥ ४२ ॥

अर्थः—पछी त्यांथी निकळीने तेओ बन्ने दुष्ट योनिओमां जन्म लेइने, अनंता भवोमां दुःखो सहन करताथका चोतरफ भ्रमण करवा लाग्या. ॥ ४२ ॥

**चन्द्रजीवस्तु स स्तुत्यं भुक्त्वा स्वर्गसुखं चिरम् । लब्ध्वा शुद्धमनुष्यत्वं स्वामी सिद्धिश्रियोऽभवत् ४३**

अन्वयः— चंद्र जीवः तु स्तुत्यं स्वर्ग सुखं चिरं भुक्त्वा, शुद्ध मनुष्यत्वं लब्ध्वा सिद्धि श्रियः स्वामी अभवत्. ॥ ४३ ॥

अर्थः—ते चंद्रराजर्षिनो जीव तो प्रशंसनीय स्वर्गसुखने घणा काळसुधी भोगवीने, निर्मल मनुष्यभव पामी मोक्षलक्ष्मीनो मालीक थयो

अमुं दृष्टान्तमाकर्ण्य मुक्तिसंप्राप्तिकारणम् । अहिंसासेवकैर्भाव्यमिच्छद्भिः शिवमात्मनः ॥ ४४ ॥

अन्वयः—मुक्ति संप्राप्ति कारणं अमुं दृष्टांतं आकर्ण्य आत्मनः शिवं इच्छद्भिः अहिंसा सेवकैः भाव्यं. ॥ ४४ ॥

अर्थः—मोक्षनी प्राप्तिना कारणरूप, एवुं आ दृष्टांत सांभळीने पोतानुं हित इच्छनारा प्राणीओए अहिंसाव्रतने सेवनारा थवुं.

पयोवाह इवाहिंसावल्लिपल्लवनक्षमः । मृषावादविरागस्तु सतां भवदवच्छिदे ॥ ४५ ॥

अन्वयः—पयोवाहः इव अहिंसा वल्लि पल्लवन क्षमः, मृषावाद विरागः तु सतां भव दव च्छिदे. ॥ ४५ ॥

अर्थः—मेघनीपेठे जीवदयारूपी वेलडीने नवपल्लव करवामां समर्थ, एवो मृषावादनो त्याग खरेखर सज्जनोना संसाररूपी दावानलनो विनाश करनारो थाय छे. ॥ ४५ ॥

अणुव्रतं द्वितीयं तद्वाच्यं यत्क्वापि नानृतम् । भूकन्यागोधनन्यासकूटसाक्ष्ये विशेषतः ॥ ४६ ॥

अन्वयः—यत् क्व अपि अनृतं न वाच्यं, तत् द्वितीयं अणुव्रतं, भूकन्या गो धन न्यास कूट साक्ष्ये विशेषतः. ॥ ४६ ॥

अर्थः—जे क्यांये पण असत्य न बोलवुं, तेने बीजुं अणुव्रत जाणवुं, अने तेमां पण भूमि, कन्या, गाय, धननी थापण, अने असत्य साक्षीना संबंधमां तो विशेषे करीने असत्य न बोलवुं. ॥ ४६ ॥

जन्तूनामहितं यत्तन्न वाच्यं सत्यमप्यहो । सुधीभिर्वाक्प्रपञ्चेन बोधनीयोऽत्र पृच्छकः ॥ ४७ ॥

अन्वयः–यत् जंतूनां अहितं, तत् सत्यं अपि अहो ! न वाच्यं, अत्र सुधीभिः पृच्छकः वाक् प्रपंचेन बोधनीयः. ॥ ४७ ॥

अर्थः—जे प्राणीओने अहित करनारुं होय, तेवुं सत्य पण अहो ! न बोलवुं, ते वखते बुद्धिवानोए पूछनारने वचननी चतुराइथी समजाववो. ॥ ४७ ॥

**असत्यमपि निश्चित्य वाच्यं धर्महितं वचः । न सत्यमपि तत्साम्यमेति पुण्यचयश्रिया ॥ ४८ ॥**

अन्वयः–धर्म हितं निश्चित्य असत्यं अपि वचः वाच्यं, पुण्य चय श्रिया सत्यं अपि तत् साम्यं न एति. ॥ ४८ ॥

अर्थः—आ धर्मने हितकारी छे, एवो निश्चय करीने असत्य वचन पण बोलवुं, केमके तेमां पुण्यनो संचय थतो होवाथी सत्य पण तेनी बरोबरी करी शकतुं नथी. ॥ ४८ ॥

**ईदृक्सत्यगिरां वक्ता यथा राजपुरीपतिः । वैभवं बिभरामास हंसः संश्रूयतां तथा ॥ ४९ ॥**

अन्वयः–ईदृक् सत्य गिरां वक्ता राजपुरी पतिः हंसः यथा वैभवं बिभरामास, तथा संश्रूयतां ? ॥ ४९ ॥

अर्थः—आवी रीतनी सत्य वाणी बोलनारो राजपुरी नामनी नगरीनो स्वामी हंसराजा जे रीते समृद्धि पाम्यो, तेनुं वृत्तांत सांभळो ?

**अश्रान्तधर्मरचनः स सत्यवचनव्रतः । मासगम्ये वनीरम्ये रत्नशृङ्गाभिधे गिरौ ॥ ५० ॥**

**पूर्वजैः स्थापिते चैत्ये चैत्रीयात्रोत्सवे नृपः । चचालाल्पपरीवारो नन्तुं श्रीऋषभं जिनम् ॥ ५१ ॥**

अन्वयः-अश्रांत धर्म रचन, सत्य वचन व्रतः, सः नृपः, मासगम्ये वनी रम्ये रत्नशृंग अभिधे गिरौ, पूर्वजैः स्थापिते चैत्ये चैत्री यात्रा उत्सवे अल्पपरीवारः श्रीऋषभं जिनं नतुं चचाल. ॥ ५० ॥ ५१ ॥ युग्मं ॥

अर्थः—निरंतर धर्म करनारो, अने सत्य वचनना व्रतवाळो ते राजा, एक मासना पंथवाळा, तथा वनना समूहथी मनोहर रत्नशृंगनामना पर्वतपर पूर्वजोए बंधावेलां जिनमंदिरमां चैत्रीपुनेमनी यात्राना महोत्सवमां स्वल्पपरीवार सहित श्रीऋषभदेवप्रभुने वांदवामाटे चाल्यो. ॥ ५० ॥ ५१ ॥ युग्मं ॥

**अर्धवर्त्मनि तं यान्तं चरस्तारतरत्वरः । व्यग्रो व्यज्ञपयामास कश्चित्पश्चादुपागतः ॥ ५२ ॥**

अन्वयः—अर्ध वर्त्मनि यांतं तं, तारतर त्वरः, व्यग्रः कश्चित् पश्चात् उपागतः चरः व्यज्ञपयामास. ॥ ५२ ॥

अर्थः—एवामां अर्धे मार्गे जता एवा ते हंसराजाने अति उतावलथी आवेलो, अने व्याकुल थयेलो कोइक बातमीदार पाछळथी आवीने कहेवा लाग्यो के, ॥ ५२ ॥

**यात्रार्थं त्वयि निर्याते नरेश दशमेऽहनि । सीमालोऽर्जुनभूपालः त्वत्पुरीं शत्रुरापतत् ॥ ५३ ॥**

अन्वयः-हे नरेश ! त्वयि यात्रार्थं निर्याते, दशमे अहनि सीमालः शत्रुः अर्जुन भूपालः त्वत् पुरीं आपतत्. ॥ ५३ ॥

अर्थः— हे राजन् ? तमो यात्रा माटे निकळ्याबाद दशमे दिवसे सीमाडापर रहेतो ( आपनो ) शत्रु अर्जुननामनो राजा आपनी नगरीपर चडी आव्यो छे. ॥५३ ॥

निरस्य त्रस्यतः सर्वान्निहत्य विहितायुधान् । सभाण्डागारहस्त्यश्वं स राजगृहमग्रहीत् ॥ ५४ ॥

अन्वयः-त्रस्यतः निरस्य, विहित आयुधान् सर्वान् निहत्य सः सभांडागार हस्ति अश्वं राजगृहं अग्रहीत्. ॥ ५४ ॥

अर्थः-नाशता चोकीदारोने हांकी कहाडीने, तथा हथीयार लेइ सामे थनाराओने हणीने, ते राजाए भंडार तथा हाथ घोडा सहित राजमेहलनो कबजो लेइ लीधो छे. ॥ ५४ ॥

भयातुरं पुरं कृत्स्नमानन्द्याभयदानतः । स सिंहासनमासीनः सद्यः स्वाज्ञामदापयत् ॥ ५५ ॥

अन्वयः-भय आतुरं कृत्स्नं पुरं अभय दानतः आनंद्य सिंहासनं आसीनः सः स्व आज्ञां अदापयत्. ॥ ५५ ॥

अर्थः-वळी भयभीत थयेलां समस्त नगरने अभयदानथी आनंदित करीने राज्यगादीपर बेसीने तेणे पोतानी आज्ञा वर्तावी छे.

अन्यालयनिलीनेन श्रीसुमन्त्रेण मन्त्रिणा । अतस्त्वयि नियुक्तोऽहं युक्तं यत्तद्विधीयताम् ॥ ५६ ॥

अन्वयः—अतः अन्य आलय निलीनेन श्रीसुमंत्रेण मंत्रिणा अहं त्वयि नियुक्तः, यत् युक्तं तत् विधीयतां ? ॥ ५६ ॥

अर्थः—तेथी बीजाना घरमां छूपाइने रहेला श्रीसुमंत्रनामना ( आपना ) मंत्रीए मने आपनीपासे मोकल्यो छे, माटे ( हवे जेम आपने ) योग्य लागे तेम करो ? ॥ ५६ ॥

अथाब्रुवन्भ्रुवः क्षेपात्तं नृपं निकटा भटाः । वलामहे महेष्वास त्वत्पुरः कः स्फुरेत्परः ॥ ५७ ॥

अन्वयः–अथ भ्रुवः क्षेपात् निकटाः भटाः तं नृपं अब्रुवन्, हे! महेष्वास! वलामहे त्वत्पुरः कः परः स्फुरेत् ? ॥ ५७ ॥
अर्थः—पछी भ्रुकुटीना आक्षेपथी पासे रहेला सुभटो ते राजाने कहेवा लाग्या के, हे महान् धनुर्धर! आपणे (अहींथीज) पाछा वळीये, केमके आपनी पासे कयो शत्रु सामो आवे तेम छे. ? ॥ ५७ ॥

**तदाप्यकम्पितं दन्तद्युतिपुष्पैरुरोऽर्चयन् । अजातमुखमालिन्यस्तानभाषत भूपतिः ॥ ५८ ॥**

अन्वयः–तदा अपि अकंपितं उरः दंतद्युति पुष्पैः अर्चयन् भूपतिः अजात मुख मालिन्यः तान् अभाषत. ॥ ५८ ॥
अर्थः–आवे वखते पण (पोतानां) निश्चल हृदयने दांतोनी कांतिरूपी पुष्पोवडे पूजता एवा ते हंसराजाए मुखपर मळीनता लाव्याविना तेओने कह्युं के, ॥ ५८ ॥

**संपदो विपदोऽपि स्युः पूर्वकर्मवशंवदाः । मूढा मुदं विषादं वा तत्संपत्तिषु तन्वते ॥ ५९ ॥**

अन्वयः– संपदः विपदः अपि पूर्व कर्म वशंवदाः स्युः, मूढाः तत् संपत्तिषु मुदं वा विषादं तन्वते. ॥ ५९ ॥
अर्थः–संपत्ति अथवा विपत्ति पण पूर्वे करेलां कर्मोने अनुसारेज थाय छे, परंतु मूढ माणसोज तेनी प्राप्तिमाटे हर्ष अथवा खेद पामे छे.

**नेदानीं भाग्यलभ्याय युक्तं राज्याय धावनम् । भाग्यलभ्यं परित्यज्य जिनयात्रामहोद्यमम् ॥ ६० ॥**

अन्वयः—इदानीं भाग्य लभ्यं जिन यात्रा महोद्यमं परित्यज्य भाग्य लभ्याय राज्याय धावनं युक्तं न. ॥ ६० ॥
अर्थः–आ समये सद्भाग्योथी मळे एवी आ श्रीतीर्थंकरप्रभुनी यात्रानो प्रयत्न तजीने भाग्यथी मळी रहेनारां राज्यमाटे दोडवुं

( पाछा जवुं ) युक्त नथी. ॥ ६० ॥

**तद्यात्रामसमाप्यैनां न वले धवलेक्षणाः । विघ्नैः प्रारब्धसत्कर्मसंत्यागोऽधमचेष्टितम् ॥ ६१ ॥**

अन्वयः—तत् ( हे ) धवल ईक्षणाः ! एनां यात्रां असमाप्य न वले, विघ्नैः प्रारब्ध सत्कर्म संत्यागः अधम चेष्टितं. ॥ ६१ ॥

अर्थः—माटे हे निर्मल चक्षुवाळा सुभटो ! आ यात्रा पूरी कर्याविना हुं पाछो वळवानो नथी, केमके विघ्नोने लीधे प्रारंभेलां उत्तम कार्योनो जे त्याग करवो, ते अधमोनुं आचरण छे. ॥ ६१ ॥

**इत्युक्त्वा वाहयामास वाहवाहनमध्वनि । भूपतिः कम्पितक्रूरपातकादिचमूचयः ॥ ६२ ॥**

अन्वयः—इति उक्त्वा कंपित क्रूर पातक आदि चमूचयः भूपतिः अध्वनि वाह वाहनं वाहयामास. ॥ ६२ ॥

अर्थः—एम कहीने कंपावेल छे क्रूर पापो आदिकनी सेनानो समूह जेणे, एवो ते राजा (पोतानी) घोडागाडीने मार्गे चलाववा लाग्यो.

**परिवारजनेनाथ नाथभक्तिवियोगिना । स्वस्वमानुषवीक्षार्तिभाजा राजा व्यमुच्यत ॥ ६३ ॥**

अन्वयः—अथ नाथ भक्ति वियोगिना, स्वस्व मानुष वीक्षा अर्ति भाजा, परिवार जनेन राजा व्यमुच्यत. ॥ ६३ ॥

अर्थः—पछी स्वामिनी भक्ति करवामां कंटाळेला, तथा पोतपोताना स्वजनानी संभाळमाटे खेद पामेला, एवा तेना परिवारना लोकोए ( ते ) राजाने तजी दीधो, ॥ ६३ ॥

**यथा यथा स तैर्मुक्तो मुदं भेजे तथा तथा । त्रुटन्ति यात्राभाग्यस्य भागिनोऽमी क्रमादिति ॥ ६४ ॥**

अन्वयः—यथा यथा सः तैः मुक्तः, तथा तथा मुदं भेजे, यात्रा भाग्यस्य भागिनः अमी क्रमात् त्रुटंति इति. ॥ ६४ ॥

अर्थः—( ए रीते ) जेम जेम ते राजाने तेओ छोडी गया, तेम तेम ते आनंद पामवा लाग्यो, तथा यात्राना पुण्यना आ भागीदारो ओछा थाय छे, एम ते मानवा लाग्यो. ॥ ६४ ॥

**अथ च्छत्रभृतैकेन युक्तो मुक्तो जनैर्नृपः । कामप्यवापदेकाकी मार्गभ्रष्टो महाटवीम् ॥ ६५ ॥**

अन्वयः—अथ एकेन छत्रभृता युक्तः, जनैः मुक्तः एकाकी नृपः मार्ग भ्रष्टः कां अपि महाटवीं अवापत्. ॥ ६५ ॥

अर्थः—पछी फक्त एक छत्रधरथी युक्त थयेलो, तथा परिवारना मनुष्योए तजी दीधेलो ते एकलो राजा मार्ग चूकी जवाथी भयंकर जंगलमां जइ चड्यो. ॥ ६५ ॥

**चारुचीरवरेण्याश्वशुभाभरणवीक्षणात् । भूरिलोभेन मा भिल्लाः सानन्दाः खेदयन्तु माम् ॥ ६६ ॥**

**उत्तरीयमिति च्छत्रधरस्य परिधाय सः । यात्रैकधीर्दिशो वीक्ष्य प्राचलत्तीर्थदिङ्मुखः ॥ ६७ ॥ युग्मम् ॥**

अन्वयः—चारु चीर वरेण्य अश्व शुभ आभरण वीक्षणात् भूरि लोभेन स आनंदाः भिल्लाः मां मा खेदयंतु, ॥ ६६ ॥ इति छत्रधरस्य उत्तरीयं परिधाय यात्रा एक धीः सः दिशः वीक्ष्य तीर्थ दिङ् मुखः प्राचलत्. ॥ ६७ ॥ युग्मं ॥

अर्थः—मनोहर वस्त्र, उमदा घोडा, तथा सुंदर अलंकारो जोइने, अतिलोभना मार्या हर्ष पामेला भिल्लो मने हेरान न करे तो ठीक, ॥ ६६ ॥ एम विचारीने, ते छत्रधरनो ( सादो ) पोशाक पेहेरीने, फक्त यात्रा करवानीज इच्छावाळो ते राजा दिशाओतरफ

जोइने, ते तीर्थनी दिशासन्मुख चालवा लाग्यो. ॥ ६७ ॥ युग्मं ॥

**अथैकः पश्यतस्तस्य जातवातवरत्वरः । एत्यातुरो लतापुञ्जनिकुञ्जमविशन्मृगः ॥ ६८ ॥**

अन्वयः—अथ जात वात वर त्वरः एकः आतुरः मृगः एत्य तस्य पश्यतः लता पुंज निकुंजं अविशत्. ॥ ६८ ॥

अर्थः—एवामां वायुवेगे दोडतो एक गभरायेलो हरिण तेना देखतां वेलडीओना समूहनी घटामां जइ छुपाइ गयो. ॥ ६८ ॥

**किरातः कश्चिदायातस्तमनु स्फारयन्धनुः । दृक्पथातीतसारङ्गः । क्ष्माभुजङ्गमुवाच तम् ॥ ६९ ॥**

अन्वयः—तं अनु कश्चित् किरातः धनुः स्फारयन् आयातः, दृक् पथ अतीत सारंगः तं क्ष्मा भुजं उवाच. ॥ ६९ ॥

अर्थः—(एवामां) तेनी पाछळ कोइक भिल्ल धनुषनो टंकार करतो आवी पहोंच्यो, तथा ते हरिणने दृष्टिमार्गमांथी दूर थयेलो जाणीने ते राजाने ते कहेवा लाग्यो के, ॥ ६९ ॥

**अत्र पत्रततिच्छन्ने न पश्यामि पदं वने । मद्भक्ष्यं स मृगः क्वागान्ममेश कृपया दिश ॥ ७० ॥**

अन्वयः—(हे) ईशः अत्र पत्र तति च्छन्ने वने पदं न पश्यामि, मद् भक्ष्यं सः मृगः क अगात् ? मम कृपया दिश. ? ॥ ७० ॥

अर्थः—हे स्वामी! आ पांदडांओथी छवायेलां वनमां हुं पगलां जोइ शकतो नथी, मारुं भक्ष्य ते हरिण क्यां गयो? मने मेहेरबानी करी बताव ? ॥ ७० ॥

**सत्ये ख्याते मृगवधोऽन्यथा ख्याते मृषावचः । तद्बुद्ध्या विप्रतार्योऽयमिति ध्यात्वावदन्नृपः ॥ ७१ ॥**

अन्वयः-सत्ये ख्याते मृग वधः, अन्यथा ख्याते मृषावचः, तत् अयं बुध्ध्या विप्रतार्यः, इति ध्यात्वा नृपः अवदत्. ॥ ७१ ॥

अर्थः-जो सत्य बोलुं तो हरिणनो वध थाय, अने जो जूठुं बोलुं तो मृषावादनुं पाप लागे, माटे आने बुद्धिनी युक्तिथी छेतरवो, एम विचारी राजाए कह्युं के, ॥ ७१ ॥

**भोः पृच्छसि स्वरूपं मे मार्गभ्रष्ट इवापतम् । व्याधोऽभ्यधादहो मूढ त्रस्तः कागान्मृगो वद ॥ ७२ ॥**

अन्वयः—भोः मे स्वरूपं पृच्छसि? मार्ग भ्रष्टः इव आपतं, व्याधः अभ्यधात्, अहो! मूढ! वद? त्रस्तः मृगः क्व अगात्?

अर्थः—अरे! तुं शुं मारुं वृत्तांत पूछे छे? हुं तो मार्गमां भूलो पडवाथी आवी चड्यो छुं. (त्यारे) ते शिकारीए कह्युं के अरे! मूर्ख! कहे के, ते नाशी छूटेलो हरिण क्यां गयो? ॥ ७२ ॥

**नृपः प्राह महाभाग हंस इत्यभिधा मम । उच्चैराचष्ट मृगयुर्दिश मार्गं मृगस्य मे ॥ ७३ ॥**

अन्वयः—नृपः प्राह, हे महाभाग! मम अभिधा हंसः इति, मृगयुः उच्चैः आचष्ट, मे मृगस्य मार्गं दिश? ॥ ७३ ॥

अर्थः—(त्यारे) राजाए कह्युं के, हे! महाभाग्यशाली! मारुं नाम हंस छे, (त्यारे) ते शिकारीए म्होटेथी कह्युं के, मने ते हरिणनो मार्ग बताव? ॥ ७३ ॥

**जगतीशो जगौ मित्र स्थानं राजपुरी मम । भिल्लोऽभ्यधात्क्रुधा रेऽन्यत्पृच्छ्यसेऽन्यत्प्रजल्पसि ॥ ७४ ॥**

अन्वयः-जगती ईशः जगौ, हे मित्र! मम स्थानं राज पुरी, भिल्लः क्रुधा अभ्यधात्, रे! अन्यत् पृच्छयसे, अन्यत् प्रजल्पसि.

अर्थः–राजाए कह्युं के, हे मित्र! मारुं स्थान राजपुरी छे, (त्यारे) भिल्ले क्रोधथी कह्युं के, अरे! जड! पूछुं छुं बीजुं, अने उत्तर (तेथी) बीजोज आपे छे. ॥ ७४ ॥

**व्याजहार स राजन्यो मित्राहं क्षत्रियान्वयः । अत्युच्चैरूचिवान्व्याधः किं महाबधिरोऽसि भोः ॥ ७५ ॥**

अन्वयः—सः राजन्यः व्याजहार, (हे) मित्र! अहं क्षत्रिय अन्वयः, व्याधः अति उच्चैः ऊचिवान्, भोः किं महाबधिरः असि?

अर्थः–ते राजाए कह्युं के हे मित्र! हुं क्षत्रियवंशनो छुं, त्यारे ते शिकारी बहुज घांटो पाडीने बोली उठ्यो के, अरे! शुं तुं अत्यंत बेहेरो छे.? ॥ ७५ ॥

**भूपोऽवदद्दिशसि मे यन्मार्गं यामि तत्पुरम् । व्याधोऽभ्यधत्त बाधिर्यव्याधिर्यः सोऽस्तु ते चिरम् ॥७६॥**

अन्वयः–भूपः अवदत्, यत् मे मार्गं दिशसि, तत् पुरं यामि, व्याधः अभ्यधत्त, यः ते बाधिर्य व्याधिः, सः चिरं अस्तु. ॥७६॥

अर्थः—राजाए कह्युं के, जो मने तुं मार्ग बतावे, तो (म्हारां) नगरमां जाउं. त्यारे शिकारी बोल्यो के, तने जे आ बेहेरापणानो रोग छे, ते चिरकालसुधी रहो? ॥ ७६ ॥

**इत्युक्त्वैणनिराशोऽयमगाद्व्याधो यथागतम् । ययौ पुण्यभराक्रान्तः क्ष्माकान्तस्तु शनैः पुनः ॥७७॥**

अन्वयः–इति उक्त्वा अयं व्याधः एण निराशः यथागतं अगात्, तु पुण्य भर आक्रांतः क्ष्माकांतः पुनः शनैः ययौ. ॥ ७७ ॥

अर्थः—एम कहीने ते शिकारी तो हरिणमाटे निराश थइने जेवो आव्यो हतो तेवो चाल्यो गयो. अने पुण्यना समूहथी भारी

थयेलो ते राजा तो (त्यांथी) धीमे धीमे (आगळ) चालवा लाग्यो. ॥ ७७ ॥

**मतिमान्यतिमायान्तमेकमग्रे निरीक्ष्य सः । नत्वा मार्गं च मुक्त्वा च पुरावत्प्राचलन्नृपः ॥ ७८ ॥**

अन्वयः–सः मतिमान् नृपः अग्रे एकं यतिं आयांतं निरीक्ष्य नत्वा च मार्गं मुक्त्वा च पुरावत् प्राचलत्. ॥ ७८ ॥

अर्थः—(एवामां) ते बुद्धिवान् राजा आगळ एक मुनिने जता जोइने, तेमने नमीने, तथा मार्ग मूकीने प्रथमनीपेठे (आगळ) चालवा लाग्यो. ॥ ७८ ॥

**कृतान्तस्येव दृक्पातो ततः कोपारुणौ पुरः । एत्य भिल्लावुभौ भीमभृकुटी भूपमूचतुः ॥ ७९ ॥**

अन्वयः–ततः पुरः कृतांतस्य दृक् पातौ इव, कोप अरुणौ, भीम भृकुटी उभौ भिल्लौ एत्य भूपं ऊचतुः. ॥ ७९ ॥

अर्थः—पछी आगळ चालतां यमना दृष्टिपातनीपेठे क्रोधथी लाल थयेला, तथा भयंकर भृकुटिवाळा बे भिल्लो आवीने राजाने कहेवा लाग्या के, ॥ ७९ ॥

**चिरात्पल्लीपतिः शूरश्चौर्यबुद्ध्याद्य निःसृतः । दूराद्स्मिन्वने मुण्डं पाषण्डिनमलोकत ॥ ८० ॥**

अन्वयः—चिरात् शूरः पल्लीपतिः अद्य चौर्याय निःसृतः, दूरात् अस्मिन् वने पाषंडिनं मुंडं अलोकत. ॥ ८० ॥

अर्थः—घणे काळे शूरनामनो पल्लीपति आजे चोरी माटे निकळ्यो हतो, ( एवामां ) दूरथी आ वनमां तेणे ( एक ) पाखंडी मुंडाने जोयो. ॥ ८० ॥

**जानन्नशकुनं तं स तद्वधायोद्यतायुधौ । आवां प्रेष्यो द्रुतं प्रैषीद्दृष्टः क्वापि स कथ्यताम् ॥ ८१ ॥**

अन्वयः-तं अशकुनं जानन् सः तत् वधाय उद्यत आयुधौ आवां प्रेष्यौ द्रुतं प्रैषीत्, कथ्यतां सः क्व अपि दृष्टः ? ॥ ८१ ॥

अर्थः—तेने अपशकुन मानता एवा ते पल्लीपतिए, ते मुंडाने मारी नाखवामाटे हथीयारबंध एवा अमो बन्ने नोकरोने तुरत मोकल्या छे, माटे कहे के, ते मुंडो क्यांयें तारा जोवामां आव्यो छे ? ॥ ८१ ॥

**दध्यौ राजा मयि व्याजवाचि वा मौनभाजि वा । सरलेन पथा यान्तौ कृतान्तौ तन्मुनेरिमौ ॥८२॥**

अन्वयः-राजा दध्यौ मयि व्याजवाचि वा मौनभाजि वा, सरलेन पथा यांतौ इमौ मुनेः कृतांतौ. ॥ ८२ ॥

अर्थः-राजाए विचार्यु के, जो हुं (बेहेरानीपेठे) उलटो उत्तर आपीश, अथवा मौन रहीश, तो सिधे मार्गे चालनारा आ बन्ने भिल्लो ते मुनिने यमसरखा थइ पडशे (मारी नाखशे.) ॥ ८२ ॥

**संप्रत्यसत्यमप्युक्तं सत्यादप्युरुपुण्यकृत् । इति शब्दच्छलात्सत्यमसत्यमयमभ्यधात् ॥ ८३ ॥**

अन्वयः-संप्रति असत्यं उक्तं अपि सत्यात् अपि उरु पुण्य कृत्, इति शब्द च्छलात् अयं असत्यं सत्यं अभ्यधात्. ॥ ८३ ॥

अर्थः—आ समये कहेलुं असत्य वचन पण, सत्यथी पण वधारे पुण्य करनारुं छे, एम विचारी शब्दछळथी तेणे असत्यरूप सत्य कह्युं के, ॥ ८३ ॥

वामेन याति दुःखाध्वजुषामशकुनाय सः । लभ्यो युवाभ्यां न यथा तथाद्भुतगतिर्यतिः ॥ ८४ ॥

अन्वयः-दुःख अध्वजुषां अशकुनाय सः वामेन याति, यतिः तथा अद्भुत गतिः, यथा युवाभ्यां न लभ्यः. ॥ ८४ ॥

अर्थः—दुःखी वटेमार्गुओना अपशुकनमाटे ते डाबो बाजुएथी जाय छे, वळी ते मुनि एवी अद्भुत गतिवाळो छे के, जेथी तमोने ते मळी शकवानो नथी. ॥ ८४ ॥

मार्गे तद्वचसा तस्मिंस्तौ मुधा पर्यधावताम् । असद्गुरूपदेशनासंयमस्येव वर्त्मनि ॥ ८५ ॥

अन्वयः-असत् गुरु उपदेशेन असंयमस्य वर्त्मनि इव, तौ तद्वचसा मुधा तस्मिन् मार्गे पर्यधावतां. ॥ ८५ ॥

अर्थः—कुगुरुना उपदेशथी ( मनुष्य ) जेम असंयमना मार्गमां जाय, तेम ते बन्ने भिल्लो तेना कहेवाथी फोकट ते मार्गमां दोडवा लाग्या. ॥ ८५ ॥

तादृग्वागमृतासेकवर्धिष्णुसुकृतद्रुमः । यशःप्रसूनैः सुरभिस्तथैव पथि सोऽचलन् ॥ ८६ ॥

अन्वयः-तादृग् वाक् अमृत आसेक वर्धिष्णु सुकृत द्रुमः, यशः प्रसूनैः सुरभिः सः तथैव पथि अचलत्. ॥ ८६ ॥

अर्थः-तेवीरीतनां वचनामृतना सिंचनथी वृद्धि पामतुं छे पुणरूपी वृक्ष जेनुं, तथा यशरूपी पुष्पोवडे सुगंधि थयेलो ते हंसराजा तेवीजरीते मार्गमां ( आगळ ) चालवा लाग्यो. ॥ ८६ ॥

प्रसूनपातसुरभीभूतभूतलमण्डलम् । शयनाय निशारम्भे सारं भेजे स भूरुहम् ॥ ८७ ॥

अन्वयः—प्रसून पात सुरभी भूत भूतल मंडलं सारं भूरुहं निशा आरंभे शयनाय सः भेजे. ॥ ८७ ॥

अर्थः—पुष्पोना पडवाथी सुगंधी थयेल छे, पृथ्वीतलनुं मंडल ज्यां, एवा एक सुंदर वृक्षपर रात्रिना प्रारंभसमये सुवामाटे ते राजा चड्यो.

तृतीयेऽह्नि पतिष्यामः संघे तस्मिन्धनाम्बुधौ । दारिद्र्यभारमुन्मुच्य तरिष्यामो धनोर्मिषु ॥ ८८ ॥
प्राक्पात एव हन्तव्या हन्त केचिज्जनाः पुनः । भीवश्यस्त्रस्यत्ति यथा त्राता तुच्छपरिच्छदः ॥ ८९ ॥
इत्यदूरे लतागुल्मे बहूनां बलशालिनाम् । वचः कर्णचरीकृत्य श्रुत्वा सोऽचिन्तयन्नृपः ॥ ९० ॥

अन्वयः—तृतीये अह्नि धन अंबुधौ तस्मिन् संघे पतिष्यामः, दारिद्र्य भारं उन्मुच्य धन ऊर्मिषु तरिष्यामः. ॥ ८८ ॥ हंत ! पुनः प्राक् पाते एव केचित् जनाः हंतव्याः, यथा भी वश्यः, तुच्छ परिच्छदः त्राता त्रस्यति, ॥ ८९ ॥ इति अदूरे लतागुल्मे बहूनां बल शालिनां वचः कर्णचरीकृत्य श्रुत्वा सः नृपः अचिंतयत्. ॥ ९० ॥ त्रिभिर्विशेषकं ॥

अर्थः—(आजथी) त्रीजे दिवसे धनना महासागरसरखा ते संघउपर आपणे त्रुटी पडशुं, (अने तेथी) दरिद्रतानो भार छोडीने धनना मोजांओमां तरशुं, ॥ ८८ ॥ अरे ! वळी पेहेलाज हल्लामां केटलाक माणसोने तो मारीज नाखवा, के जेथी बीकनो मार्यो स्वल्प परीवारवाळो ते संघनो रक्षक तो नाशीज जाय, ॥ ८९ ॥ एवीरीते नजीकमां वेलडीओनी झाडीमां घणा बळवान ( भि-

लोनां) वचनोने कान मांडी सांभळीने ते हंसराजा विचारवा लाग्यो के, ॥ ९० ॥ त्रिभिर्विशेषकं ॥

**केचिन्मलिम्लुचाः काममिह विश्राममागताः । साधुसंघातघाताय दुर्जने दुर्गणा इव ॥ ९१ ॥**

अन्वयः-दुर्जने दुर्गुणाः इव, केचित् मलिम्लुचाः साधु संघात घाताय कामं इह विश्रामं आगताः. ॥ ९१ ॥

अर्थः—दुर्जनमां दुर्गुणोनीपेठे, केटलाक लुंटाराओ कोइ उत्तम संघनो नाश करवामाटे स्वेच्छाथी अहीं विश्राम लेवामाटे आवेला जणाय छे. ॥ ९१ ॥

**दूरादेभिः स्फुटं लुण्ट्यः संघो धर्मरुचिः क्वचित् । एकाकिना मया शक्यः केनोपायेन रक्षितुम् ॥९२॥**

अन्वयः-क्वचित् दूरात् एभिः स्फुटं धर्मरुचिः संघः लुंट्यः, एकाकिना मया केन उपायेन रक्षितुं शक्यः? ॥ ९२ ॥

अर्थः-क्यांक दूरना भागमां आ लुंटाराओने खरेखर (कोइक) धार्मिक संघने लुंटवो छे, (हवे) हु एकलो कया उपायथी ते संघनुं रक्षण करी शकुं? ॥ ९२ ॥

**इति चिन्तामसौ कुर्वन्निद्रया दूरितस्तदा । दीपदीप्तदिशोऽपश्यद्वीरान्कानप्युदायुधान् ॥ ९३ ॥**

अन्वयः-इति चिंतां कुर्वन् असौ निद्रया दूरितः, तदा दीप दीप्त दिशः, उदायुधान् कान् अपि वीरान् अपश्यत्. ॥ ९३ ॥

अर्थः—एम चिंता करतो थको ते हंसराजा जेवामां निद्रा रहित थइ (बेठो हतो), तेवामां दीपकोथी दिशाओने प्रकाशित करनारा, तथा उगामेलां शस्त्रोवाळा सुभटोने तेणे जोया. ॥ ९३ ॥

**कोऽप्यसो तस्करपुमानित्युत्थाप्य क्रुधा स तैः । मूर्त्यालोकान्महात्मायं कोऽपीत्युद्भाव्य भाषितः ॥९४॥**

अन्वयः—असौ कः अपि तस्कर पुमान, इति क्रुधा तैः सः उत्थाप्य, मूर्ति आलोकात् अयं कः अपि महात्मा, इति उद्भाव्य भाषितः.

अर्थः—आ कोइक लुंटाराओमांहेलो पुरुष छे, एम विचारी क्रोधथी तेओए तेने उठाड्यो, परंतु तेनो चेहेरो जोवाथी, आ तो कोइक महान् पुरुष लागे छे, एम विचारी तेओ तेने पूछवा लाग्या के, ॥ ९४ ॥

**चोराः केचित्क्वचिद्दृष्टा वदन्तो वा श्रुतास्त्वया । दिष्टा हि हेरिकेणेह पथि संघजिघांसवः ॥ ९५ ॥**

अन्वयः—केचित् चौराः कचित् त्वया दृष्टाः? वा वदंतः श्रुताः? हि संघ जिघांसवः इह पथि हेरिकेण दिष्टाः. ॥ ९५ ॥

अर्थः—केटलाक चोरोने (शुं) क्यांयें तें जोया? अथवा बोलता सांभल्या छे? केमके तेओ संघने मारवानी इच्छाथी आ मार्गे आव्या छे, एम अमारा छुपा बातमीदारे अमोने खबर आप्या छे. ॥ ९५ ॥

**योजनैर्दशभिः स्थानादितोऽस्ति श्रीपुरं पुरम् । गाधिस्तस्याधिपो जैनस्तान्हन्तुं प्रजिघाय नः ॥९६ ॥**

अन्वयः—इतः स्थानात् दशभिः योजनैः श्रीपुरं पुरं अस्ति, तस्य गाधिः जैनः अधिपः तान् हंतुं नः प्रजिघाय. ॥ ९६ ॥

अर्थः—आ स्थानथी दश जोजनपर श्रीपुरनामनुं नगर छे, त्यांना गाधिनामना जैन राजाए ते लुंटाराओने मारवामाटे अमोने मोकल्या छे. ॥ ९६ ॥

**तदाशु दिश जानासि यदि येन निहत्य तान् । यशो लभामहे संघरक्षया सुकृतानि च ॥ ९७ ॥**

अन्वयः-तत् यदि जानासि, आशु दिश ? येन तान् निहत्य यशः च संघ रक्षया सुकृतानि लभामहे. ॥ ९७ ॥

अर्थः—माटे जो तुं जाणतो होय तो तुरत बताव ? के जेथी तेओने मारीने यश, तथा संघनुं रक्षण करीने अमो पुण्य उपार्जन करीये. ॥ ९७ ॥

**अथ दध्यौ धराधीशः सत्योक्तिस्तान्दिशामि चेत् । समालिङ्गति सर्वाङ्गं तन्मां तद्वधपातकम् ॥ ९८ ॥**

अन्वयः—अथ धरा अधीशः दध्यौ, चेत् सत्य उक्तिः तान दिशामि, तत् तद् वधपातकं मां सर्वांगं समालिंगति. ॥ ९८ ॥

अर्थः—त्यारे ते हंसराजा विचारवा लग्यो के, जो कदाच सत्य वचन बोलीने ते लुंटाराओने हुं बतावुं, तो तेओना वधनुं पाप मने सघळुं लागवानुं छे. ॥ ९८ ॥

**यदि तान्न दिशाम्याशु तदेतैरनिपातिताः । भवन्ति मम ते संघघातपातकदायिनः ॥ ९९ ॥**

अन्वयः—यदि तान् आशु न दिशामि, तत् एतैः अनिपातिताः ते मम संघ घात पातक दायिनः भवंति. ॥ ९९ ॥

अर्थः-वळी जो हुं ते चोरोने तुरत न बतावुं, तो तेओथी बचीने जीवता रहेला आ चोरो मने संघना विनाशनुं पाप आपनारा थाय छे.

**तत्किमत्र करोमीति ध्यानादुत्पन्नधीः सुधीः । तान्बभाषे भटानत्र दृष्टा दृष्टया मया न ते ॥ ३०० ॥**

अन्वयः-तत् अत्र किं करोमि ? इति ध्यानात् उत्पन्न धीः सुधीः तान् भटान् बभाषे, मया अत्र ते दृष्टया न दृष्टाः, ॥ ३०० ॥

अर्थः—माटे हुं शुं करुं ? एम विचारतां तर्क उत्पन्न थवाथी ते सुबुद्धि राजाए ते सुभटोने कह्युं के, में अहीं ते चोरोने नजरे

जोया नथी. ॥ ३०० ॥

तद्विलोकाय युष्माकं युक्तं नेह विलम्बितुम् । यत्रास्ति संघस्तत्राशु गम्यतां त्रातुमातुरैः ॥ १ ॥

अन्वयः—तत् विलोकाय युष्माकं इह विलंबितुं युक्तं न, यत्र संघः अस्ति, तत्र आतुरैः त्रातुं आशु गम्यतां? ॥ १ ॥

अर्थः—ते चोरोने जोवामाटे तमारे अहीं खोटी थवुं योग्य नथी, माटे ज्यां संघ छे, त्यां उत्साहथी तेनुं रक्षण करवामाटे तमारे जवुं जोइये. ॥ १ ॥

तेऽपि तत्र गमिष्यन्ति याथ तत्प्रथमं यदि । ततश्च कीर्तिर्धर्मश्च भवतां भवतोऽद्भुतौ ॥ २ ॥

अन्वयः—ते अपि तत्र गमिष्यंति, तत् प्रथमं यदि याथ, ततः भवतां अद्भुतौ कीर्तिः च धर्मः च भवतः ॥ २ ॥

अर्थः—ते चोरो पण त्यांज जशे, माटे तेओनी पेहेलां जो तमो त्यां पहोंचो, तो तमोने अद्भुत कीर्ति तथा धर्म प्राप्त थशे.

इत्युक्त्यात्तचमत्कारास्ते संघाभिमुखं ययुः । चौरास्तु गुल्मान्निर्गत्य प्रणिपत्य तमब्रुवन् ॥ ३ ॥

अन्वयः—इति उक्त्या आत्तचमत्काराः ते संघ अभिमुखं ययुः, चौराः तु गुल्मात् निर्गत्य तं प्रणिपत्य अब्रुवन्. ॥ ३ ॥

अर्थः—एरीतनां वचनथी आश्चर्य पामेला ते सुभटो संघसन्मुख चाल्या गया, अने ते चोरो पण झाडीमांथी निकळीने, ते हंसराजाने नमीने केहेवा लाग्या के, ॥ ३ ॥

गुल्मे सन्तो वदन्तोऽत्र ज्ञाता एव त्वया वयम् । न ख्याता नृपचोरेभ्यः पिता प्राणप्रदोऽसि नः ॥४॥

अन्वयः—अत्र गुल्मे संतः वदंतः वयं त्वया ज्ञाताः एव, नृप वीरेभ्यः न ख्याताः, नः प्राण प्रदः पिता असि. ॥ ४ ॥

अर्थः–आ झाडीमां रहीने अमो बोलता हता, तेनी तने तो खबरज हती, छतां तें राजाना सुभटाने ते हकीकत जणावी नही, माटे अमोने जीवन आपनार तुं अमारा पितासमान छे. ॥ ४ ॥

**धर्मदुग्धार्णवज्योत्स्नां पापध्वान्तरविच्छविम् । स्तुमो धियं तव यया वयं संघश्च रक्षिताः ॥ ५ ॥**

अन्वयः—धर्म दुग्ध अर्णव ज्योत्स्नां, पाप ध्वांत रविच्छविं तव धियं स्तुमः, यथा वयं संघः च रक्षिताः. ॥ ५ ॥

अर्थः–धर्मरूपी क्षीरसमुद्रने चांदनी सरखी, तथा पापरूपी अंधकारप्रते सूर्यनी कांतिसरखी तारी बुद्धिनी अमो स्तुति करीये छीये, के जे बुद्धिवडे तें अमारुं अने संघनु पण रक्षण कर्यु. ॥ ५ ॥

**इत्युक्त्वा ते वलित्वागुः प्रगे सोऽप्यचलत्पुरः । अन्वेत्य सत्वरैरश्ववारैः कैश्चिदभाष्यत ॥ ६ ॥**

अन्वयः—इति उक्त्वा वलित्वा ते अगुः, प्रगे सः अपि पुरः अचलत्, सत्वरैः कैश्चित् अश्ववारैः अन्वेत्य अभाष्यत. ॥ ६ ॥

अर्थः—एम कहीने ते चोरो (त्यांथी) पाछा वळी गया, अने प्रभाते ते हंसराजा पण आगळ प्रयाण करवा लाग्यो, (एटलामां) उतावळे चालता केटलाक घोडेस्वारोए तेनी पाछळ आवीने तेने कह्युं के, ॥ ६ ॥

**दण्डितास्मत्पतेस्त्रस्यन्हंसो राजपुरीश्वरः । दृष्टः क्वापीह तं हत्वा तरामो वैरवारिधिम् ॥ ७ ॥**

अन्वयः—दंडित अस्मत् पतेः त्रस्यन् राजपुरी ईश्वरः हंसः इह क्व अपि दृष्टः? तं हत्वा वैर वारिधिं तरामः. ॥ ७ ॥

अर्थः—दंडायेला एवा अमारा स्वामीथी डरीने नासता फरता, अने राजपुरीनगरीना हंसनामना राजाने अहीं तें क्यायें जोयो? केमके तेने मारीने अमारे वैररूपी महासागरने तरवो छे. ॥ ७ ॥

**स्वजीविताय कः पापं वदत्यनृतमित्यथ । अहं स हंस इत्युक्त्वा धृतास्त्रोऽसो पुरः स्थितः ॥ ८ ॥**

अन्वयः—स्व जीविताय पापं अनृतं कः वदति? इति अथ अहं सः हंसः, इति उक्त्वा धृत अस्त्रः असौ पुरः स्थितः ॥ ८ ॥

अर्थः—पोतानां जीवनमाटे पापदायी जूठुं कोण बोले? एम विचारीने "हुं पोते ते हंसराजा छुं" एम कही हथीयार लेइ ते तेओनी आगळ उभो. ॥ ८ ॥

**सस्मार च नमस्कारान्राजा धर्मे धियं दधत् । दुन्दुभिः खे च दध्वान पुष्पवृष्टिः पपात च ॥ ९ ॥**

अन्वयः—च धर्मे धियं दधत् राजा नमस्कारान् सस्मार, च । खे दुंदुभिः दध्वान, च पुष्प वृष्टिः पपात. ॥ ९ ॥

अर्थः—तथा धर्ममां बुद्धि राखीने ते राजा (पंच परमेष्ठिना) नमस्कारोनुं स्मरण करवा लाग्यो. (एवामां) आकाशमां दुंदुभि वागवा लागी, तथा पुष्पोनी वृष्टि थवा लागी. ॥ ९ ॥

**सत्यवादिञ्जय जयेत्यानन्दविशदं वदन् । सम्यग्दृक्तद्वनाध्यक्षः तस्य यक्षः पुरोऽभवत् ॥ १० ॥**

अन्वयः—(हे) सत्यवादिन्! जय? जय? इति आनंद विशदं वदन् सम्यक् दृक् तत् वन अध्यक्षः यक्षः तस्य पुरः अभवत्.

अर्थः—हे! सत्यवादी राजन! तुं जय पाम? जय पाम? एरीतनां हर्षकारक वचनो बोलतो, ते वननो अधिष्ठाता सम्यग् दृष्टि यक्ष तेनीपासे हाजर थइ उभो. ॥ १० ॥

**प्रीतस्त्वत्सत्यवादेन त्रासितत्वदरिव्रजः। एतद्वनपतिर्यक्षस्त्र्यक्षाख्यस्त्वां वदाम्यदः ॥ ११ ॥**

अन्वयः—त्वत् सत्य वादेन प्रीतः, त्रासित त्वत् अरिव्रजः, त्र्यक्ष आख्यः एतत् वन पतिः यक्षः त्वां अदः वदामि. ॥ ११ ॥

अर्थः—तारी सत्य वाणीथी खुशी थयेलो, अने तारा शत्रुओने नसाडी मूकनारो त्र्यक्षनामनो आ वननो मालिक हुं यक्ष तने एम कहुं छुं के, ॥ ११ ॥

**तीर्थे त्वदीप्सिते यात्रा यत्र स्यादद्य तद्दिनम्। तद्यामो जिनमानन्तुं मद्विमानमलंकुरु ॥ १२ ॥**

अन्वयः—त्वत् ईप्सिते यत्र तीर्थे यात्रा स्यात्, तत् दिनं अद्य, तत् जिनं आनंतु यामः, मत् विमानं अलंकुरु? ॥ १२ ॥

अर्थः—तारां मनवांछित जे तीर्थमां यात्रा भराय छे, ते दिवस आजेज छे, माटे आपणे त्यां जिनवंदनमाटे जइये, तुं मारां विमानने शोभावी ले? (अर्थात् मारां विमानमां बेसी जा?) ॥ १२ ॥

**इत्यस्योक्त्या विमानं तदयमारूढवान्मुदा ॥ स्वं चालोकत तत्कालं दिव्यमण्डनमण्डितम् ॥ १३ ॥**

अन्वयः—इति अस्य उक्त्या अयं मुदा तत् विमानं आरूढवान्, च तत्कालं स्वं दिव्य मंडन मंडितं आलोकत. ॥ १३ ॥

अर्थः—एरीतनां ते यक्षना वचनथी ते हंसराजा हर्षथी ते विमानमां चड्यो, अने तेज समये ते पोताने दिव्य आभूषणोथी अ-

लंकृत थयेलो जोवा लाग्यो. ॥ १३ ॥

**दिव्यगायनवर्गेण गीयमानयशोगुणः । गुह्यकार्धासनासीनः स जैनं धाम तद्ययौ ॥ १४ ॥**

अन्वयः–दिव्य गायन वर्गेण गीयमान यशः गुणः, गुह्यक अर्ध आसन आसीनः सः तत् जैनं धाम ययौ. ॥ १४ ॥

अर्थः—दैविक गवैयाओना समूहवडे गवाता यशोगुणवालो, तथा ते यक्षनी साथे तेना अर्धा आसनपर बेठेलो ते हंसराजा ते जैनतीर्थमां पहोंची गयो. ॥ १४ ॥

**दिव्यद्रुकुसुमैर्दिव्यगन्धद्रव्यरसैरसौ । दिव्यप्रेक्षणकैश्चात्र जिनयात्रां समाप्तवान् ॥ १५ ॥**

अन्वयः–अत्र असौ दिव्य द्रु कुसुमैः, दिव्य गंध द्रव्य रसैः, च दिव्य प्रेक्षणकैः जिन यात्रां समाप्तवान्. ॥ १५ ॥

अर्थः—अहीं ते हंसराजाए दिव्य कल्पवृक्षनां पुष्पोवडे, दिव्य सुगंधि द्रव्योना रसोवडे, तथा दिव्य नाटकोवडे जिनेश्वरप्रभुनी यात्रा संपूर्ण करी. ॥ १५ ॥

**स्वस्थाने च गतः शत्रुं यक्षबद्धं विमुच्य सः । पुरीं प्रमोदयामास नृपासनगतो नृपः ॥ १६ ॥**

अन्वयः—च स्व स्थाने गतः सः नृपः यक्ष बद्धं शत्रुं विमुच्य नृप आसन गतः पुरीं प्रमोदयामास. ॥ १६ ॥

अर्थः—पछी पोताने स्थानके गयेलो ते राजा, यक्षे बांधेला ते शत्रुने छोडीने राज्यसिंहासनपर बेसीने नगरीने आनंद पमाडवा लाग्यो. ॥ १६ ॥

**भोगैरभूतलप्राप्यैः प्रीणनीयोऽयमन्वहम् । अन्तरायनिकायश्च रक्ष्योऽस्मिन्पुण्यकारिणि ॥ १७ ॥**

**इत्युक्त्वा प्रीतिचतुरश्चतुरः सुरकिंकरान् । यक्षः श्रीहंसमापृच्छ्य द्यां ययौ द्युतिदीप्तदिक् ॥१८॥ युग्मम् ॥**

अन्वयः—अभूतल प्राप्यैः भोगैः अयं अन्वहं प्रीणनीयः, च अस्मिन् पुण्य कारिणि अंतराय निकायः रक्ष्यः, ॥ १७ ॥ इति प्रीति चतुरः यक्षः चतुरः सुर किंकरान् उक्त्वा श्रीहंसं आपृच्छ्य द्युति दीप्त दिक् द्यां ययौ. ॥ १८ ॥ युग्मं ॥

अर्थः—पृथ्वीतलपर न मळी शके एवा (उमदा) भोगोथी आ राजाने हमेशां (तमारे) खुशी करवो, तेमज आ पुण्यशालि राजानो अंतरायोनो समूह दूर करवो, ॥ १७ ॥ एम प्रेम भरेलो ते यक्ष चार देव किंकरोने हुकम करीने, तथा ते श्रीहंसराजानी रजा लेइने, कांतिथी दिशाओने दीपावतोथको स्वर्गमां चाल्यो गयो. ॥ १८ ॥ युग्मं ॥

**अहो सत्योक्तिमाहात्म्यमिहापि प्राप यन्मुदम् । परलोके तु स स्वर्गसंपदं हंसभूपतिः ॥ १९ ॥**

अन्वयः—अहो! सत्यउक्ति माहात्म्यं! यत् इह अपि सः हंस भूपतिः मुदं प्राप, पर लोके तु स्वर्ग संपदं. ॥ १९ ॥

अर्थः—अहो ! सत्यवचननो ( केवो ) महिमा छे ? के जेथी आ लोकमां पण ते हंसराजा आनंद पाम्यो, अने परलोकमां पण स्वर्गनी संपत्ति पाम्यो. ॥ १९ ॥

**मृषावादविषाटोपक्लेशलोपसुधारसे । सत्यवादे रता नित्यं भवन्तस्तद्भवन्तु भोः ॥ २० ॥**

अन्वयः—तत् मृषा वाद विष आटोप क्लेश लोप सुधारसे सत्य वादे भोः भवंतः नित्यं रताः भवंतु. ॥ २० ॥

अर्थः-माटे मृषावादरूपी विषविकारनाक्लेशने दूर करवामाटे अमृतरससरखा सत्यवादमां हे! भव्यलोको! तमो हमेशां रक्त थाओ?

**अस्तेयममृषावादपादपच्छायवत्पुनः । क्लेशनाशाय सेवध्वमध्वगा भववर्त्मनः ॥ २१ ॥**

अन्वयः—(हे) भव वर्त्मनः अध्वगाः! पुनः अमृषा वाद पादप च्छायवत् अस्तेयं क्लेश नाशाय सेवध्वं? ॥ २१ ॥

अर्थः—हे संसारना मार्गमां चालनारा प्राणीओ! वळी सत्य वचनरूपी वृक्षनी छाया सरखा अस्तेय व्रतने क्लेशोना नाशमाटे तमो सेवो? ॥ २१ ॥

**आहितं स्थापितं नष्टं विस्मृतं पतितं स्थितम् । नाददीतास्वकीयं स्वमित्यस्तेयमणुव्रतम् ॥ २२ ॥**

अन्वयः-आहितं, स्थापितं, नष्टं, विस्मृतं, पतितं, स्थितं अस्वकीयं स्वं न आददीत, इति अस्तेयं अणुव्रतं. ॥ २२ ॥

अर्थः—धीरेलुं, थापण तरीके राखेलुं, खोवाइ गयेलुं, विसरी गयेलुं, पडी गयेलुं अने स्थिर पडेलुं, एवुं पारकुं द्रव्य लेवुं नही, तेने अस्तेय ( अचौर्य ) नामनुं ( त्रीजुं) अणुव्रत ( जाणवुं. ) ॥ २२ ॥

**अस्तेयव्रतदुग्धाब्धिमध्यस्थानकृतां सताम् । न स्याद्भवदवज्वालाकलापस्तापहेतवे ॥ २३ ॥**

अन्वयः-अस्तेय व्रत दुग्ध अब्धि मध्य स्थान कृतां सतां, भव दव ज्वाला कलापः ताप हेतवे न स्यात्. ॥ २३ ॥

अर्थः-अस्तेय व्रतरूपी क्षीरसागरनी वच्चे रहेता सज्जनोने संसाररूपी दावानलनी ज्वालाओनो समूह ताप आपनारो थतो नथी,

**अदत्तादानविरतिव्रतनिश्चयनिश्चलः । लक्ष्मीपुञ्ज इवाप्नोति सर्वः सर्वमचिन्तितम् ॥ २४ ॥**

अन्वयः—अदत्त आदान विरति व्रत निश्चय निश्चलः सर्वः लक्ष्मीपुंजः इव सर्वं अचिंतितं आप्नोति. ॥ २४ ॥

अर्थः—अदत्तादानविरमण नामना त्रीजा अणुव्रतना निश्चयमां अचल रहेला सर्व प्राणीओ लक्ष्मीपुंजनीपेठे सर्व कंई अनुपम वस्तुने प्राप्त थाय छे. ॥ २४ ॥

**तथाह्यवितथारम्भधर्मिधर्मोर्मिनिर्मलम् । श्रीहस्तिपुरमस्ति श्रीनिरस्तान्यपुरं पुरम् ॥ २५ ॥**

अन्वयः—तथाहि—अवितथ आरंभ धर्मि धर्म ऊर्मि निर्मलं, श्री निरस्त अन्यपुरं श्रीहस्तिपुरं पुरं अस्ति. ॥ २५ ॥

अर्थः—ते लक्ष्मीपुंजनुं उदाहरण कहे छे—सफल प्रारंभवाळा धर्मी मनुष्योना धर्मना मोजांओथी निर्मल थयेलुं, तथा शोभार्थी तिरस्कारेल छे बीजां नगरो जेणे, एवुं श्रीहस्तिपुर नामनुं नगर छे. ॥ २५ ॥

**तस्मिन्नुदारदारिद्र्यमुद्रासर्वेश्वरोऽभवत् । सुधर्म इति सद्धर्मरसैकमणिको वणिक् ॥ २६ ॥**

अन्वयः—तस्मिन् उदार दारिद्र्य मुद्रा सर्व ईश्वरः, सत् धर्म रस एक मणिकः सुधर्मः इति वणिक् अभवत्. ॥ २६ ॥

अर्थः—ते नगरमां उदार दारिद्र्यनी छापवाळा सर्व नागरिकोमां मुख्य, अने उत्तम धर्मरूपी रसना महान् भाजनसरखो सुधर्मनामनो वणिक् वसतो हतो. ॥ २६ ॥

**कैश्चिद्वराटकैः किंचित्क्रीत्वा विक्रीय चान्वहम् । कांश्चिद्वराटकाँल्लाभेऽर्जयन्कालं निनाय सः ॥ २७ ॥**

अन्वयः—कैश्चित् वराटकैः किंचित् क्रीत्वा च विक्रीय अन्वहं सः कांश्चित् वराटकान् लाभे अर्जयन् कालं निनाय. ॥ २७ ॥
अर्थः—केटलीक कोडीओवडे कंइंक वस्तु लेइने, तथा ते वेचीने हमेशां ते केटलीक कोडीओना नफो मेळवीने ( पोतानी आ-जीविका चलावतोथको ) समय वीताडतो हतो. ॥ २७ ॥

**सधर्मचारिणी तस्य धन्याख्या धर्मचारिणी । अभूत्कार्योच्चये चित्ताधिपचित्तानुवर्तिनी ॥ २८ ॥**

अन्वयः—धर्म चारिणी, कार्योच्चये चित्त अधिप चित्ता अनुवर्तिनी, तस्य धन्या आख्या सधर्म चारिणी अभूत्. ॥ २८ ॥
अर्थः—धर्माचरण आचरनारी, तथा कार्योना समूहमां ( पोताना ) स्वामिना हृदयने अनुसरनारी तेने धन्यानामनी स्त्री हती.

**पत्रे पत्रे स्फुरन्तीभिर्विचित्राभिर्विभूतिभिः । चार्वङ्गीभिः कृतैर्गीतनृत्तवाद्यैः प्रसन्नया ॥ २९ ॥**
**रत्नाब्जमध्यवर्तिन्या दृग्भाग्यावधिरूपया । अगण्यपुण्यसंप्राप्यसर्वशृङ्गारसारया ॥ ३० ॥**
**श्रीदेव्या जिनमर्चन्त्या हृद्यं पद्महदं हृदम् । स्वप्नेऽपश्यन्निशान्ते सा नृत्यद्धंसामलोर्मिकम् ॥ ३१ ॥**

अन्वयः—विचित्राभिः विभूतिभिः पत्रे पत्रे स्फुरंतीभिः चारु अंगीभिः कृतैः गीत नृत्त वाद्यैः प्रसन्नया, ॥ २९ ॥ रत्न अब्ज मध्य वर्तिन्या, दृग् भाग्य अवधि रूपया, अगण्य पुण्य संप्राप्य सर्व शृंगार सारया, ॥ ३० ॥ जिनं अर्चंतया श्रीदेव्या हृद्यं नृत्यत् हंस अमल ऊर्मिकं पद्महदं हृदं सा स्वप्ने निशा अंते अपश्यत्. ॥ ३१ ॥ त्रिभिर्विशेषकं ॥

अर्थः–विविध समृद्धिथी पांदडे पांदडे स्फुरायमान थती मनोहर देवांगनाओए करेलां गायन, नृत्य तथा वाजित्रोथी प्रसन्न थयेली, ॥ २९ ॥ तथा रत्नोना कमलनी वच्चे बेठेली, दृष्टिना भाग्यनी अवधिसरखी, तथा अगणित पुण्योवडे प्राप्त थइ शके एवा सर्व शृंगारथी मनोहर देखाती, ॥ ३० ॥ अने जिनपूजन करती एवी लक्ष्मीदेवीथी [illegible] र देखातां, तथा नाचता हंसोथी निर्मल मोजांओवाळां, पद्मह्रदनामना सरोवरने तेणीए स्वप्ननी अंदर पाछली रात्रिए जोयुं. ॥ २१ ॥ त्रिभिर्विशेषकं ॥

**स्वप्नं प्रेक्ष्य प्रमोदेन यान्भेजे पुलकाङ्कुरान् । तैरेवाङ्गीकृताङ्गीयं प्रबुद्धाख्यत्प्रियं प्रति ॥ ३२ ॥**

अन्वयः–स्वप्नं प्रेक्ष्य प्रमोदेन यान् पुलक अंकुरान् भेजे, तैः एव अंगीकृत अंगी प्रबुद्धा इयं प्रियंप्रति आख्यत्. ॥ ३२ ॥

अर्थः—स्वप्न जोइने आनंदथी जे रोमांचना अंकुराओने तेणीए धारण कर्या, तेज अंकुराओवडे शोभितां शरीरवाळी एवी तेणीए जागीने ते स्वप्ननुं स्वरूप पोताना स्वामीने कह्युं. ॥ ३२ ॥

**सोऽपि व्याख्यत्प्रिये पुत्रः श्रेयाञ्श्रीमान्महागुणः । स्वच्छाशयो जिनाधीशभक्तस्तव भविष्यति ॥ ३३ ॥**

अन्वयः–सः अपि व्याख्यत्, हे प्रिये! तव श्रेयान्, श्रीमान्, महागुणः, स्वच्छ आशयः, जिन अधीश भक्तः पुत्रः भविष्यति.

अर्थः– त्यारे ते सुधर्मवणिके पण कह्युं के, हे प्रिये! तने कल्याणकारी, लक्ष्मीवान, निर्मल आशयवाळो, तथा श्रीजिनेश्वर प्रभुनी भक्ति करनारो पुत्र थशे. ॥ ३३ ॥

**प्रीताथ धन्यंमन्यासौ धन्यार्हद्ध्यानमानसा । दूरविद्राणनिद्रा तं निशाशेषमवाहयत् ॥ ३४ ॥**

अन्वयः—अथ प्रीता, धन्यं मन्या, अर्हत् ध्यान मानसा असौ धन्या, दूर विद्राण निद्रा तं निशा शेषं अवाहयत्. ॥ ३४ ॥
अर्थः—पछी खुशी थयेली, (पोताने) धन्य माननारी, तथा तीर्थंकर प्रभुना ध्यानमां हृदयवाळी ते धन्या निद्राने दूर करीने बाकीना रात्रिना ते भागने व्यतीत करवा लागी. ॥ ३४ ॥

**तस्मिन्नह्नि विनिह्नुत्य कर्म लाभान्तरायिकम् । क्रयविक्रयतो लाभं स लेभे द्विगुणं वणिक् ॥ ३५ ॥**

अन्वयः—तस्मिन् अह्नि लाभ अंतरायिकं कर्म विनिह्नुत्य सः वणिक् क्रय विक्रयतः द्विगुणं लाभं लेभे. ॥ ३५ ॥
अर्थः—ते दिवसे लाभांतराय कर्मने दूर करीने ते वणिके लेवा वेचवाना व्यापारथी बेवडो लाभ मेळव्यो. ॥ ३५ ॥

**इति व्यवहृतिक्रीडावर्धमानधनः क्रमात् । सुधर्मः सुखलेशानां प्रथमातिथितां गतः ॥ ३६ ॥**

अन्वयः—इति व्यवहृति क्रीडा वर्धमान धनः सुधर्मः क्रमात् सुख लेशानां प्रथम अतिथितां गतः. ॥ ३६ ॥
अर्थः—एरीते व्यापार करवाथी वृद्धि पामता धनवाळो ते सुधर्म वणिक् अनुक्रमे सुखना लेशोनो पहेलो अतिथि थयो, (अर्थात् थोडुं थोडुं सुख पामवा लाग्यो.) ॥ ३६ ॥

**धन्यायास्तनुकान्त्यैव गर्भोऽथ बुबुधे शुभः । शारदाम्भोदलेखाया गर्भस्थ इव भानुमान् ॥ ३७ ॥**

अन्वयः—अथ धन्यायाः तनु कांत्या एव, शारद अंभोद लेखायाः गर्भस्थः भानुमान् इव शुभः गर्भः बुबुधे. ॥ ३७ ॥

अर्थः—हवे ते धन्याना शरीरनी कांतिथीज, शरदऋतुना वादळांओनी रेखाना गर्भमां रहेला सूर्यनीपेठे ते गर्भ मनोहर जणावा लाग्यो. ॥ ३७ ॥

**सीमन्तोन्नयने वित्तचिन्तार्तः सोऽन्यदा वणिक् । पादाङ्गुष्ठेन गेहान्तर्विलक्षो व्यलिखन्महीम् ॥ ३८ ॥**

अन्वयः—सीमंत उन्नयने वित्त चिंता आर्तः सः वणिक् अन्यदा विलक्षः पाद अंगुष्ठेन गेहांतः महीं व्यलिखत्. ॥ ३८ ॥

अर्थः—सीमंत करवामाटेना धननी चिंताथी पीडित थयेलो ते वणिक् एक दिवसे विलखो थयोथको पगना अंगुठाथी घरनी अंदर जमीन खोतरवा लाग्यो. ॥ ३८ ॥

**तदुल्लेखनखातायां स च क्ष्मायां व्यलोकयत् । कान्तकल्याणमाणिक्यमण्डलैराविलं बिलम् ॥ ३९ ॥**

अन्वयः—च तत् उल्लेखन खातायां क्ष्मायां सः कांत कल्याण मणि माणिक्य मंडलैः आविलं बिलं व्यलोकयत्. ॥ ३९ ॥

अर्थः—पछी एरीते खोतरवाथी खोदायेली जमीननी अंदर तेणे चळकतां सुवर्ण, मणि, तथा माणिक्योना समूहोथी भरेलुं (एक) बिल जोयुं. ॥ ३९ ॥

**विस्मयानन्दसंदर्भी मणिरुक्ममयं वणिक्, अगारं कारयामास वासवावासवत्ततः ॥ ४० ॥**

अन्वयः—विस्मय आनंद संदर्भी वणिक्, ततः वासव आवासवत्, मणि रुक्ममयं अगारं कारयामास. ॥ ४० ॥

अर्थः—आश्चर्य अने हर्षथी उमंगमां आवेला ते वणिके त्यारपछी इंद्रभुवन सरखुं रत्न अने सुवर्णमय घर बनाव्युं. ॥ ४० ॥

रूपलास्येऽप्सरस्तुल्यो दास्ये विनयवामनः । तस्य सद्मनि दासीनां संघः संघटितस्ततः ॥ ४१ ॥

अन्वयः—ततः तस्य सद्मनि रूप लास्ये अप्सरः तुल्यः, दास्ये विनय वामनः, दासीनां संघः संघटितः. ॥ ४१ ॥

अर्थः—पछी ते सुधर्मवणिकना घरमां रूप अने नृत्यमां अप्सराओसरखो, तथा नोकरी बजाववामां विनयथी नम्र थयेलो दासीओनो समूह एकठो थवा लाग्यो. ॥ ४१ ॥

तस्मिन्दातरि दातव्यमणिचारुत्वदर्शनात् । दातारोऽप्यर्थितां जग्मुः सीमन्तोन्नयनोत्सवे ॥ ४२ ॥

अन्वयः–सीमंत उन्नयन उत्सवे तस्मिन् दातरि, दातव्य मणि चारुत्व दर्शनात् दातारः अपि अर्थितां जग्मुः. ॥ ४२ ॥

अर्थः–(पोतानी स्त्रीना) सीमंतना महोत्सवमां ज्यारे ते वणिक् दान देवा लाग्यो, त्यारे दान आपवानां रत्नोनुं मनोहरपणुं जोइने (बीजा) दातारो पण याचकपणाने प्राप्त थया, (अर्थात् तेनीपासेथी ते रत्नोनुं तेओ दान लेवा आव्या) ॥ ४२ ॥

कूपं जलेष्विव बिलं स्वर्णरत्नगणेषु तत् । कृष्यमाणेष्वपि वणिक् पूर्णमेव न्यरूपयत् ॥ ४३ ॥

अन्वयः–जलेषु कृष्यमाणेषु अपि कूपं इव, स्वर्ण रत्न गणेषु (कृष्यमाणेषु अपि) वणिक् तत् बिलं पूर्णं एव न्यरूपयत्. ।४३।

अर्थः—जलने खेंची लेवा छतां पण कुवानीपेठे, स्वर्ण अने रत्नोनो समूह कहाडवा छतां पण ते वणिक ते बिलने संपूर्णभरेलुंज जोवा लाग्यो. ॥ ४३ ॥

तद्भूतिमुदिता चिन्तासमकालाप्तदोहदा । सुमुहूर्तेऽद्भुतं धन्या सुखेन सुषुवे सुतम् ॥ ४४ ॥

अन्वयः-तत् भूति मुदिता, चिंता समकाल आप्त दोहदा धन्या सुमुहूर्ते सुखेन अद्भुतं सुतं सुषुवे. ॥ ४४ ॥

अर्थः—ते समृद्धिथी आनंद पामेली, तथा इच्छा वखतेज संपूर्ण थया छे दोहदो जेणीना एवी ते धन्याए उत्तम मुहूर्तमां सुखे-समाधे अद्भुत पुत्रने जन्म आप्यो. ।' ४४ ॥

दानाधिक्येन गीतादिचारुत्वेन च स व्यधात् । सुतजन्मोत्सवे श्रेष्ठी विस्मयं द्युसदामपि ॥ ४५ ॥

अन्वयः-सः श्रेष्ठी सुत जन्म उत्सवे दान आधिक्येन, च गीत आदि चारुत्वेन द्युसदां अपि विस्मयं व्यधात्. ॥ ४५ ॥

अर्थः-ते शेठे पुत्रजन्मना महोत्सवमां दानना अधिकपणाथी तथा गीत आदिकना मनोहरपणाथी देवोने पण आश्चर्य पमाड्युं.

लक्ष्मीपुञ्जमिवालोक्य तं सुतं कान्तिभिः पिता । महेन महता लक्ष्मीपुञ्जनामानमातनोत् ॥ ४६ ॥

अन्वयः-कांतिभिः तं सुतं लक्ष्मी पुंजं इव आलोक्य पिता महता महेन लक्ष्मीपुंजनामानं आतनोत्. ॥ ४६ ॥

अर्थः—कांतिवडे करीने ते पुत्रने लक्ष्मीना पुंज (समूह) सरखो जोइने (तेना) पिताए महोटा उत्सवपूर्वक तेनुं " लक्ष्मीपुंज " नाम पाड्युं. ।' ४६ ॥

कालकालोचितैर्भावैरचिन्त्योपस्थितैः शिशुः । अजातचिन्तादुःखोऽयं कामं कामवदैधत ॥ ४७ ॥

अन्वयः-अचिंत्य उपस्थितैः काल काल उचितैः भावैः अजात चिंता दुःखः अयं शिशुः कामं कामवत् ऐधत. ॥ ४७ ॥

अर्थः—अणचिंतव्याज प्राप्त थयेला समयसमयना योग्य भावोथी, नथी थयेल चिंतानुं दुःख जेने, एवो आ बाळक सुखेसमाधे कामदेवनीपेठे वृद्धि पामवा लाग्यो. ॥ ४७ ॥

**अस्पृशन्क्लेशकणमप्यरोदीन्न कदाप्यसौ । नित्यानन्दस्मितमुखः पित्रोः सुखकरोऽभवत् ॥ ४८ ॥**

अन्वयः-क्लेश कणं अपि अस्पृशन् असौ कदा अपि न अरोदीत्, नित्य आनंद स्मित मुखः पित्रोः सुखकरः अभवत्. ॥४८॥

अर्थः-क्लेशना लेशने पण नही स्पर्श करतो ते लक्ष्मीपुंज कोइ दिवसे पण रडतो नही, अने हमेशां आनंदथी हसमुखो थइने ते मातपिताने सुखदाइ थतो हतो. ॥ ४८ ॥

**कलाः प्रतिदिनं गृह्णन्कुतोऽप्युल्लसिताः सिताः । रुचिस्तोमतनुः सोम इवावर्धत दृक्प्रियः ॥ ४९ ॥**

अन्वयः-कुतः अपि उल्लसिताः सिताः कलाः प्रतिदिनं गृह्णन्, रुचि स्तोम तनुः, दृक् प्रियः सोमः इव अवर्धत. ॥ ४९ ॥

अर्थः-क्यांयथी पण प्रकट थयेली निर्मल कलाओने हमेशां ग्रहण करतो, तथा कांतिना समूहयुक्त शरीरवाळो, अने नयनोने प्रिय लागतो, एवो ते लक्ष्मीपुंजकुमार चंद्रनीपेठे वृद्धि पामवा लाग्यो. ॥ ४९ ॥

**तत्तद्दिक्तत्त्वमङ्गश्रीकलागुणगणोदयैः । कन्यास्तमागमन्नष्टौ दिग्भ्योऽष्टभ्यः स्वयंवराः ॥ ५० ॥**

अन्वयः—अंगश्री कला गुण गण उदयैः तत् तत् दिक् तत्त्वं तं, अष्टभ्यः दिग्भ्यः स्वयंवराः अष्टौ कन्याः आगमन. ॥ ५० ॥

अर्थः-शरीरनी शोभा, कलाओ, तथा गुणोना समूहना उदयथी ते ते दिशाओना सार सरखा ते लक्ष्मीपुंजकुमारने आठे दिशा-

ओमांथी स्वयंवररूपे आठ कन्याओ आवी. ॥ ५० ॥

**नित्यं रत्नालये लीनो दर्शनस्पर्शनद्विषोः । नाबुध्यत स्वरूपं स तमिस्रतपनत्विषोः ॥ ५१ ॥**

अन्वयः—नित्यं रत्न आलये लीनः सः दर्शन स्पर्शनद्विषोः तमिस्र तपन त्विषोः स्वरूपं न अबुध्यत. ॥ ५१ ॥

अर्थः—हमेशां रत्नोना बनावेला मेहेलमां रहेनारा ते लक्ष्मीपुंजकुमारे दर्शन तथा स्पर्शना शत्रुरूप एवा अंधकार तथा सूर्यनी कांतिनुं स्वरूप पण जाण्युं नही. ॥ ५१ ॥

**यद्यत्प्रीतिकरं सर्वं स तत्तदुपभुक्तवान् । यद्यद् दुःखकरं तत्तद् बुबुधे सत्तयापि न ॥ ५२ ॥**

अन्वयः–यत् यत् प्रीतिकरं, तत् तत् सर्वं सः उपभुक्तवान्, यत् यत् दुःखकरं, तत् तत् सत्तया अपि न बुबुधे. ॥ ५२ ॥

अर्थः–जे जे आनंदकारक लागतुं, ते ते सघळुं ते भोगवतो हतो, अने जे जे दुःखकारक हतुं, तेनी तेनी ते हयाती पण जाणी शक्यो नही. ॥ ५२ ॥

**प्रियाभिरेव संवृत्तनृत्तगीतादिसंमदः । कालं यान्तं स नाबोधि पञ्चोत्तरसुरो यथा ॥ ५३ ॥**

अन्वयः–प्रियाभिः एव संवृत्त नृत्त गीत आदि संमदः सः, यथा पंच उत्तर सुरः, यांतं कालं न अबोधि. ॥ ५३ ॥

अर्थः–(पोतानी) स्त्रीओएज करेलां नाटक तथा गीतो आदिकथी आनंदित थयेलो ते लक्ष्मीपुंजकुमार पांच अनुत्तर विमानना देवनीपेठे जता कालने पण जाणी शक्यो नही. ॥ ५३ ॥

**अचिन्तिताः कुतो भोगाः स्युर्ममेति कदाप्यसौ । अङ्के प्रसुप्तः कान्तानां सुखी यावदचिन्तयत् ॥५४॥**
**तावद्दिव्यतनुर्दिव्यचीराभरणभासुरः । कश्चित्पुमान्पुरः स्पष्टीभूय बद्धाञ्जलिर्जगौ ॥ ५५ ॥ युग्मम् ॥**

अन्वयः-अचिंतिताः भोगाः कुतः मम स्युः ? इति कदापि सुखी असौ कांतानां अंके प्रसुप्तः यावत् अचिंतयत्, ॥ ५४ ॥ तावत् दिव्य तनुः, दिव्य चीर आभरण भासुरः कश्चित् पुमान् पुरः स्पष्टीभूय बद्ध अंजलिः जगौ. ॥ ५५ ॥

अर्थः-आवा अचिंतित भोगो क्यांथी मने प्राप्त थया छे ? एम कोइक दिवसे ते सुखी लक्ष्मीपुंजकुमार, स्त्रीओना खोळामां सुतोथको जेटलामां विचार करतो हतो, ॥ ५४ ॥ एवामां मनोहर शरीरवाळो, तथा मनोहर वस्त्रो अने आभूषणोथी देदीप्यमान कोइक पुरुप (तेनी) पासे प्रगट थइने हाथ जोडी कहेवा लाग्यो के, ॥ ५५ ॥ युग्मं ॥

**धन्याकुक्षिसरोहंस गृहं सर्वश्रियां बृहत् । विद्यते विपदां दूरं मणिपूरं महापुरम् ॥ ५६ ॥**

अन्वयः-(हे) धन्या कुक्षि सरः हंस ! सर्व श्रियां बृहत् गृहं, विपदां दूरं मणिपुरं महापुरं विद्यते. ॥ ५६ ॥

अर्थः-हे धन्या शेठाणीनी कुक्षिरूपी तळावमां हंससरखा लक्ष्मीपुंज ! सर्व लक्ष्मीओना महान् स्थानसरखुं, तथा आपत्तिओथी दूर रहेलुं मणिपुरनामनुं एक म्होटुं नगर छे. ५६ ॥

**तत्रासीत्सार्थपः पुण्यधरो गुणधराभिदः । सोऽन्यदा विशदाख्यस्य मुनेः पार्श्वं वनेऽगमत् ॥ ५७ ॥**

अन्वयः—तत्र गुणधर अभिधः पुण्यधरः सार्थपः आसीत्, सः अन्यदा वने विशद आख्यस्य मुनेः पार्श्वे अगमत्. ॥ ५७ ॥

अर्थः—ते नगरमां गुणधरनामनो पुण्यशाली सार्थवाह (रहेतो) हतो, एक दिवसे ते वनमां (पधारेला) विशदनामना मुनिपासे गयो. ॥ ५७ ॥

**जन्तोः स्याद् दुःखदं द्रव्यहरणं मरणादपि । अतः सुकृतिभिः कार्यं चौर्यचर्याविमोचनम् ॥ ५८ ॥**

अन्वयः—जंतोः द्रव्य हरणं मरणात् अपि दुःखदं स्यात्, अतः सुकृतिभिः चौर चर्या विमोचनं कार्यं. ॥ ५८ ॥

अर्थः—प्राणीना द्रव्यनुं हरण मरणथी पण (तेने वधारे) दुःखदाइ थाय छे, माटे पुण्यशालीओए चोरीना कार्यनो त्याग करवो.

**एवमाकर्ण्य पुण्यात्मा स विद्याधरसंसदि । अदत्तादानविरतिं व्यधात्तत्र तदा मुदा ॥ ५९ ॥**

अन्वयः—एवं आकर्ण्य सः पुण्य आत्मा तत्र विद्याधर संसदि तदा मुदा अदत्त आदान विरतिं व्यधात्. ॥ ५९ ॥

अर्थः—(ते मुनिना मुखथी) एम सांभळीने ते पुण्यशाली गुणधर सार्थवाहे त्यां विद्याधरोनी सभामां ते समये हर्षथी, अणदीधेलुं पारकुं द्रव्य ग्रहण न करवानी (अस्तेयव्रत पालवानी) बाधा लीधी. ॥ ५९ ॥

**पुरं प्राप्तः कदाप्येष विशेषधनकाङ्क्षया । देशान्तराय कस्मैचिद्भूरिभाण्डभरोऽचलत् ॥ ६० ॥**

अन्वयः—पुरं प्राप्तः कदापि एषः विशेष धन कांक्षया भूरि भांड भरः कस्मैचित् देशांतराय अचलत्. ॥ ६० ॥

अर्थः—पछी नगरमां गयाबाद कोइक दिवसे ते विशेष धन मेळववानी इच्छाथी घणां करीयाणां लेइने कोइक देशांतरप्रते चालवा लाग्यो. ॥ ६० ॥

**स्वदेशान्ते महाटव्यामस्मिन्सार्थे विशत्यथ । अश्वारूढः क्वचित्प्रौढपदद्‌ण्डे व्रजन्पुरः ॥ ६१ ॥**

**दृष्ट्वासौ पतितां स्वर्गलक्षमूल्यां मणिस्रजम् । व्रतभङ्गभयात्तस्यां न मुहुर्दृष्टिमप्यदात् ॥ ६२ ॥ युग्मम्॥**

अन्वयः-अथ स्वदेश अंते अस्मिन् सार्थे महाटव्यां विशति, अश्व आरूढः क्वचित् प्रौढ पद दंडे पुरः व्रजन्, ॥ ६१ ॥ असौ स्वर्ण लक्ष मूल्यां मणि स्रजं पतितां दृष्ट्वा व्रत भंग भयात् तस्यां मुहुः दृष्टिं अपि न अदात्. ॥ ६२ ॥ युग्मं ॥

अर्थः—पछी पोताना देशने सीमाडे ते सार्थ घाटां जंगलमां दाखल थयाबाद, घोडापर स्वार थइने कोइक लांबी पगकेडीपर आगळ चालतांथकां, ॥ ६१ ॥ ते गुणधर क्षार्थवाहे एक लाख सोनाम्होरोनी किम्मतनी (त्यां) पडेली रत्नोनी माळा जोइने, पोताना व्रतना भंगना भयथी तेणे तेतरफ वारंवार दृष्टि पण करी नही. ॥ ६२ ॥ युग्मं ॥

**किं सार्थो याति दूरे यत् श्रूयते तुमुलोऽपि न । इत्यसौ जातहृद्दाहस्ततो वाहमवाहयत् ॥ ६३ ॥**

अन्वयः-किं सार्थः दूरे याति ? यत् तुमुलः अपि न श्रूयते, इति जात हृद् दाहः असौ ततः वाहं अवाहयत्. ॥ ६३ ॥

अर्थः—शुं सार्थ दूर दूर जाय छे ? के जेथी कंइ घोंघाट पण संभळातो नथी, एरीते मनमां खेद पामतोथको ते त्यांथी घोडाने (वेगथी आगळ) चलाववा लाग्यो. ॥ ६३ ॥

**मार्गे हरिखुरोत्खाते स्वर्णपूर्णं स भूतले । ताम्रकुम्भं निभाल्याशु व्रतभङ्गभयाद्ययौ ॥ ६४ ॥**

अन्वयः–मार्गे हरि खुर उत्खाते भूतले सः स्वर्ण पूर्णं ताम्र कुंभं निभाल्य व्रतभंग भयात् आशु ययौ. ॥ ६४ ॥

अर्थः–मार्गमां घोडानी खरीथी उखडी गयेलां पृथ्वीतलपर ते गुणधरसार्थवाह सुवर्णथी भरेला तांबाना कुंभने जोइने व्रतभंगना भयथी (ते लीधाविना) तुरत चालवा लाग्यो. ॥ ६४ ॥

**सहसाश्वे मृते पापभीरुः सोऽचिन्तयत्तदा । मम वाहयतो वाहः प्रमीतोऽयं हतोऽस्मि हा ॥ ६५ ॥**

अन्वयः–तदा सहसा अश्वे मृते पाप भीरुः सः अचिंतयत्, वाहयतः मम अयं वाहः प्रमीतः, हा! हतः अस्मि! ॥ ६५ ॥

अर्थः—एवामां अचानक घोडो मरी जवाथी पापथी डरेलो ते सार्थवाह विचारवा लाग्यो के, वेगवडे दोडाववाथी मारो आ घोडो मृत्यु पाम्यो, अरेरे! हुं तो हवे (जाणे) मार्यो गयो! ॥ ६५ ॥

**य एनं जीवयत्यश्वं ददे तस्मै निजं धनम् । इति ध्यायंश्चचालांघ्रिचारेणैष त्वराभरात् ॥ ६६ ॥**

अन्वयः–यः एनं अश्वं जीवयति, तस्मै निजं धनं ददे, इति ध्यायन् एषः त्वरा भरात् अंघ्रि चारेण चचाल. ॥ ६६ ॥

अर्थः–जे कोइ आ घोडाने जीवाडे, तेने मारुं धन आपी देउं, एम विचारतोथको ते गुणधर उतावळथी पगे चालवा लाग्यो.

**तृषातुरस्तरौ बद्धां वीक्ष्य वारिभृतां दृतिम् । कस्येयं दृतिरित्युच्चैरुच्चचार मुहुर्मुहुः ॥ ६७ ॥**

अन्वयः—तृषातुरः तरौ बद्धां वारिभृतां दृतिं वीक्ष्य, कस्य इयं दृतिः? इति मुहुः मुहुः उच्चैः उच्चचार. ॥ ६७ ॥
अर्थः—पछी तरसथी पीडायेलो ते एक वृक्षपर बांधेली जलथी भरेली मशक जोइने, आ मशक कोनी छे? एम वारंवार म्होटेथी उच्चार करवा लाग्यो. ॥ ६७ ॥

**दूरे गतस्य वैद्यस्य विभोर्वीक्षितुमौषधम्। नैवाहं ज्ञापयिष्यामि पिब तन्निर्मलं जलम् ॥ ६८ ॥**

अन्वय,—औषधं वीक्षितुं दूरे गतस्य विभोः वैद्यस्य, अहं न एव ज्ञापयिष्यामि, तत् निर्मलं जलं पिब? ॥ ६८ ॥
अर्थः—औषधी शोधवामाटे दूर निकळी गयेला, एवा मारा शेठ वैद्यनी आ मशक छे, हुं बिलकुल जणावीश नही, माटे निर्मल जल तुं पी?

**इत्यसौ शाखिशाखाग्रपञ्जरस्थशुकाननात्। आकर्ण्य कर्णौ पाणिभ्यां प्रच्छाद्य शुकमभ्यधात् ॥ ६९ ॥युग्मम्**

अन्वयः—शाखि शाखा अग्र पंजरस्थ शुक आननात् इति आकर्ण्य, पाणिभ्यां कर्णौ प्रच्छाद्य असौ शुकं अभ्यधात् ॥ ६९ ॥
अर्थः—(ते) वृक्षनी डाळीनी टोचपर बांधेलां पांजरामां रहेला शुकना मुखथी एम सांभळीने ते गुणधर बन्ने हाथवडे कर्णो ढांकीने ते शुकने कहेवा लाग्यो के, ॥ ६९ ॥ युग्मं ॥

**तृष्णा गृह्णातु मे प्राणांस्तेनादत्तं पुनः पयः। न पिबामि महापापमदत्तादानमुच्यते ॥ ७० ॥**

अन्वयः—तृष्णा मे प्राणान् गृह्णातु, पुनः तेन अदत्तं पयः न पिबामि, अदत्तादानं महापापं उच्यते. ॥ ७० ॥
अर्थः—तृषा भले मारां प्राणोने हरीले, परंतु तेणे नही दीधेलुं जल हुं पीवानो नथी, केमके अदत्तादाननुं म्होटुं पाप कहेलुं छे.

शाखाग्रादुपसंहृत्य शुकरूपं सपञ्जरम् । उत्तीर्याग्रेचरः कोऽपि नरः स्थित्वा मुदावदत् ॥ ७१ ॥

अन्वयः—सपंजरं शुक रूपं संहृत्य शाखा अग्रात् उत्तीर्य, कः अपि अग्रेचरः नरः स्थित्वा मुदा अवदत्. ॥ ७१ ॥

अर्थः—पांजरासहित ते शुकनुं रूप संहरीने, तथा डाळपरथी उतरीने, आगळ चालतो कोइक पुरुष उभो रहीने हर्षथी तेने कहेवा लाग्यो के, ॥ ७१ ॥

वैताढ्ये विपुलापुर्यां सूर्याख्यः खेचरोऽस्म्यहम् । त्वत्पुरे विशदं तातं मुनिं नन्तुं वनेऽगमम् ॥ ७२ ॥

अन्वयः—वैताढ्ये विपुला पुर्यां सूर्य आख्यः अहं खेचरः अस्मि, त्वत्पुरे तातं विशदं मुनिं नंतुं वने अगमं. ॥ ७२ ॥

अर्थः—वैताढ्य पर्वतपर विपुलानामनी नगरीमां (वसनारो) हुं सूर्यनामनो विद्याधर छुं, अने तारा नगरमां (मारा) पिता विशदनामना मुनिने वांदवामाटे हुं वनमां गयो हतो. ॥ ७२ ॥

ममासंख्यधनस्यापि परद्रव्ये हृते सुखम् । अतो मामयमुद्दिश्यादिदेशास्तेयवर्णनाम् ॥ ७३ ॥

अन्वयः—असंख्य धनस्य अपि मम पर द्रव्ये हृते सुखं, अतः मां उद्दिश्य अयं अस्तेय वर्णनां आदिदेश ॥ ७३ ॥

अर्थः—(मारीपासे) असंख्यातुं धन होवा छतां पण, मने पारकुं धन लेवाथी आनंद थाय छे, तेथी मने उद्देशीने ते मुनिराजे अस्तेयव्रतनुं वर्णन करी उपदेश आप्यो. ॥ ७३ ॥

**अदत्तादानविरतिस्त्वया चक्रे तु तत्पुरः । चिरं चिन्तितवानस्मि तदा सम्यविस्मयः ॥ ७४ ॥**

अन्वयः—त्वया तु तत्पुरः अदत्त आदान विरतिः चक्रे, तदा स स्मय विस्मयः चिरं चिंतितवान् अस्मि. ॥ ७४ ॥

अर्थः—(ते समये) तें तो तेमनी पासे अदत्तादान विरमण व्रतनो स्वीकार कर्यो, त्यारे हास्यसहित आश्चर्य पामीने में घणा काळसुधी एवो विचार कर्यो के, ॥ ७४ ॥

**दूरं देशं विशन्त्येते सार्थपाः श्रीलवार्थिनः । तत्किं दृष्टं सुखेनान्यद्रव्यं नैव हरन्त्यमी ॥ ७५ ॥**

अन्वयः—एते सार्थपाः श्रीलव अर्थिनः दूरं देशं विशंति, तत् दृष्टं अन्य द्रव्यं अमी सुखेन किं नैव हरंति ? ॥ ७५ ॥

अर्थः—ए सार्थवाहो लक्ष्मीनो लेशमात्र मेळववामाटे पण दूर दूरना देशोमां जाय छे, माटे नजरे पडेलुं परद्रव्य तो आ लोको सुखे समाधे शामाटे नहीज उपाडी ले ? ॥ ७५ ॥

**तदवश्यं करिष्येऽस्य सार्थपस्य परीक्षणम् । अदृश्येन मया प्रापि प्रस्तावस्त्वद्य पश्यता ॥ ७६ ॥**

अन्वयः—तत् अवश्यं अस्य सार्थपस्य परीक्षणं करिष्ये, अदृश्येन पश्यता मया अद्य तु प्रस्तावः प्रापि. ॥ ७६ ॥

अर्थः—माटे खरेखर आ सार्थवाहनी हुं परीक्षा करीश, एरीते अदृश्यपणे रहीने जोतांथकां मने आज तो आ प्रस्ताव प्राप्त थयो.

**नृरत्न रत्नमालां ते निधिं चाहमदर्शयम् । न जितस्त्वं तु लोभेन वस्तूनां महतामपि ॥ ७७ ॥**

अन्वयः–(हे) नृरत्न! अहं ते रत्नमालां च निधिं अदर्शयं, तु त्वं महतां वस्तूनां लोभेन अपि न जितः. ॥ ७७ ॥

अर्थः—पुरुषोमां रत्नसमान एवा हे गुणधर सार्थवाह! में तने रत्नोनी माळा तथा निधान देखाड्युं, परंतु तुं तेवी महान वस्तुओना लोभथी पण जीतायो नही. ॥ ७७ ॥

**कृत्वा वाहं मृतं पादगत्या तृष्णातुरस्य ते। मयाम्भो दर्शितं शीतं कीरप्रेरणयान्वितम्॥ ७८॥**

अन्वयः–वाहं मृतं कृत्वा पाद गत्या तृष्णातुरस्य ते मया कीर प्रेरणया अन्वितं शीतं अंभः अदर्शि. ॥ ७८ ॥

अर्थः–(वळी) घोडाने मारीने, पगे चालवाथी तृषातुर थयेला एवा तने में ते शुकनी प्रेरणासहित शीतळ जल पण देखाड्युं.

**कार्ये वर्यतमे प्रौढे प्राणरक्षणलक्षणे। लोभेन न पराभूतस्त्वमल्पस्यापि वस्तुनः॥ ७९॥**

अन्वयः–प्राण रक्षण लक्षणे प्रौढे वर्यतमे कार्ये त्वं अल्पस्य अपि वस्तुनः लोभेन न पराभूतः. ॥ ७९ ॥

अर्थः–प्राणरक्षणरूप महान् अने उत्तम कार्य आवी पडतां पण तुं स्वल्प वस्तुना लोभथी पण पराभव पामी शक्यो नही. ॥७९॥

**तमित्युक्त्वा निजान्सूर्यः खेचरानयमाह्वयत्। तत्रासीरन्नदृश्यास्ते बभूवुः प्रकटाः पुरः॥ ८०॥**

अन्वयः–इति तं उक्त्वा अयं सूर्यः निजान् खेचरान् आह्वयत्, तत्र ते अदृश्याः आसीरन्, पुरः प्रकटाः बभूवुः. ॥ ८० ॥

अर्थः—तेने एम कहीने ते सूर्य विद्याधरे पोताना (संबंधी) विद्याधरोने बोलाव्या, त्यां तेओ अदृश्य रह्या हता, तेथी तेनी आगळ आवी तेओ प्रगट थया. ॥ ८० ॥

एभिः सूर्यः समानीय मणिमालां निधिं हयम् । अन्यच्च प्रचुरं द्रव्यं सार्थपस्य पुरोऽमुचत् ॥ ८१ ॥

अन्वयः—सूर्यः एभिः मणि मालां, निधिं, हयं, च अन्यत् प्रचुरं द्रव्यं समानीय सार्थपस्य पुरः अमुचत्. ॥ ८१ ॥

अर्थः—पछी ते सूर्यविद्याधरे तेओनी मारफते ते मणिमाळा, निधान, तथा घोडो, अने बीजुं पण घणुं द्रव्य मगावीने ते सार्थवाहनी आगळ मूक्युं. ॥ ८१ ॥

सधनाश्वं तथा सार्थे सार्थेशविरहार्दिते । स निनाय जनप्रीतिकरं गुणधरं क्षणात् ॥ ८२ ॥

अन्वयः—तथा सः स धन अश्वं जन प्रीतिकरं गुणधरं क्षणात् सार्थ ईश विरह अर्दिते सार्थे निनाय. ॥ ८२ ॥

अर्थः—पछी ते विद्याधर द्रव्य तथा घोडासहित, लोकोने आनंद उपजावनारा ते गुणधर सार्थवाहने क्षणवारमां ते सार्थपतिना विरहथी पीडित थयेला ते सार्थमां लेइ गयो. ॥ ८२ ॥

किमेतद्धनमित्युक्तः सार्थपेनाथ सोऽवदत् । किंचिन्मदीयं किंचिच्च कौतुकाज्जनतो हृतम् ॥ ८३ ॥

अन्वयः—अथ एतत् धनं किं? इति सार्थपेन उक्तः सः अवदत्, किंचित् मदीयं, च किंचित् कौतुकात् जनतः हृतं. ॥ ८३ ॥

अर्थः—पछी आ धन कोनुं छे? एम सार्थवाहे कहेवाथी ते सूर्यविद्याधर बोल्यो के, आमांथी केटलुंक धन मारुं पोतानुं छे, अने केटलुंक कौतुकथी बीजानुं हरी लीधेलुं छे. ॥ ८३ ।

चौर्यं तातस्य राजर्षेर्बोधैर्मुक्तं न यन्मया । तत्त्वद्व्रतावलोकेन स्वयमेवाद्य तत्यजे ॥ ८४ ॥

अन्वयः—राजर्षेः तातस्य बोधैः मया यत् चौर्यं न मुक्तं, तत् त्वत् व्रत अवलोकेन अद्य स्वयं एव तत्यजे. ॥ ८४ ॥

अर्थः—राजर्षि पिताजीना प्रतिबोधथी पण में जे चौर्य आचरण तज्युं नहोतुं, तेने तारुं व्रत जोइने आजे में मारी मेळेज तजी दीधुं छे. ॥ ८४ ॥

इत्थं त्वं मे गुरुस्तत्तेऽर्चायामेतद्धनं कृतम् । इति जल्पपरं विद्याधरं गुणधरोऽभ्यधात् ॥ ८५ ॥

अन्वयः—इत्थं त्वं मे गुरुः, तत् ते अर्चायां एतत् धनं कृतं, इति जल्पपरं विद्याधरं गुणधरः अभ्यधात्. ॥ ८५ ॥

अर्थः—एरीते तुं मारो गुरु छे, तेथी तारां पूजनमाटे में आ द्रव्य तने भेट धर्युं छे, एम बोलता ते सूर्यविद्याधरने ते गुणधर सार्थवाहे कह्युं के, ॥ ८५ ॥

धनं यस्य हृतं यत्तत्तस्मै देहि तमश्छिदे । इत्युक्तस्तत्तथा वाक्यं सूर्यश्चक्रे स्वसेवकैः ॥ ८६ ॥

अन्वयः—यस्य यत् धनं हृतं, तत् तमः छिदे तस्मै देहि? इति उक्तः सूर्यः स्व सेवकैः तत् वाक्यं तथा चक्रे. ॥ ८६ ॥

अर्थः—जेनुं जे धन हर्युं होय, ते पापना नाशमाटे तेना मालिकने ( पाछुं ) आपी दे? एम तेणे कहेवाथी ते सूर्य विद्याधरे पोताना सेवको मारफते तेना कहेवा मुजब कर्युं. ॥ ८६ ॥

गृहाणेदं धनं मे त्वमिति जल्पंश्च खेचरः । अभाणि सार्थपेन स्वं मुक्त्वा सर्वस्वमग्रतः ॥ ८७ ॥
स्वीकुरु त्वमिदं वित्तं यन्मयेति प्रतिश्रुतम् । यो मेऽश्वं जीवयत्येनं तस्मै सर्वं ददे धनम् ॥ ८८ ॥
किंच पात्रं न दानार्हमहं तत्ते धनं ध्रुवम् । न गृह्णामीति जल्पन्तं सार्थपं खेचरो जगौ ॥ ८९ ॥

अन्वयः—च इदं धनं गृहाण? इति जल्पन् खेचरः स्वं सर्वस्वं अग्रतः मुक्त्वा सार्थपेन अभाणि, ॥ ८७ ॥ त्वं इदं वित्तं स्वीकुरु? यत् मया इति प्रतिश्रुतं, यः मे एनं अश्वं जीवयति, तस्मै सर्वं धनं ददे, ॥ ८८ ॥ किंच अहं दान अर्हं पात्रं न, तत् ते धनं ध्रुवं न गृह्णामि, इति जल्पतं सार्थपं खेचरः जगौ. ॥ ८९ ॥ त्रिभिर्विशेषकं ॥

अर्थः—हवे आ मारुं धन तुं ले? एम बोलता ते विद्याधरने, पोतानुं सघळुं धन आगळ मूकीने सार्थवाहे कह्युं के, ॥ ८७ ॥ तुं आ धन ग्रहण कर? केमके में एवी प्रतिज्ञा करी छे के, जे कोइ मारा आ घोडाने जीवाडे, तेने मारे सघळुं धन आपवुं, ॥ ८८ ॥ वळी हुं कंइं दान देवालायक पात्र नथी, माटे तारुं धन हुं खरेखर ग्रहण नही करुं, एम बोलता ते सार्थवाहने ते विद्याधरे कह्युं के,

अहं त्वदुपदेशस्य नेहानृण्यं भवे भजे । तत्स्वमायाकृते कार्ये कथं गृह्णामि ते धनम् ९०

अन्वयः—अहं त्वत् उपदेशस्य इह भवे आनृण्यं न भजे, तत् स्व मायाकृते कार्ये ते धनं कथं गृह्णामि? ॥ ९० ॥
अर्थः—हुं तारा उपदेशना बदलामां आ भवमां तो करजमुक्त थइ शकुं तेम नथी, माटे में मायाथी करेला कार्यना बदलामां हुं

तारुं धन केम लेइ शकुं? ॥ ९० ॥

**मद्धनं त्वं न गृह्णासि नाददेऽहं तु ते धनम्। ततः सार्थेश कः स्वामी श्रियामासां भविष्यति ॥ ९१ ॥**

अन्वयः-(हे) सार्थेश! मत् धनं त्वं न गृह्णासि, तु अहं ते धनं न आददे, ततः आसां श्रियां कः स्वामी भविष्यति? ॥ ९१ ॥

अर्थः-वळी हे सार्थपति! मारुं धन तुं लेतो नथी, अने हुं तारुं धन लेतो नथी, तो हवे आ लक्ष्मीनो कोण मालिक थशे? ॥९१॥

**सोऽप्याह धर्म एवैकः प्रभुस्त्रिभुवनश्रियाम्। यस्मै यस्मै प्रदत्ते स तस्य तस्य भवन्ति ताः ॥ ९२ ॥**

अन्वयः—सः अपि आह, एकः धर्मः एव त्रिभुवन श्रियां स्वामी, यस्मै यस्मै सः प्रदत्ते, तस्य तस्य ताः भवंति. ॥ ९२ ॥

अर्थः—(त्यारे) ते सार्थवाहे पण कह्युं के, एक धर्मज त्रणे भुवनोनी लक्ष्मीनो मालिक छे. केमके जेने जेने ते आपे छे, तेनी तेनी ते लक्ष्मी थाय छे. ॥ ९२ ॥

**तदेहि यावः सर्वत्र धर्मे सर्वज्ञदर्शिते। विश्वस्वामिनि विन्यस्य कृतार्थां कुर्वहे श्रियम् ॥ ९३ ॥**

अन्वयः—तत् एहि? यावः, सर्वज्ञ दर्शिते विश्व स्वामिनि सर्वत्र धर्मे श्रियं विन्यस्य कृतार्थां कुर्वहे. ॥ ९३ ॥

अर्थः-माटे चालो? आपण बन्ने जइये, अने सर्वज्ञप्रभुए देखाडेला, तथा जगतना स्वामीरूप सर्व धर्मोमां आ लक्ष्मीनो उपयोग करीने तेने आपणे कृतार्थ करीये. ॥ ९३ ॥

**वचस्यङ्गीकृते तेन खेचरेण प्रमोदिना । ददतुर्मुदितौ वित्तं सप्तक्षेत्र्यामुभौ शुभौ ॥ ९४ ॥**

अन्वयः–तेन खेचरेण प्रमोदिना वचसि अंगीकृते, मुदितौ शुभौ उभौ वित्तं सप्त क्षेत्र्यां ददतुः. ॥ ९४ ॥

अर्थः–पछी ते विद्याधरे हर्षथी तेनुं वचन स्वीकार्याबाद खुशी थयेला ते बन्ने उत्तम पुरुषोए ते (सघळुं) द्रव्य साते क्षेत्रोमां वापर्यु.

**ततो गुणधरः क्षिप्त्वा भवं धर्मैः सुखादसौ । लक्ष्मीपुञ्ज प्रभापुञ्ज पुण्यपुञ्जो भवानभूत् ॥ ९५ ॥**

अन्वयः–ततः असौ गुणधरः सुखात् धर्मैः भवं क्षिप्त्वा, (हे) प्रभापुंज! लक्ष्मीपुंज! भवान् पुण्यपुंजः अभूत्. ॥ ९५ ॥

अर्थः—पछी ते गुणधर सुखेसमाधे धर्म कार्योवडे संसारनो क्षय करीने, हे ! कांतिना समूहवाळा लक्ष्मीपुंज ! तमो पुण्योना समूहवाळा थया. ॥ ९५ ॥

**तच्छिक्षयैव सूर्योऽपि त्यक्तस्तेयो धनं ददत् । पूर्णायुः पुण्यमानेन जातोऽस्मि व्यन्तराधिपः ॥ ९६ ॥**

अन्वयः–तत् शिक्षया एव सूर्यः अपि त्यक्त स्तेयः, धनं ददत् पूर्ण आयुः पुण्य मानेन व्यंतर अधिपः जातः अस्मि. ॥ ९६ ॥

अर्थः—वळी ते गुणधरना उपदेशथीज ते सूर्य विद्याधर पण चोरी करवानुं तजीने, द्रव्यदान देतोथको, आयु संपूर्ण थये, पुण्यना प्रमाणमुजब हुं आ व्यंतरोनो स्वामी थयो छुं. ॥ ९६ ॥

**त्वद्भाग्यदेवताशक्तिनुन्नो गर्भात्प्रभृत्यपि । अपूरयं रयात्तेऽहं कालकालोचितं हितम्॥ ९७ ॥**

अन्वयः–त्वत् भाग्य देवता शक्ति नुन्नः अहं गर्भात् प्रभृति अपि, रयात् ते काल काल उचितं हितं अपूरयं. ॥ ९७ ॥

अर्थः—तारी भाग्यदेवीनी शक्तिथी प्रेरायेला एवा में छेक गर्भथी मांडीने एकदम तारुं समये समये उचित हित पूर्ण कर्युं छे.।९७।

इति व्यन्तरवागन्ते मूर्छामाप्य प्रबोधभाक् । संजातजातिस्मरणो लक्ष्मीपुञ्जः पदं मुदाम् ॥ ९८ ॥
विशुद्धं धर्ममाराध्य लब्ध्वा देवत्वमच्युते । स्तुत्यं वितत्य मर्त्यत्वं श्रेयःश्रियमशिश्रियत् ॥९९॥ युग्मम्

अन्वयः—इति व्यंतर वाक् अंते मूर्छा आप्य प्रबोधभाक् संजात जाति स्मरणः, मुदां पदं लक्ष्मीपुंजः, ॥ ९८ ॥ विशुद्धं धर्मं आराध्य, अच्युते देवत्वं लब्ध्वा, स्तुत्यं मर्त्यत्वं वितत्य श्रेयः श्रियं अशिश्रियत्. ॥ ९९ ॥ युग्मं ॥

अर्थः—ए रीते व्यंतरना वचनने अंते मूर्छा पामीने, प्रतिबोध पामी, जातिस्मरण ज्ञान प्राप्त थवाथी हर्षना स्थानरूप थयेलो ते लक्ष्मीपुंज, ॥ ९८ ॥ निर्मल धर्म आराधीने, तथा अच्युत देवलोकमां देवपणुं पामी, तथा पछी प्रशंसनीय मनुष्यभव पामीने मोक्षलक्ष्मीना आश्रयवालो थयो. ॥ ९९ ॥ युग्मं ॥

इत्याप्तसर्वलक्ष्मीकलक्ष्मीपुञ्जनिदर्शनात् । जनेन भाव्यमस्तेयव्रतशस्तेन सर्वदा ॥ ४०० ॥

अन्वयः—इति आप्त सर्व लक्ष्मीक लक्ष्मीपुंज निदर्शनात् जनेन अस्तेय व्रत शस्तेन सर्वदा भाव्यं. ॥ ४०० ॥

अर्थः—एरीते मेळवेल छे सर्व प्रकारनी लक्ष्मी जेणे, एवा ते लक्ष्मीपुंजना उदाहरणथी लोकोए अस्तेयव्रतना पालनथी हमेशां प्रशंसनीय थवुं. ॥ ४०० ॥

अस्तेयव्रतदीपस्य प्रकाशोल्लासवत्पुनः । मुक्तिवर्त्मनि पान्थानां सता ब्रह्मव्रतं मतम् ॥ १ ॥

अन्वयः—पुनः मुक्ति वर्त्मनि पांथानां सतां अस्तेय व्रत दीपस्य प्रकाश उल्लासवत् ब्रह्मव्रतं मतं. ॥ १ ॥

अर्थः—वळी मोक्षमार्गमां जता सज्जनोने अस्तेयव्रतरूपी दीपकना प्रकाशना उल्लाससरखुं ब्रह्मव्रत कहेलुं छे. ॥ १ ॥

संतोषः स्वेषु दारेषु त्यागो वा परयोषिताम् । प्रथयन्ति गृहस्थानां चतुर्थं तदणुव्रतम् ॥ २ ॥

अन्वयः—स्वेषु दारेषु संतोषः, वा पर योषितां त्यागः, तत् गृहस्थानां चतुर्थं अणुव्रतं प्रथयंति. ॥ २ ॥

अर्थः—पोतानी स्त्रीओथीज संतोष, अने परनी स्त्रीओनो जे त्याग, तेने गृहस्थोनुं चोथुं अणुव्रत कहे छे. ॥ २ ॥

येऽन्यदारपरीहारव्रततीव्रतयोद्धुराः । भयान्मोहादयो दोषा न तेषु ददते पदम् ॥ ३ ॥

अन्वयः—ये अन्य दार परीहार व्रत तीव्रतया उध्धुराः, तेषु भयात् मोह आदयः दोषाः पदं न ददते. ॥ ३ ॥

अर्थः—जे पुरुषो परस्त्रीना त्यागरूप व्रतना बळथी शूरवीर थयेला छे, तेओप्रते ( जाणे ) भयथी मोहआदिक दोषो पगलुं पण भरता नथी. ॥ ३ ॥

अहो ब्रह्मव्रतं मुक्तेः सन्मुखीकारकारणम् । गीयते नागिलस्येव विपदामुपदाहकृत् ॥ ४ ॥

अन्वयः—अहो! नागिलस्य इव विपदां उपदाहकृत् ब्रह्मव्रतं मुक्तेः सन्मुखीकार कारणं गीयते. ॥ ४ ॥

अर्थः—अहो! नागिलनीपेठे, आपदाओने बाळी नाखनारुं ब्रह्मचर्यव्रत मुक्तिने सन्मुख लाववामां कारणभूत गणाय छे. ॥ ४ ॥

**तथाहि भोजभूजानिभुजाहिपरिरक्षितम् । निधानमिव धर्मस्य पुरमस्ति महापुरम् ॥ ५ ॥**

अन्वयः—तथाहि—भोज भूजानि भुज अहि परिरक्षितं, धर्मस्य निधानं इव महापुरं पुरं अस्ति. ॥ ५ ॥

अर्थः—ते कहे छे—भोजराजाना हाथरूपी सर्पथी रक्षित थयेलुं, अने धर्मना निधानसरखुं महापुरनामनुं नगर छे. ॥ ५ ॥

**जिनेन्द्रसेवाहेवाकविवेकविकसन्मनाः । तस्मिन्विस्मयकृल्लक्ष्मीर्लक्ष्मणोऽस्ति महावणिक् ॥ ६ ॥**

अन्वयः—तस्मिन् जिनेंद्र सेवा हेवाक विवेक विकसन्मनाः, विस्मयकृत् लक्ष्मीः लक्ष्मणः महावणिक् अस्ति. ॥ ६ ॥

अर्थः—ते नगरमां जिनेंद्रप्रभुनी सेवाना उत्साहथी उत्पन्न थयेला विवेकथी प्रफुल्लित हृदयवाळो, तथा आश्चर्यकारक लक्ष्मीवाळो लक्ष्मणनामे एक म्होटो वणिक वसे छे. ॥ ६ ॥

**अभूदभूषितशुभाप्यर्हद्भक्तिविभूषिता । विवेकिनी विनीता च तस्य नन्देति नन्दिनी ॥ ७ ॥**

अन्वयः—तस्य अभूषित शुभा अपि अर्हद् भक्ति विभूषिता, विवेकिनी च विनीता नंदा इति नंदिनी. ॥ ७ ॥

अर्थः-ते वणिकने भूषणोविना शोभिती छतां पण श्रीतीर्थंकरप्रभुनी भक्तिथी अलंकृत थयेली, विवेकी तथा विनयवंत नंदानामनी पुत्री हती.

**सतीशतशिरोमाल्यमियं बाल्यविलङ्घिनी । वरावलोकिनं तातं निरातङ्कतयावदत् ॥ ८ ॥**

अन्वयः—सती शत शिरो माल्यं, बाल्य विलंघिनी इयं, वर अवलोकिनं तातं निरातंकतया अवदत्. ॥ ८ ॥

अर्थः—सेंकडोगमे सतीओनां मस्तकपर पुष्पमालासरखी, तथा बाल्यावस्थाने उल्लंघी गयेली ते नंदा (तेना) वरमाटे शोध करता एवा (पोताना) पिताने कहेवा लागी के. ॥ ८ ॥

**निरञ्जनं दशोन्मुक्तं निःस्नेहव्ययमन्वहम् । धत्ते विकम्पं दीपं यः परिणेता ममास्तु सः ॥ ९ ॥**

अन्वयः–यः निरंजनं, दशा उन्मुक्तं, निःस्नेह व्ययं, विकंपं दीपं अन्वहं धत्ते, सः मम परिणेता अस्तु. ॥ ९ ॥

अर्थः–जे पुरुष काजलविनाना, वाटरहित, तथा तेलना खर्चविनाना निष्कंप दीपकने हमेशां धारण करे, ते पुरुष मने परणी शकशे.

**इति तस्या वचः श्रेष्ठी वरेष्वनुदिनं दिशन् । अस्याः क्वाभिग्रहः पूर्य इत्यार्तश्चिन्तयाजनि ॥ १० ॥**

अन्वयः–श्रेष्ठी तस्याः इति वचः वरेषु अनुदिनं दिशन्, अस्याः अभिग्रहः क्व पूर्यः? इति चिंतया आर्तः अजनि. ॥ १० ॥

अर्थः–ते लक्ष्मण शेठ तेणीनुं एरीतनु वचन वरोने हमेशां जणावतोथको, आनो (आ) अभिग्रह क्यांथी पूरो थाय? एवी चिंताथी दुःख पामवा लाग्यो. ॥ १० ॥

**नागिलः कान्तकायस्तु कितवो लङ्घनैर्घनैः । तुष्टं यक्षं विरूपाक्षं वनेऽभ्यर्थयताग्रहात् ॥ ११ ॥**

अन्वयः–तु कांत कायः नागिलः कितवः घनैः लंघनैः तुष्टं वने विरूपाक्षं यक्षं आग्रहात् अभ्यर्थयत. ॥ ११ ॥

अर्थः–एवामां मनोहर शरीरवाळो ( कोइक ) नागिलनामनो धूर्त घणी लांघणोथी तुष्टमान थयेला वनमां रहेला विरूपाक्ष नाम-

ना यक्षने आग्रहपूर्वक प्रार्थना करवा लाग्यो के, ॥ ११ ॥

* नन्दयोक्तो यथा दीपस्त्वं तथा भव मद्गृहे । इति यक्षेण दत्तेऽर्थे स ययौ श्रेष्ठिनोऽन्तिके ॥ १२ ॥

अन्वयः—यथा नंदया दीपः उक्तः, तथा त्वं मद्गृहे भव? इति यक्षेण अर्थे दत्ते, सः श्रेष्ठिनः अंतिके ययौ. ॥ १२ ॥

अर्थः—जेवो नंदाए दीपक कहेलो छे, तेवा दीपकतरीके तुं मारा घरमां रहे? पछी तेवीरीतनो वर यक्षे आपवाथी ते नागिल लक्ष्मणशेठपासे गयो. ॥ १२ ॥

कितवाय दरिद्राय नन्दिनीं स्वां ददासि मे । अभिग्रहमहं तस्या हन्त पूरयितुं क्षमः ॥ १३ ॥

अन्वयः–दरिद्राय कितवाय मे स्वां नंदिनीं ददासि, हंत अहं तस्याः अभिग्रहं पूरयितुं क्षमः ॥ १३ ॥

अर्थः–( अने कहेवा लाग्यो के ) दरिद्र तथा धूर्त एवा मने जो तारी दीकरी आपे, तो खरेखर हुं तेणीनो अभिग्रह संपूर्ण करवाने समर्थ छुं. ॥ १३ ॥

यादृक्तादृग्भवेस्त्वं भोः पूरिताभिग्रहो यदि । तत्ते ददाम्यहं पुत्रीं गङ्गामिव पयोधये ॥ १४ ॥

अन्वयः–भोः यादृक् तादृक्त्वं यदि पूरित अभिग्रहः भवेः, तत् पयोधये गंगां इव, ते अहं पुत्रीं ददामि. ॥ १४ ॥

अर्थः–अरे! गमे तेवो तुं हो, परंतु जो तेणीनो अभिग्रह पूरो करे, तो महासागरप्रते गंगानीपेठे तने हुं मारी पुत्री आपुं. ।१४।

**तर्हि मद्गृहमागत्य दीपस्तादृग्विलोक्यताम् । इत्युक्ते तेन स श्रेष्ठी सकुटुम्बस्तथाकरोत् ॥ १५ ॥**

अन्वयः—तर्हि मद्गृहं आगत्य तादृग् दीपः विलोक्यतां ? इति तेन उक्ते सकुटुंबः स. श्रेष्ठी तथा अकरोत्. ॥ १५ ॥

अर्थः–त्यारे मारे घेर आवीने तेवो दीपक तमो जुओ ? एम तेणे कहेवाथी कुटुंबसहित ते शेठे तेम कर्युं. ॥ १५ ॥

**दारिद्र्योपद्रुतेऽप्यस्य गृहे तादृशमेव सः । दीपं पश्यन्सुतोद्वाहसोत्साहः प्राप संमदम् ॥ १६ ॥**

अन्वयः—दारिद्र्य उपद्रुते अपि अस्य गृहे तादृशं एव दीपं पश्यन् सः सुता उद्वाह सोत्साहः संमदं प्राप. ॥ १६ ॥

अर्थः–दरिद्रताथी वेरविखेर हालतवाळा पण तेना घरमां तेवोज दीपक जोतो एवो ते शेठ पुत्रीने परणाववाना उत्साहथी आनंद पामवा लाग्यो. ॥ १६ ॥

**तादृग्दीपसमालोककौतुकोत्तानलोचनः । जनोऽजनिष्ट नन्दा तु निरानन्दाभवत्तदा ॥ १७ ॥**

अन्वयः—तदा जनः तादृग् दीप समालोक कौतुक उत्तान लोचनः अजनिष्ट, नंदा तु निरानंदा अभवत्. ॥ १७ ॥

अर्थः–ते वखते लोको तो तेवो दीपक जोवाथी आश्चर्य चकित लोचनोवाळा थया, परंतु नंदा आनंदरहित थइ. ॥ १७ ॥

**विभवैर्भवनं तस्य विभूष्याथ वणिग्वरः । उत्सवोत्संगितपुरः पुत्रीं तेन व्यवाहयत् ॥ १८ ॥**

अन्वयः—अथ वणिग्वरः विभवैः तस्य भवनं विभूष्य उत्सव उत्संगित पुरः तेन पुत्रीं व्यवाहयत्. ॥ १८ ॥

अर्थः—पछी ते उत्तम शेठे तो समृद्धिथी ते नागिलनुं घर शणगारीने, तथा शेहेरमां पण म्होटो उत्सव करावीने ते नागिलनी साथे पोतानी पुत्रीने परणावी. ॥ १८ ॥

**परिणीयापि तां तन्वीं विवेकामृतदीर्धिकाम् । द्यूतान्न्यवर्तत न स व्यसनं कस्य सुत्यजम् ॥ १९ ॥**

अन्वयः—विवेक अमृत दीर्धिकां तां तन्वीं परिणीय अपि सः द्यूतात् न न्यवर्तत, व्यसनं कस्य सुत्यजं? ॥ १९ ॥

अर्थः—विवेकरूपी अमृतनी वावडी सरखी एवी ते नंदाने परणीने पण ते जुगार रमवाथी पाछो हठ्यो नही, केमके व्यसन तजवुं कोने सहेलुं छे ? ॥ १९ ॥

**अहारयदयं वित्तं द्यूतकारो यथा यथा । अपूरयत स श्रेष्ठी पुत्रीप्रेम्णा तथा तथा ॥ २० ॥**

अन्वयः—अयं द्यूतकारः यथा यथा वित्तं अहारयत्, तथा तथा सः श्रेष्ठी पुत्री प्रेम्णा अपूरयत. ॥ २० ॥

अर्थः—ते जुगारी नागिल जेम जेम द्रव्य हारतो गयो, तेम तेम ते शेठ पुत्रीना स्नेहने लीधे तेने द्रव्य पूरुं पाडवा लाग्यो. ॥

**हारयित्वापि वित्तानि रंत्वापि बहिरङ्गनाः । गृहं प्राप्तः स सानन्दं नन्दया पर्यचर्यत ॥ २१ ॥**

अन्वयः—वित्तानि हारयित्वा अपि, बहिः अंगनाः रंत्वा अपि, गृहं प्राप्तः सः सानंदं नंदया पर्यचर्यत. ॥ २१ ॥

अर्थः—धन हारीने, तथा बहार परस्त्रीओने भोगवीने पण घेर आवेला ते नागिलनी नंदा तो हर्षपूर्वक सेवा करती हती. २१.

अचिन्तयदिदं चैष नाहमस्या ध्रुवं प्रियः । यदित्थमपराधेऽपि मयि रोषं तनोति न ॥ २२ ॥

अन्वयः–च एषः इदं अचिंतयत्, अहं अस्याः ध्रुवं प्रियः न, यत् इत्थं अपराधे अपि मयि रोषं न तनोति. ॥ २२ ॥

अर्थः–वळी ते एम विचारवा लाग्यो के, हुं आ नंदाने खरेखर प्रिय नथी, केमके आ रीते अपराध कर्या छतां पण ते मारा पर रोष करती नथी. ॥ २२ ॥

सोऽन्यदा हारितत्रस्तः कितवेभ्यो वनेऽविशत् । दृष्ट्वात्र ज्ञानिनं साधुं पप्रच्छ रचिताञ्जलिः ॥ २३ ॥

अन्वयः–अन्यदा कितवेभ्यः हारित त्रस्तः सः वने अविशत्, अत्र ज्ञानिनं साधुं दृष्ट्वा रचित अंजलिः पप्रच्छ. ॥ २३ ॥

अर्थः—एक दिवसे हारी जवाथी जुगारीओना भयथी नाशीने ते जंगलमां चाल्यो गयो, त्यां कोइक ज्ञानी मुनिने जोइने तेणे हाथ जोडी पुछ्युं के, ॥ २३ ॥

किं सा शुभस्वभावापि धत्ते चित्ते न मां प्रिया । इति पृष्टेऽस्य योग्यत्वं ज्ञात्वा ज्ञानी मुनिर्जगौ ॥ २४ ॥

अन्वयः–शुभ स्वभावा अपि सा प्रिया, मां चित्ते किं न धत्ते? इति पृष्टे अस्य योग्यत्वं ज्ञात्वा ज्ञानी मुनिः जगौ. ॥ २४ ॥

अर्थः–उत्तम स्वभाववाळी एवी पण मारी प्रिया ते नंदा मने हृदयमां केम धारण करती नथी? एम पूछवाथी तेनुं योग्यपणुं जाणीने ते ज्ञानी मुनिराज बोल्या के, ॥ २४ ॥

सा विवेकवती कान्तमपीच्छन्ती विवेकिनम् । विवेकं तद्गुणं व्याख्यात्ताद्दग्दीपापदेशतः ॥ २५ ॥

अन्वयः—विवेकवती सा कांतं अपि विवेकिनं इच्छंती ताद्दग् दीप अपदेशतः विवेकं तद्गुणं व्याख्यात्. ॥ २५ ॥

**अर्थः**—विवेकवाळी एवी ते नंदाए पोताना स्वामीने पण विवेकवंत इच्छतां थकां, तेवी रीतना दीपकना मिषथी विवेकरूपी तेना गुणनी व्याख्या करी हती. ॥ २५ ॥

निगद्यतेऽञ्जनं माया नवतत्त्वास्थितिर्दशा । स्नेहव्ययः प्रेमभङ्गः कम्पः सम्यक्त्वखण्डनम् ॥ २६ ॥

अन्वयः–माया अंजनं, नवतत्त्व अस्थितिः दशा, प्रेम भंगः स्नेह व्ययः, सम्यक्त्व खंडनं कंपः निगद्यते. ॥ २६ ॥

**अर्थः**–(तेणीए) कपटरूपी अंजन, नव तत्वोना अज्ञानरूपी वाट, प्रेमभंगरूपी तैलनो क्षय, तथा समकीतना खंडनरूपी कंप कहेलो हतो. ॥ २६ ॥

तैर्विमुक्तं विवेकं यो धत्तेऽस्तु स पतिर्मम । इति दीपच्छलादाख्यत्पृष्टा नार्थं तु केनचित् ॥ २७ ॥

अन्वयः—तैः विमुक्तं विवेकं यः धत्ते, सः मम पतिः अस्तु, इति दीपच्छलात् आख्यत्, तु अर्थं केनचित् न पृष्टा. ॥२७॥

**अर्थः**—ते ते दूषणोथी रहित थयेला विवेकने जे धारण करतो होय, ते मारो स्वामी थाओ? एम दीपकना मिषथी तेणीए कहुं हतुं. परंतु तेनो भावार्थ कोइए (तेणीने) पूछयो नही. ॥ २७ ॥

निरञ्जनं दशोन्मुक्तमस्नेहव्ययमन्वहम् । विकम्पं दीपमेव त्वं कृतवानद्भुतं गृहे ॥ २८ ॥

अन्वयः—निरंजनं, दशा उन्मुक्तं, अस्नेह व्यर्थ, अन्वहं विकंपं अद्भुतं दीपं त्वं एव गृहे कृतवान. ॥ २८ ॥

अर्थः–अंजनविनानो, वाटरहित, तैलना खर्च विनानो, तथा हमेशां निष्कंप, अवो आश्चर्यकारक दीवो तेंज घरमां कर्यो. २८

**तादृक्षं वीक्ष्य सा दीपं सतो भग्नोत्तरा सती । ह्रिया मौनवती व्यूहे भवताप्यविवेकिना ॥ २९ ॥**

अन्वयः–तादृक्षं दीपं वीक्ष्य भग्न उत्तरा सती सा सतो ह्रिया मौनवती, अविवेकिना अपि भवता व्यूहे. ॥ २९ ॥

अर्थः–एवीरीतना दीपकने जोइने, प्रत्युत्तर आपवाने अशक्त थयेली ते नंदासतीए लज्जाथी मौन रहीने, निर्विवेकी एवो पण जे तुं, तेनी साथे लग्न कर्यां. ॥ २९ ॥

**सतीति परिणेतुस्ते हृष्टिस्थानेऽन हृष्यति । अविवेकीति सा चित्ते न धत्ते त्वां विवेकिनी ॥ ३० ॥**

अन्वयः–अथ सती इति परिणेतुः ते हृष्टिस्थाने हृष्यति, अविवेकी इति विवेकिनी सा त्वां चित्ते न धत्ते. ॥ ३० ॥

अर्थः–वळी ते सती होवाथी तने परणनारने खुशी करवामाटे ते खुशमिजाजी रहे छे, अने तुं विवेकरहित होवाथी ते विवेकी नंदा तने (पोताना) हृदयमां धारण करती नथी. ॥ ३० ॥

**साध्वादिष्टं विवेकं स स्वीचक्रेऽथ विषेषतः । व्रतं स्वदारसंतोषं जगृहे स्नेहपुष्टिदम् ॥ ३१ ॥**

अन्वयः–अथ साधु आदिष्टं विवेकं सः विशेषतः स्वीचक्रे, स्नेह पुष्टिदं स्वदार संतोषं व्रतं जगृहे. ॥ ३१ ॥

अर्थः—पछी ते मुनिराजे उपदेशेला विवेकनो तेणे विशेष प्रकारे स्वीकार कर्यो, तथा स्नेहने पुष्ट करनारां स्वदारसंतोषनामना व्रतने ग्रहण कर्युं. ॥ ३१ ॥

**मुदा गत्वा गृहे स्नात्वा पूजयित्वा जिनाधिपम् । दत्त्वा दानं सुपात्रेभ्यो बुभुजेऽसौ यथाविधि ॥ ३२ ॥**

अन्वयः—मुदा गृहे गत्वा, स्नात्वा, जिन अधिपं पूजयित्वा, सुपात्रेभ्यः दानं दत्वा असौ यथाविधि बुभुजे. ॥ ३२ ॥

अर्थः—पछी हर्षथी घेर जइ, स्नान करी, तथा जिनेश्वरप्रभुने पूजीने, अने सुपात्रोप्रत्ये दान देइने तेणे विधिपूर्वक भोजन कर्युं.

**विवेकिनमिवालोक्य मुदा कान्तमथावदत् । नन्दा मन्दाकिनीनीरशुचिना वचनेन तम् ॥ ३३ ॥**

अन्नयः—अथ विवेकिनं इव कांतं मुदा अवलोक्य नंदा मंदाकिनी नीर शुचिना वचनेन तं अवदत्. ॥ ३३ ॥

अर्थः—पछी विवेकीसरखा ( पोताना ) ते भर्तारने हर्षथी जोइने नंदा गंगाजलसरखां निर्मल वचनथी तेने कहेवा लागी के,

**जिनेन्दुसेवया शीलसलिलव्यक्तसिक्तया । अद्य मे फलितं नाथ यद्दृष्टोऽसि विवेकवान् ॥ ३४ ॥**

अन्वयः—(हे) नाथ ! शील सलिल व्यक्त सिक्तया मे जिन इंदु सेवया अद्य फलितं, यत् विवेकवान् दृष्टः असि. ॥ ३४ ॥

अर्थः—हे स्वामी ! शीलरूपी जलथी मगटरीते सींचायेली मारी जिनपूजा आजे फलीभूत थयेली छे, केमके आपने में विवेकवाळा जोया छे. ॥ ३४ ॥

**नागिलोऽपि जगौ तन्वि यन्मुक्त्वा व्यसनं मया। विवेकः स्वीकृतस्तत्र गुर्वादेशोऽस्ति कारणम् ॥३५॥**

अन्वयः—नागिलः अपि जगौ, हे तन्वि! मया यत् व्यसनं मुक्त्वा, विवेकः स्वीकृतः, तत्र गुरुआदेशः कारणं अस्ति. ॥ ३५ ॥

अर्थः—त्यारे नागिले पण कह्युं के, हे प्रिये! में जे व्यसननो त्याग करीने विवेकने स्वीकार्यो, तेमां गुरुमहाराजनो उपदेशज कारणभूत छे. ॥ ३५ ॥

**ततः प्रभृति सद्धर्मशीलप्रेमगुणैर्दृढम्। त्रिधा स्यूते तयोश्चित्ते भेजतुर्भृशमेकताम् ॥ ३६ ॥**

अन्वयः—ततः प्रभृति सद्धर्म शील प्रेमगुणैः त्रिधा दृढं तयोः चित्ते स्यूते (तौ) भृशं एकतां भेजतुः. ॥ ३६ ॥

अर्थः—त्यारथी मांडीने उत्तम धर्म, शील, अने प्रेमरूपी गुणोथी (दोराथी) त्रेवडुं मजबूतपणे तेओनुं हृदय सीवायाथी तेओ बन्ने अत्यंत ऐक्यपणु धारण करवा लाग्या. ॥ ३६ ॥

**अनन्यरूपयोर्धर्मध्यानाधीनधियोस्तयोः। आधिमुक्तहृदोः कामं कायकान्तिरवर्धत ॥ ३७ ॥**

अन्वयः—अनन्य रूपयोः, धर्म ध्यान आधीन धियोः, आधि मुक्त हृदोः तयोः काय कांतिः कामं अवर्धत. ॥ ३७ ॥

अर्थः—अनुपम रूपवाळा, धर्मध्यानने स्वाधीन बुद्धिवाळा, तथा चितारहित हृदयवाळा, एवा तेओ बन्नेना शरीरनी कांति स्वभाविकपणेज वृद्धि पामवा लागी. ॥ ३७ ॥

**कदाचिदुत्सवाकृष्टा नन्दा पितृगृहे ययौ । सुप्तः कुट्टिमकोट्यग्रे नागिलश्चन्द्रदत्तदृक् ॥ ३८ ॥**

अन्वयः—कदाचित् उत्सव आकृष्टा नंदा पितृ गृहे ययौ, नागिलः चंद्रदत्त दृक् कुट्टिम कोटि अग्रे सुप्तः, ॥ ३८ ॥

अर्थः—पछी एक दिवसे कंइंक महोत्सवप्रसंगे नंदा (पोताना) पिताने घेर गइ हती, अने नागिल चंद्रतरफ दृष्टि राखीने अगासीना अग्रभागमां सूतो हतो. ॥ ३८ ॥

**व्योम्नि विद्याधरी कापि यान्ती प्रियवियोगिनी । तद्रूपमोहतः काम रोहतः प्राप्य तं जगौ ॥ ३९ ॥**

अन्वयः—प्रिय वियोगिनी का अपि विद्याधरी व्योम्नि यांती तत् रूप मोहतः, काम रोहतः तं प्राप्य जगौ. ॥ ३९ ॥

अर्थः—एवामां भर्तारना वियोगवाळी कोइक विद्याधरी आकाशमां जती थकी, ते नागिलना रूपथी मोहित थइने, कामविकार उत्पन्न थवाथी तेनी पासे आवी कहेवा लागी के, ॥ ३९ ॥

**कामानलशिखातप्ता प्राप्तास्मि शरणं तव । स्वामिंल्लावण्यपाथोधे मां मज्जय भुजोर्मिषु ॥ ४० ॥**

अन्वयः—(हे) स्वामिन्! काम अनल शिखा तप्ता तव शरणं प्राप्ता अस्मि, (हे) लावण्य पाथोधे ! मां भुज ऊर्मिषु मज्जय ?

अर्थः—हे स्वामी ! कामरूपी अग्निनी ज्वालाथी तप्त थयेली एवी हुं आपने शरणे आवेली छुं, माटे हे लावण्यना महासागर ! मने (आपना) भुजाओरूपी मोजांओमां स्नान करावो ? ॥ ४० ॥

**प्रियास्मि हंसराजस्य विद्याधरशिरोमणेः । ततश्चित्तं त्वयाकर्षि गीतेनेव कवित्वतः ॥४१ ॥**

अन्वयः–विद्याधर शिरोमणेः हंसराजस्य प्रिया अस्मि, ततः कवित्वतः गीतेन इव त्वया चित्तं आकर्षि. ॥ ४१ ॥

अर्थः—विद्याधरोना सरदार एवा हंसराजानी हुं स्त्री छुं, अने तेथी कविताबद्ध गायनथी जेम, तेम आपे मारां हृदयनुं आकर्षण करेलुं छे. ॥ ४१ ॥

**चण्डस्य खेचरपतेः सुता लीलावतीत्यहम् । त्वयादृता भविष्यामि सत्यं लीलावती पुनः ॥ ४२ ॥**

अन्वयः–चंडस्य खेचर पतेः अहं लीलावती इति सुता अस्मि, त्वया आदृता पुनः सत्यं लीलावती भविष्यामि. ॥ ४२ ॥

अर्थः—चंडनामना विद्याधरोना स्वामीनी हुं लीलावती नामनी पुत्री छुं, अने आपना स्वीकारथी तो हुं खरेखरी विलासवती (कामविलास भोगवनारी) थवानी छुं. ॥ ४२ ॥

**नाङ्गीकरोषि चेत्तन्मां मृत्युरङ्गीकरिष्यति । तद्भविष्यसि धर्मज्ञ किं न स्त्रीघातपातकी ॥ ४३ ॥**

अन्वयः–चेत् मां न अंगीकरोषि, मृत्युः अंगीकरिष्यति, तत् (हे) धर्मज्ञ! किं (त्वं) स्त्री घात पातकी न भविष्यसि? ॥४३॥

अर्थः—(हवे) जो मने आप अंगीकार नही करो, तो मरण मारो स्वीकार करशे, माटे हे! नीतीज्ञ! (तेथी) शुं तमो स्त्रीहत्याना पापवाळा नही थाओ? ॥ ४३ ॥

रहस्यं वेद्मि विद्यानां कामितुश्च पितुश्च तत् । तौ जित्वा तेन तत्स्वाम्यं तव दास्यामि मां भज ॥४४॥

अन्वयः—च कामितुः च पितुः विद्यानां तत् रहस्यं वेद्मि, तेन तौ जित्वा तव तत् स्वाम्यं दास्यामि, मां भज? ॥ ४४ ॥

अर्थः—वळी मारा स्वामिनी तथा पितानी विद्याओना ते रहस्यने पण हुं जाणुं छुं, अने तेथी तेओने जीतीने आपने तेओनुं राज्य आपीश, माटे मने स्वीकारो? ॥ ४४ ॥

मान्यथा मद्वचः कार्षीरित्युक्त्वासौ कुरङ्गदृक् । कम्पमाना क्रमौ तस्य मूर्ध्ना स्प्रष्टुमधावत ॥ ४५ ॥

अन्वयः—मद् वचः अन्यथा मा कार्षीः, इति उक्त्वा असौ कुरंगदृक् कंपमाना तस्य क्रमौ मूर्ध्ना स्प्रष्टुं अधावत. ॥ ४५ ॥

अर्थः-हवे मारां वचननो आप अनादर करशो नही, एम कहीने ते हरिणाक्षी कंपतीथकी ते नागिलना चरणोने (पोताना) मस्तकथी स्पर्श करवाने दोडी. ॥ ४५ ॥

मा भूत्परस्त्रीस्पर्शोऽपि ममेत्याशु स नागिलः । ततश्चकर्ष चरणौ दह्यमानाविवाग्निना ॥ ४६ ॥

अन्वयः-मम परस्त्री स्पर्शः अपि माभूत्, इति आशु सः नागिलः, अग्निना दह्यमानौ इव चरणौ ततः चकर्ष. ॥ ४६ ॥

अर्थः-मने परस्त्रीनो स्पर्श पण थवो जोइये नही, एम विचारीने तुरत ते नागिले, जाणे अग्निथी बळता होय नही! एम विचारीने (पोताना) पग त्यांथी खेंची लीधा. ॥ ४६ ॥

**क्रुद्धाथ व्योम्नि तप्तायोगोलं लोलं विकृत्य सा । भज मामन्यथानेन भस्मयामीत्युवाच तम् ॥४७॥**

अन्वयः–अथ क्रुद्धा सा व्योम्नि तप्त अयः गोलं विकृत्य, मां भज? अन्यथा अनेन भस्मयामि, इति तं उवाच. ॥ ४७ ॥

अर्थः–त्यारे क्रोध पामेली ते विद्याधरी आकाशमां तपावेलो लोखंडनो गोळो विकुर्वीने, मारी साथे विलास कर? नहितर आ गोळाथी तने भस्मीभूत करी नाखुं छुं, एम तेणीए ते नागिलने कह्युं. ॥ ४७ ॥

**अलुभ्यतो लोभवाक्याद्भीतिस्थानादबिभ्यतः । सूत्कारी स ज्वलन् गोलस्तस्याथो मौलयेऽपतत् ॥४८॥**

अन्वयः–अथो लोभ वाक्यात् अलुभ्यतः, भीति स्थानात् अबिभ्यतः तस्य मौलये स. सूत्कारी ज्वलन् गोलः अपतत्. ॥४८॥

अर्थः—पछी (ए रीतनां तेणीना) लोभना वाक्योथी नही लोभाता, तेमज भयनी धमकीथी पण नही डरता एवा ते नागिलना मस्तकपर ते सूत्कार करतो बळतो गोळो पड्यो. ॥ ४८ ॥

**दग्धो दग्धोऽयमित्यन्तर्ध्यायन्त्यां खेचरस्त्रियाम् । स सस्मार नमस्कारं विलीनश्च विपच्चयः ॥ ४९ ॥**

अन्वयः–अयं दग्धः दग्धः, इति खेचर स्त्रियां अंतः ध्यायंत्यां, सः नमस्कारं सस्मार, च विपत् चयः विलीनः ॥ ४९ ॥

अर्थः–(अरे!) आ बळ्यो, बळ्यो, एम ते विद्याधरी मनमां विचारती हती, एवामां ते नागिले नवकारमंत्रनुं स्मरण कर्युं, अने तेथी ते आपदाओनो समूह नष्ट थयो. ॥ ४९ ॥

**अथ प्रापददृश्यत्वं त्रपाटोपेन खेचरी । नागिलोऽभून्नमस्कारप्रभावोत्पुलकः पुनः ॥ ५० ॥**

अन्वयः–अथ त्रपा आटोपेन खेचरी अदृश्यत्वं मापत्, पुनः नागिल. नमस्कार प्रभाव उत्पुलकः अभूत्. ॥ ५० ॥

अर्थः–त्यारे शरमनी मारी ते विद्याधरी अदृश्य थइ, अने ते नागिल तो नवकारमंत्रना माहात्म्यथी रोमांचित थयो. ॥ ५० ॥

**न रतिः पितृगेहेऽपि त्वां विनेत्यादिवादिनी । चेटिकोद्घाटितद्वारा तदा नन्दा तमाययौ ॥ ५१ ॥**

अन्वयः–त्वां विना पितृगेहे अपि रतिः न, इत्यादि वादिनी, चेटिका उद्घाटित द्वारा नंदा तदा तं आययौ. ॥ ५१ ॥

अर्थः–तमारा विना मने (मारा) पिताने घेर चेन पडतुं नथी, इत्यादिरूप वचनो बोलती, तथा दासीए उघाडेलुं छे द्वार जेणीने एवी ते नंदा ते वखते तेनी पासे आवी. ॥ ५१ ।

**आकारेण गिरा गत्या तां नन्दां स विदन्नपि । खेचरीविप्लवाशङ्की संकोर्णस्थोऽवदत्ततः ॥ ५२ ॥**

अन्वयः–ततः आकारेण, गिरा, गत्या तां नंदां विदन् अपि सः खेचरी विप्लव आशंकी संकीर्ण स्थः अवदत्. ॥ ५२ ॥

अर्थः–पछी आकारथी, वाणीथी, तथा गतिथी तेणीने नंदा जाणतां छतां तण, ते नागिल विद्याधरीना कावतरांनी शंका लावीने संकडामणथी संकोचाइ रहीने बोलवा लाग्यो के, ॥ ५२ ॥

**अरविन्दाक्षि नन्दासि यदि तूर्णं तदेहि माम् । अन्यासि यदि तद्धर्मः स्वाम्यस्तु स्खलनं तव ॥५३॥**

अन्वयः–(हे) अरविंदाक्षि! यदि नंदा असि, तत् तूर्णं मां एहि? यदि अन्या असि, तत् धर्मः स्वामी अस्तु, तव स्खलनं.

अर्थः–हे कमलाक्षी! जो तुं नंदा हो, तो तुरत मारी पासे आव? अने जो कोइ बीजी हो, तो धर्म मारुं रक्षण करनार थाओ? अने तारुं स्तंभन थाओ? ॥ ५३ ॥

**ततः स्थितस्वरूपैव खेचरी सा स्खलद्गतिः । तद्वृत्तविस्मयस्तब्धमूर्तिरेवाग्रतः स्थिता ॥ ५४ ॥**

अन्वयः–ततः स्खलत् गतिः, तद् वृत्त विस्मय स्तब्ध मूर्तिः एव, सा खेचरी स्थित स्वरूपा एव स्थिता. ॥ ५४ ॥

अर्थः–पछी अटकाइ गयेल गतिवाळी, तथा तेना व्रतथी आश्चर्ययुक्त स्तब्ध थयेला आकारवाळीज ते विद्याधरी पोताना खरा स्वरूपमांज रहीने (त्यां) स्तंभाइ गइ. ॥ ५४ ॥

**स तत्तत्कपटं वीक्ष्य कपटान्तरशङ्कितः । कृतलोचः स्वयं भेजे शीलभङ्गभयाद् व्रतम् ॥ ५५ ॥**

अन्वयः– सः तत् तत् कपटं वीक्ष्य कपट अंतर शंकितः कृत लोचः शील भंग भयात् स्वयं व्रतं भेजे. ॥ ५५ ॥

अर्थः–पछी ते नागिले तेणीनुं ते कपट जोइने, बीजां कोइ कपटनी शंकाथी लोच करीने शीलभंगना डरथी पोतानी मेळेज (त्यां) चारित्र अंगीकार कर्युं. ॥ ५५ ॥

**दत्तं शासनदेव्याथ यतिवेषं स धारयन् । तत्प्रदीपपुरोभागमागत्येदमभाषत ॥ ५६ ॥**

अन्वयः–अथ शासन देव्या दत्तं यतिवेषं धारयन् सः, तत् प्रदीप पुरः भागं आगत्य इदं अभाषत. ॥ ५६ ॥

अर्थः—पछी शासनदेवताए आपेला मुनिवेषने धारण करनारो ते नागिल ते दीपकनीपासे आवीने आ प्रमाणे कहेवा लाग्यो के,

आराध्य नन्दालोभेन नीतोऽस्यद्भुतदीपताम् । अयि यक्ष विरूपाक्ष कृतकृत्योऽस्मि गम्यताम् ॥५७॥

अन्वयः—अयि! विरूपाक्ष यक्ष! नंदा लोभेन आराध्य अद्भुत दीपतां नीतः असि, कृत कृत्यः अस्मि, गम्यतां ? ॥ ५७ ॥
अर्थः—हे विरूपाक्ष यक्ष! नंदाने मेळववानी लालचथी ( तारुं ) आराधन करीने, तने आश्चर्यकारक दीपकपणाने में प्राप्त करेलो छे, हवे हुं कृतार्थ थयो छुं, माटे तुं चाल्यो जा? ॥ ५७ ॥

दीपतोऽप्यथ भाषाभूत्सेव्यो यावद्भवं भवान् । रवेरिव न मे भाभिः स्पर्शदोषः प्रभो भवेत् ॥ ५८ ॥

अन्वयः—अथ दीपतः अपि भाषा अभूत्, (हे) प्रभो ! यावद् भवं भवान् सेव्यः, रवेः इव मे भाभिः स्पर्शदोषः न भवेत्.
अर्थः—त्यारे ते दीपकमांथी पण एवी वाणी थइ के, हे स्वामी! छेक जींदगीपर्यंत मारे तारी सेवा करवानी छे, तथा सूर्यनी कांतिनीपेठे मारी कांतिथी पण तमोने स्पर्शदोष लागवानो नथी. ॥ ५८ ॥

अथ तादृग्महाशीलप्रीतया स्फीतविद्यया । विद्याधर्या प्रतिपदं क्रियमाणप्रभावनः ॥ ५९ ॥
तथाविधकथाबोधवर्धमानप्रमोदया । व्रतध्यानगलत्पापकन्दया नन्दयान्वितः ॥ ६० ॥
भानूदयेऽप्यविभ्रष्टभासा दीपेन भासुरः । साश्चर्यमेष लोकेनालोक्यमानो गुरुं ययौ ॥ ६१ ॥

अन्वयः—अथ तादृग् महाशील प्रीतया, स्फीत विद्यया, विद्याधर्या प्रतिपद क्रियमाण प्रभावनः, ॥५९॥ तथाविध कथा बो-

ध वर्धमान प्रमोदया, व्रत ध्यान लगत् पाप कंदया नंदया अन्वितः, ॥ ६० ॥ भानु उदये अपि अविभ्रष्ट भासा दीपेन भासुरः, लोकेन स आश्चर्य आलोक्यमानः एषः गुरुं ययौ. ॥ ६१ ॥ त्रिभिर्विशेषकं ॥

अर्थः-हवे तेवी रीतना ते नागिलना महान शीलथी खुशी थयेली, अने विस्तीर्ण विद्यावाळी ते विद्याधरीए पगले पगले करेलो छे महिमा जेनो, ॥ ५९ ॥ तथा तेवी रीतनुं वृत्तांत जाणवाथी वृद्धि पामता हर्षवाळी, अने चारित्र लेवानी इच्छाथी दूर थतां छे पापनां मूळो जेनां एवी ते नंदाथी युक्त थयेलो, ॥ ६० ॥ अने सूर्य उग्या छतां पण अस्खलित कांतिवाळा दीपकथी देदीप्यमान थयेलो, तथा लोकोवडे आश्चर्य सहित जोवातो एवो ते नागिल गुरुमहाराज पासे गयो. ॥ ६१ ॥ त्रिभिर्विशेषकं ॥

**व्रतं नन्दायुतः प्राप्य विधिवद् गुरुसंगतः । विजहार महारण्यारामग्रामपुरादिषु ॥ ६२ ॥**

अन्वयः-गुरु संगतः (स.) नंदा युतः विधिवत् व्रतं प्राप्य महारण्य आराम ग्राम पुर आदिषु विजहार. ॥ ६२ ॥

अर्थ-(त्यां) गुरुमहाराजने मळीने ते नागिल नंदा सहित विधिपूर्वक चारित्र लेइने महोटां जंगलो, बगीचा, गांवडां तथा नगरआदिकोमां विहार करवा लाग्यो. ॥ ६२ ॥

**निशास्वपि प्रदीपस्य तस्योद्योते ततः पठन् । ज्ञातज्ञातव्यपूरोऽयमल्पैरेव दिनैरभूत् ॥ ६३ ॥**

अन्वयः—ततः निशासु अपि तस्य प्रदीपस्य उद्योते पठन् अयं स्वल्पैः एव दिनैः ज्ञात ज्ञातव्य पूरः अभूत्. ॥ ६३ ॥

अर्थः-पछी रात्रिए पण ते दीपकना प्रकाशमां अभ्यास करता एवा ते नागिलमुनि थोडाज दिवसोमां जाणवालायक ज्ञानना

समूहना जाणकार थया. ॥ ६३ ॥

**बद्धायुः संयमात्पूर्वं मृत्वासौ स्नेहवांस्तया । हरिवर्षे युगलतां ययौ कल्पतरोस्तले ॥ ६४ ॥**

अन्वयः–संयमात् पूर्वं बद्ध आयुः तया स्नेहवान् असौ मृत्वा हरि वर्षे कल्पतरोः तले युगलतां ययौ. ॥ ६४ ॥

अर्थः–चारित्र लीधा पेहेलांज पूर्वे बांधेलां आयुवाळा, अने ते नंदासाथेना स्नेहवाळा ते नागिलमुनि मृत्यु पामीने हरिवर्ष क्षेत्रमां कल्पवृक्षनी नीचे युगलिकपणुं पाम्या. ॥ ६४ ॥

**तद्द्वयं भाग्यशेषेण भुक्त्वा भोगोत्सवं दिवः । क्षेत्रे महाविदेहाख्ये मर्त्यीभूयाप निर्वृतिम् ॥ ६५ ॥**

अन्वयः—तद् द्वयं भाग्य शेषेण दिवः भोग उत्सवं भुक्त्वा महाविदेह आख्ये क्षेत्रे मर्त्यीभूय निर्वृतिं आप. ॥ ६५ ॥

अर्थः–पछी तेओ बन्ने बाकीना भाग्यवडे दैविक भोगोनो उत्सव भोगवीने महाविदेहनामना क्षेत्रमां मनुष्य थइ मोक्ष पाम्या.

**अतो नागिलनन्दावदानन्दाद्वैततत्परैः । धार्यं तुर्यव्रतं दक्षैर्धर्मवृक्षैकवर्षणम् ॥ ६६ ॥**

अन्वयः–अतः नागिल नंदावत् आनंद अद्वैत तत्परैः दक्षैः धर्म वृक्ष एक वर्षणं तुर्यं व्रतं धार्यं. ॥ ६६ ॥

अर्थः–माटे नागिल अने नंदानी पेठे आनंदमांज फक्त तत्पर थयेला चतुर माणसोए धर्मरूपी वृक्ष माटे वरसाद सरखां चोथा व्रतने धारण करवुं. ॥ ६६ ॥

॥ ए रीते चोथा व्रतना विचारना संबंधमां नागिलनी कथा कही.

ईदृक्चतुर्व्रतीरूपनिरूपणसुदर्पणम् । पञ्चमं तु व्रतं धीराः कलयन्त्वतिनिर्मलम् ॥ ६७ ॥

अन्वयः-धीराः ईदृक् चतुर्व्रतीरूप निरूपण दर्पणं, अतिनिर्मल पंचमं व्रतं तु कलयंतु ? ॥ ६७ ॥

अर्थः—धीर पुरुषोए ए रीतनां चारे व्रतोनुं स्वरूप जोवामाटे दर्पणसरखा, अने अत्यंत निर्मल पांचमा (परिग्रहपरिमाण) नामना व्रतनो स्वीकार करवो. ॥ ६७ ॥

असंतोषादिदोषाहिमोहहालाहलामृतम् । परिग्रहस्य मानं यत् तत्पञ्चममणुव्रतम् ॥ ६८ ॥

अन्वयः—असंतोष आदि दोष अहिमोह हालाहल अमृतं, परिग्रहस्य यत् मानं तत् पंचमं अणुव्रतं. ॥ ६८ ॥

अर्थः—असंतोष आदि दोषोरूपी सर्पसरखा मोहनुं झेर उतरवामां अमृतसरखुं परिग्रहनुं जे प्रमाण करवुं, तेने पांचमुं अणुव्रत जाणवुं.

क्रूरात्मसंसृतिवधूचकितस्य मनीषिणः । मुक्तिसीमन्तिनीमेलसंकेतस्थानलक्षणम् ॥ ६९ ॥

परिग्रहप्रमाणाख्यव्रतकल्पद्रुरद्भुतः । निषिध्यमानमप्यर्थं दद्याद्विद्यापतेरिव ॥ ७० ॥ युग्मम् ॥

अन्वयः-क्रूर आत्म संसृति वधू चकितस्य मनीषिणः मुक्ति सीमंतिनी मेल संकेत स्थान लक्षणं ॥ ६९ ॥ परिग्रह प्रमाण आख्य व्रतकल्पद्रुः अद्भुतः विद्यापतेः इव निषिध्यमानं अपि अर्थं दद्यात्. ॥ ७० ॥ युग्मं ॥

अर्थः—अति भयंकर सांसारिक स्त्रीथी डरेला बुद्धिवानने मुक्तिरूपी स्त्रीनो समागम कराववाने संकेत करेलां स्थानसरखुं, ॥६९॥

सान्वय भाषांतर ॥१४२९॥

एवुं जे परिग्रहप्रमाण नामनुं व्रत, तेरूपी वृक्ष अश्चर्यकारक छे, केमके ते विद्यापतिनीपेठे निवारण कर्या छतां पण लक्ष्मी आपे छे.

**श्राद्धाः शृणुत तद्वृत्तमभूदुद्वृत्तवैभवः । धनी विद्यापतिरिति ख्यातः पोतनपत्तने ॥ ७१ ॥**

अन्वयः(हे) श्राद्धाः! तद् वृत्तं शृणुत? पोतन पत्तने ख्यातः उद्वृत्त वैभवः विद्यापतिः इति धनी. ॥ ७१ ॥

अर्थ,—हे श्रावको! ते विद्यापतिनुं वृत्तांत सांभळो? पोतनपुरनामना नगरमां प्रख्यात, अने वैभवशाली विद्यापतिनामे एक धनवान व्यापारी वसतो हतो. ॥ ७१ ॥

**सर्वज्ञसेवकोऽप्येष निजसद्मश्रियामपि । संख्यार्तिं ज्ञातवान्नैव ज्योतिषी ज्योतिषामिव ॥ ७२ ॥**

अन्वयः—ज्योतिषां ज्योतिषी इव, सर्वज्ञ सेवकः अपि एषः निजसद्म श्रियां संख्यार्तिं अपि न एव ज्ञातवान्. ॥ ७२ ॥

अर्थः—ताराओनी संख्या जेम ज्योतिषी ( पण जाणी शके नहीं ) तेम सर्वज्ञप्रभुनो सेवक छतां पण ते विद्यापति शेठ पोताना घरमां रहेली लक्ष्मीनी संख्या पण जाणतोज न्होतो. ॥ ७२ ॥

**तस्याजनिष्ट गृहिणी स्पृहणीयगुणोदया । जिनेशशासनाम्भोजभृङ्गी शृङ्गारसुन्दरी ॥ ७३ ॥**

अन्वयः—स्पृहणीय गुण उदया, जिन ईश शासन अंभोज भृंगी शृगार सुंदरी तस्य गृहिणी अजनिष्ट. ॥ ७३ ॥

अर्थः—इच्छवालायक गुणोना उदयवाळी, तथा जिनेश्वरप्रभुना शासनरूपी कमलप्रते भमरीसरखी, शृंगारसुंदरीनामनी तेनी स्त्री हती.

सप्तक्षेत्र्यां वपन्वित्तमनन्तगुणलाभधीः । प्रयत्नेन यथाकालं वृषपोषं चकार सः ॥ ७४ ॥

अन्वयः–अनंत गुण लाभ धीः सः प्रयत्नेन सप्त क्षेत्र्यां वित्तं वपन् यथाकालं वृष पोषं चकार. ॥ ७४ ॥

अर्थः–अनंत गुणोनो लाभ मेळववानी बुद्धिवाळो ते विद्यापतिशेठ यत्नपूर्वक साते क्षेत्रोमां धन वावतोथको योग्य योग्य समये धर्मनुं ( पक्षे–वृषभनुं ) पोषण करतो हतो. ॥ ७४ ॥

धनमर्जयतो नित्यमृणं तर्जयतः सताम् । धर्मं कल्पयतः काममघमल्पयतः परम् ॥ ७५ ॥

सुखोर्मिमयमेवोच्चैरह्नां गमयतो गणम् । स्वप्ने कापि कदापि स्त्री पुरस्तस्येदमभ्यधात् ॥७६॥ युग्मम् ॥

अन्वयः–नित्यं धनं अर्जयतः, सतां ऋणं तर्जयतः, कामं धर्मं कल्पयतः, परं अघं अल्पयतः, ॥ ७५ ॥ उच्चैः सुख ऊर्मिमयं अह्नां गणं गमयतः, तस्य पुरः कदा अपि का अपि स्त्री स्वप्ने इदं अभ्यधात्. ॥ ७६ ॥ युग्मं ॥

अर्थः–हमेशां धन मेळवता, सज्जनोना करजने दूर करता, सारीरीते धर्मकार्यो करता, महान पापोने स्वल्प करता, ॥ ७५ ॥ उमदां सुखोना मोजांमय दिवसोना समूहने व्यतीत करता, एवा ते विद्यापति शेठनी पासे एक दिवसे कोइक स्त्री ( आवीने ) तेने स्वप्नमां कहेवा लागी के, ॥ ७६ ॥ युग्मं ॥

श्रीरहं त्वद्गुणश्रेणिवशेति त्वां ब्रवीम्यतः । कृष्टा दैवेन यास्यामि त्वद्गृहाद्दशमेऽहनि ॥ ७७ ॥

अन्वयः—त्वत् गुण श्रेणि वशा अहं श्रीः त्वां इति ब्रवीमि, अतः दशमे अहनि दैवेन कृष्टा त्वद् गृहात् यास्यामि. ॥ ७७ ॥

अर्थः—तमारा गुणोनी पंक्तिने वश थयेली हुं लक्ष्मीदेवी तमोने एम कहुं छुं के आजथी दशमे दिवसे दैवयोगे खेंचाइने तमारा घरमांथी चाली जवानी छुं. ॥ ७७ ॥

**अथोन्निद्रं दरिद्रोऽहं भविष्यामीति दुःखितम् । तमुवाच करद्वन्द्वशृङ्गा शृङ्गारसुन्दरी ॥ ७८ ॥**

अन्वयः—अथ उन्निद्रं, अहं दरिद्रः भविष्यामि, इति दुःखितं तं, करद्वंद्व शृंगा शृंगारसुंदरी उवाच. ॥ ७८ ॥

अर्थः—पछी जागी उठेला, तथा (हवे) हुं दरिद्र थइ जइश, एवी चिंताथी दुःखी थयेला एवा ते (पोताना स्वामीने) शृंगारसुंदरी मस्तकपर बन्ने हाथ जोडीने कहेवा लागी के, ॥ ७८ ॥

**रवे रथ इव ध्वान्तं तव मालिन्यमानने । अश्रुतादृष्टपूर्वं यत्तत्किमद्य विलोक्यते ॥ ७९ ॥**

अन्वयः—रवेः रथे ध्वांतं इव, यत् अश्रुत अदृष्ट पूर्वं, तत् मालिन्यं अद्य तव आनने किं विलोक्यते? ॥ ७९ ॥

अर्थः—हे (स्वामि!) सूर्यना रथमां अंधकारनी पेठे, जे पूर्वे सांभळ्युं के जोयुं नथी, ते मलीनपणुं आजे आपना मुखपर केम देखाय छे? ॥ ७९ ॥

**त्वया कृतास्मि स्नेहेन सुखसर्वस्वभागिनी । दुःखभागप्रदानेऽद्य किं मां वञ्चयसि प्रभो ॥ ८० ॥**

अन्वयः–(हे) प्रभो! त्वया स्नेहेन सुख सर्वस्व भागिनी कृता अस्मि, अद्य दुःख भाग प्रदाने मां किं वंचयसि? ॥ ८० ॥

अर्थः–हे स्वामी! आपे स्नेहवडे (मने) सर्व प्रकारना सुखोनी भागीदार करेली छे, आजे आ दुःखनो भाग देवामां मने शा माटे आप ठगो छो? ॥ ८० ॥

**पत्या स्वप्नस्वरूपेऽथ कथिते प्रथितस्मिता । सा पुनर्भारतीं भेजे विवेकामृतसारणीम् ॥ ८१ ॥**

अन्वयः—अथ पत्या स्वप्न स्वरूपे कथिते प्रथित स्मिता सा पुनः विवेक अमृत सारणीं भारतीं भेजे. ॥ ८१ ॥

अर्थः–पछी पतिए ते स्वप्ननुं स्वरूप कहेवाथी हास्य करती एवी ते शृंगारसुंदरी तो विवेकरूपी अमृतनी नीकसरखी वाणी बोलवा लागी के, ॥ ८१ ॥

**निर्वाणमार्गसंचारचरणस्खलशृङ्खला । हृच्छल्यं श्रीः सतां भोगफलकर्मचिरस्थिरा ॥ ८२ ॥**

अन्वयः–निर्वाण मार्ग संचार चरण स्खल शृंखला, भोग फल कर्म चिर स्थिरा श्रीः सतां हृत् शल्यं. ॥ ८२ ॥

अर्थः–मोक्षमार्गमां चालवाने पगने अटकावनारी बेडीसरखी. तथा भोगावली कर्मोना उदयथी घणो काळ स्थिर रहेती एवी ते लक्ष्मी सज्जनोना हृदयमां शल्यभूतज होय छे. ॥ ८२ ॥

**मदयेन्मदिरेव श्रीर्यदि सा याति यातु तत् । विवेक एक एव त्वां मा मुंचन्मदमर्दनः ॥ ८३ ॥**

अन्वयः–श्रीः मदिरा इव मदयेत्, सा याति तत् यातु? मद मर्दनः एकः विवेकः एव त्वां मा अमुंचत्. ॥ ८३ ॥

अर्थः—लक्ष्मी मदिरानीपेठे (माणसोने) उन्मत्त करे छे, माटे ते कदाच जती होय तो तेने जवाद्यो? परंतु मदने नाश करनारो फक्त एक विवेकज तमोने तजो नही. ॥ ८३ ॥

**पात्रदानं फलं लक्ष्म्यास्तद् गृहीतं बहु त्वया । फलं संप्रति दौःस्थ्यस्य तपो ग्राह्यं ततोऽधिकम् ॥८४॥**

अन्वयः—लक्ष्म्याः फलं पात्र दानं, तत् त्वया बहु गृहीतं, संप्रति ततः अधिकं दौःस्थ्यस्य फलं तपः ग्राह्यं. ॥ ८४ ॥

अर्थः—लक्ष्मीनुं फल सुपात्रदान छे, अने ते तमोए घणुं मेळव्युं छे, हवे तेथी अधिक दरिद्रताना फलरूप तपने ग्रहण करवो.

**मुक्तिमार्गावृतिर्लक्ष्मीर्भाग्यैस्ते भङ्गमेति चेत् । तत्किं हर्षपदे नाथ दुःखं भजसि निर्भरम् ॥ ८५ ॥**

अन्वयः-(हे) नाथ! मुक्ति मार्ग आवृतिः लक्ष्मीः चेत् ते भाग्यैः भंगं एति, तत् हर्ष पदे निर्भरं दुःखं किं भजसि? ॥ ८५ ॥

अर्थः-हे स्वामी! मोक्षमार्गने आच्छादित करनारी ( वाडसरखी ) लक्ष्मी कदाच आपना सुभाग्ये नष्ट थाय छे, तो एवा हर्षने स्थानके आप अति कष्ट शामाटे धारण करो छो? ॥ ८५ ॥

**गमिष्यति कथं वा श्रीर्दासेरी दशमेऽहनि । स्वायत्तैव सती सप्तक्षेत्र्यामद्यैव रोप्यताम् ॥ ८६ ॥**

अन्वयः-वा दासेरी श्रीः दशमे अहनि कथं गमिष्यति? स्व आयत्ता सती अद्य एव सप्त क्षेत्र्यां रोप्यतां? ॥ ८६ ॥

अर्थः-अथवा उंटडीसरखी आ लक्ष्मी दशमे दिवसे क्यांथी जइ शकशे? ( हालतो ) आपणा स्वाधीनमां छे, माटे आजेज तेणीने साते क्षेत्रोमां वावीद्यो? ॥ ८६ ॥

परिग्रहप्रमाणाख्यमङ्गीकृत्य व्रतं ततः । स्थीयते नीयते चैष कालः संतोषपोषकः ॥ ८७ ॥

अन्वयः–ततः परिग्रह प्रमाण आख्यं व्रतं अंगीकृत्य स्थीयते, च संतोष पोषकः एषः कालः नीयते. ॥ ८७ ॥

अर्थः–माटे परिग्रहप्रमाणनामनुं व्रत स्वीकारीने (आपणे) रहेवुं, अने संतोषने पोषीने आ समयने वीताडवो ॥ ८७ ॥

इति प्रियोक्तिभिः प्रीतः प्रातःकृत्यपुरःसरम् । सप्तक्षेत्र्यां क्षणादेष निःशेषमवपद्धनम् ॥ ८८ ॥

अन्वयः— इति प्रिया उक्तिभिः प्रीतः एषः क्षणात् प्रातः कृत्य पुरः सरं निःशेषं धनं सप्त क्षेत्र्यां अवपत्. ॥ ८८ ॥

अर्थ.–एरीतनां पोतानी स्त्रीनां वचनोथी खुशी थयेला ते विद्यापतिशेठे क्षणवारमां प्रभातनुं कार्य करवापूर्वक सघळां धनने साते क्षेत्रोमां वावी दीधुं. ॥ ८८ ॥

ततः स्थापितदेहोपयोगिस्वल्पपरिग्रहः । मध्यंदिने जिनाधीशमभ्यर्च्येदं बभाण सः ॥ ८९ ॥

अन्वयः–ततः स्थापित देह उपयोगि स्वल्प परिग्रहः सः मध्यं दिने जिन अधीशं अभ्यर्च्य इदं बभाण. ॥ ८९ ॥

अर्थः—पछी राखेल छे शरीरने उपयोगी स्वल्प परिग्रह जेणे, एवो ते विद्यापतिशेठ मध्याह्नसमये जिनेश्वरप्रभुनी पूजा करीने आप्रमाणे बोल्यो के, ॥ ८९ ॥

शृङ्गारसुन्दरी भार्या शय्यैका वसने उभे । एकं पात्रमहर्भोज्यमात्रश्चाहारसंग्रहः ॥ ९० ॥

एकद्विसंख्यमल्पार्थमन्यदप्यात्महेतुकम् । अस्तु मे वस्तु तीर्थेशसेवार्हं त्वस्तु बह्वपि ॥ ९१ ॥ युग्मम् ॥

अन्वयः-शृंगारसुंदरी भार्या, एका शय्या, उभे वसने, एकं पात्रं, च अहर्भोज्य मात्रः आहार संग्रहः, ॥ ९० ॥ आत्म हेतुकं अन्यत् अपि अल्प अर्थं एक द्वि संख्यं वस्तु मे अस्तु, तीर्थ ईश सेवा अर्हं तु बहु अपि अस्तु. ॥ ९१ ॥ युग्मं ॥

अर्थः-शृंगारसुंदरी स्त्री, एक शय्या, बे वस्त्रो, एक पात्र, अने फक्त एक दिवसनाज भोजनजेटलो खोराकीनो संग्रह, ॥ ९० ॥ तेमज पोताने उपयोगी बीजी पण स्वल्प किम्मतनी एक बे वस्तु मारी हो, अने जिनेश्वरप्रभुनी सेवाना उपयोगनी तो घणी वस्तु पण हो. ॥ ९१ ॥ युग्मं ॥

परिग्रहं प्रमायेति प्रमोदविशदाशयः । स निनाय दिनं धीमान्धर्मध्यानधुरन्धरः ॥ ९२ ॥

अन्वयः-प्रमोद विशद आशयः धीमान्, धर्मध्यान धुरं धरः सः इति परिग्रहं प्रमाय दिनं निनाय. ॥ ९२ ॥

अर्थः—हर्षथी निर्मल आशयवाळा, बुद्धिमान, तथा धार्मिक ध्यानमां अग्रेसर एवा ते विद्यापतिशेठे एरीते परिग्रहनुं प्रमाण करीने (ते) दिवस व्यतीत कर्यो. ॥ ९२ ॥

धनं विनार्थिनामास्यं दर्शनीयं प्रगे कथम् । नक्तं सुप्ते जने युक्ता देशान्तरगतिस्ततः ॥ ९३ ॥

इति शृङ्गारसुन्दर्या सममालोच्य सुप्तवान् । निशीथेऽभ्युत्थितश्चायं यावद्देशान्तरोन्मुखः ॥ ९४ ॥

तावत्तावद्भिरेव श्रीपूरैरापूर्णमालयम् । आलोक्य विस्मयस्मेरचित्तश्चित्तप्रियां जगौ ॥९५॥ त्रिभिर्विशेषकम्

अन्वयः—प्रगे धनं विना अर्थिनां आस्यं कथं दर्शनीयं ? ततः सुप्ते जने नक्तं देशांतर गतिः युक्ता, ॥ ९३ ॥ इति शृंगार-सुंदर्या समं आलोच्य अयं सुप्तवान्, च यावत् देशांतर उन्मुखः निशीथे अभ्युत्थितः, ॥ ९४ ॥ तावत् तावद्भिः एव श्रीपूरैः आपूर्णं आलयं आलोक्य विस्मय स्मेर चित्तः चित प्रियां जगौ. ॥ ९५ ॥ त्रिभिर्विशेषकं ॥

अर्थः—(हवे) प्रभातमां धनविना याचकोने आपणे मुख केम देखाडशुं ? माटे ज्यांसुधी माणसो सुइ रह्यां होय, त्यांसुधीमांज रात्रिए परदेशमां चाल्या जवुं योग्य छे, ॥ ९३ ॥ एम शृंगारसुंदरीनी साथे विचार करीने ते सूतो, तथा पछी जेवामां देशांतर जवामाटे मध्यरात्रिए ते उठ्यो, ॥ ९४ ॥ तेवामां तेटलांज धनथी भरेलुं ( पोतानुं ) घर जोइने आश्चर्यथी प्रफुल्लित हृदयवाळो ते विद्यापतिशेठ (पोतानी) हृदयवल्लभाने कहेवा लाग्यो के, ॥ ९५ ॥ त्रिभिर्विशेषकं ॥

**दशमेऽहनि दैवेन कृष्यमाणैव यास्यति । नेदानीं दीयमानापि श्रीरियं याति मद्गृहात् ॥ ९६ ॥**

अन्वयः—इयं श्रीः दशमे अहनि दैवेन कृष्यमाणा एव यास्यति, इदानीं दीयमाना अपि मद् गृहात् न याति. ॥ ९६ ॥

अर्थः—आ लक्ष्मी दशमे दिवसे दैववडेज खेंचाइने जवानी छे, हाल तो दान देवा छतां पण मारा घरमांथी ते जती नथी. ९६

**न स्याददानं दानं वा स्थैर्यास्थैर्यकृते श्रियः । मुधा कृपणतां मूढा रूढामात्मनि तन्वते ॥ ९७ ॥**

अन्वयः—श्रियः स्थैर्ये अस्थैर्यकृते अदानं वा दानं न स्यात्, मूढाः मुधा आत्मनि रूढां कृपणतां तन्वते. ॥ ९७ ॥

अर्थः—लक्ष्मीने स्थिर राखवामां, अथवा चालीजवामां कृपणता के दान कारणभूत थतां नथी, मूर्खलोको नाहक पोतानामां

जडीभूत थयेलुं कृपणपणुं धारण करे छे. ॥ ९७ ॥

**न याति दीयमानापि श्रीश्चेद्दीयत एव तत् । तिष्ठत्यदीयमानापि नो चेद्दीयत एव तत् ॥ ९८ ॥**

अन्वयः–दीयमाना अपि श्रीः चेत् न याति, तत् दीयते एव, अदीयमाना अपि चेत् नो तिष्ठति, तत् दीयते एव. ॥ ९८ ॥

अर्थः—दान देवा छतां पण लक्ष्मी जो नथी जती, तो पछी तेणीनुं दानज करवुं, अने न देवाछतां पण (अर्थात् साचवी राखवा छतां पण ) ज्यारे रहेवानी नथी, तो पण तेणीनुं दानज करवुं व्याजबी छे. ॥ ९८ ॥

**इति विस्मितयोर्वार्तारसोर्मिप्लुतयोस्तयोः । आलिलिङ्ग दिवं पिङ्गः क्षपावल्लिदवो रविः ॥ ९९ ॥**

अन्वयः–इति तयोः विस्मितयोः, वार्ता रस ऊर्मि प्लुतयोः क्षपा वल्लि दवः पिंगः रविः दिवं आलिलिंग. ॥ ९९ ॥

अर्थः–ए रीते तेओ बन्ने स्त्री भर्तार आश्चर्य पामीने वार्तालापना रसना मोजांओमां मग्न थये छते, रात्रिरूपी वेलडीने (बाळवामां) दावानलसरखो पीळाश पडता रंगवाळो सूर्य आकाशने आलिंगन करवा लाग्यो, (अर्थात् सूर्योदय थयो.) ॥ ९९ ॥

**तथैवाथ श्रियं दत्वा कृत्वा कर्म दिनोचितम् । सुष्वाप पुण्यपूर्णोऽयं प्रतिज्ञातपरिग्रहः ॥ ५०० ॥**

अन्वयः—अथ तथा एव श्रियं दत्वा, दिन उचितं कर्म कृत्वा, पुण्य पूर्णः, प्रतिज्ञात परिग्रहः अयं सुष्वाप. ॥ ५०० ॥

अर्थः–पछी तेवीजरीते लक्ष्मीनुं दान देइने, तथा दिवसोचितकार्य करीने, संपूर्ण पुण्यशाली, तथा परिग्रहप्रमाणना प्रत्याख्यानवाळो ते विद्यापतिशेठ (रात्रीए) निद्राधीन थयो. ॥ ५०० ॥

इत्थमेष नवाहानि हानिहीनां श्रियं ददत् । कल्पद्रुमाधिदेवीनामपि श्लाघ्यत्वमागतः ॥ १ ॥

अन्वयः-इत्थं नव अहानि हानि हीनां श्रियं ददत् एषः कल्प द्रुम अधिदेवीनां अपि श्लाघ्यत्वं आगतः. ॥ १ ॥

अर्थः-ए रीते नव दिवसोसुधी अखूट लक्ष्मीनु दान देतो ते शेठ कल्पवृक्षनी अधिष्ठायिका देवीओने पण प्रशंसनीय थयो. ॥१॥

प्राच्यपुण्यपयःपङ्को मुक्तिमार्गस्य दूषकः । शोषमेष्यति मे दिष्ट्या श्रीपूरः श्वस्तने दिने ॥ २ ॥

इति प्रीतमना नक्तं सुप्तः स्वप्ने श्रिया रयात् । आनन्दसुन्दरदृशा स बभाषे शुभाशयः ॥३॥ युग्मम्

अन्वयः—दिष्ट्या प्राच्य पुण्य पयः पंकः, मुक्ति मार्गस्य दूषकः, मे श्रीपूरः श्वस्तने दिने शोषं एष्यति, ॥ २ ॥ इति प्रीत मनाः, शुभ आशयः सः नक्तं सुप्तः, रयात् आनंद सुंदर दृशा श्रिया स्वप्ने बभाषे. ॥ ३ ॥ युग्मं ॥

अर्थः—सारुं थयुं के, पूर्वपुण्यरूपी जलना कादवसरखो, अने मोक्षमार्गने दूषित करनारो, मारो लक्ष्मीनो समूह आवती काले सूकाइ जशे, (चाल्यो जशे), ॥ २ ॥ एम विचारीने मनमां खुशी थतो, तथा निर्मल आशयवाळो, ते विश्रापतिशेठ रात्रिए सूतो, एवामां अचानक हर्षथी सुंदर दृष्टिवाळी लक्ष्मीदेवीए स्वप्नमां तेने कह्युं के, ॥ ३ ॥ युग्मं ॥

तद्बलाद्दुर्बलं दैवं कुर्वद्भिर्गर्वगर्भितैः । तादृग्भिर्दानसुकृतैः कृतैवाहं त्वयि स्थिरा ॥ ४ ॥

अन्वयः—तत् बलात् दैवं दुर्बलं कुर्वद्भिः, गर्व गर्भितैः तादृग्भिः दान सुकृतैः त्वयि अहं स्थिरा एव कृता. ॥ ४ ॥

अर्थः–(पोताना) ते बलथी दैवने दुर्बल करनारां, अने गर्विष्ट थयेलां तेवां दानपुण्योए तारामते मने स्थिरज करी राखी छे.

**अत्यर्थपुण्यपापानामिहैव फलमश्नुते । इति सूक्तं त्वयाकारि मतिसार यथातथम् ॥ ५ ॥**

अन्वयः–हे मतिसार! अत्यर्थ पुण्य पापानां फलं इह एव अश्नुते, इति सूक्तं त्वया यथातथं अकारि. ॥ ५ ॥

अर्थः–हे उत्तम बुद्धिशाली विद्यापति! अति पुण्य पापोनुं फल अहींज भोगवाय छे, ए रीतना सुभाषितने तें सत्य करी बताव्युं छे.

**कदाचन न मुञ्चामि तदहं सदनं तव । यथेच्छं भाग्यभंगिभिरुत्संगीकृत्य भुङ्क्ष्व माम् ॥ ६ ॥**

अन्वयः–तत् अहं तव सदनं कदाचन न मुंचामि, भाग्य भंगीभिः यथा इच्छं मां उत्संगीकृत्य भुंक्ष्व? ॥ ६ ॥

अर्थः–माटे हुं तारुं घर कोइ पण दिवसे छोडवानी नथी, अने तेथी सुभाग्य योगे इच्छा मुजब मने उत्संगमां लेइने तुं भोगव?

**विनिद्रः कथयित्वाथ निशीथे स्वप्नसंकथाम् । स प्रियाग्रे प्रतिज्ञैकलीलापदमिदं जगौ ॥ ७ ॥**

अन्वयः–अथ निशीथे विनिद्रः सः प्रिया अग्रे स्वप्न संकथां कथयित्वा प्रतिज्ञा एक लीला पदं इदं जगौ. ॥ ७ ॥

अर्थः–पछी मध्य रात्रिए निद्रारहित थयेला एवा ते विद्यापतिशेठे पोतानी स्त्री पासे स्वप्ननी वात कहीने, प्रतिज्ञाना एक क्रीडास्थान सरखुं नीचेमुजब वचन कहेवा लाग्यो के, ॥ ७ ॥

**श्रीदानव्यसनेनैव भोगमात्रफलेन हा । जन्म यास्यति नौ मुक्तिफलेन तपसा विना ॥ ८ ॥**

अन्वयः-हा! भोग मात्र फलेन श्री दान व्यसनेन एव, मुक्ति फलेन तपसा विना नौ जन्म यास्यति. ॥ ८ ॥

अर्थः-अरेरे! फक्त भोगसुखरूपी फल आपनारां लक्ष्मीदानना व्यसनथीज, मोक्षरूपी फल आपनारा तपविना आपणी जींदगी (निरर्थक) जशे ॥ ८ ॥

कदापि लोभलीलाभिर्लोलितं लोलुभं मनः । पञ्चमव्रतपञ्चत्वप्रपञ्चमपि संसृजेत् ॥ ९ ॥

अन्वयः—कदा अपि लोभ लीलाभिः लोलितं, लोलुभं मनः पंचम व्रत पंचत्व प्रपंचं अपि संसृजेत्. ॥ ९ ॥

अर्थः-वळी कदाच कोइक दिवसे लोभक्रीडाथी चंचळ थयेलुं, अने लालचु थयेलुं (आपणुं) हृदय आ पांचमा व्रतना विनाशना प्रपंचने पण उत्पन्न करे. ॥ ९ ॥

पूरितं वित्तपूरेण तत्परित्यज्य मन्दिरम् । क्वचिद्देशान्तरे यावश्छुटावः श्रीमहाग्रहात् ॥ १० ॥

अन्वयः—तत् वित्त पूरेण पूरितं मंदिरं परित्यज्य क्वचित् देशांतरे यावः, श्रीमहाग्रहात् छुटावः. ॥ १० ॥

अर्थः—माटे द्रव्यसमूहथी भरेलुं आ घर छोडीने आपणे क्यांक परदेशमां जइये, अने आ लक्ष्मीनी जंजालमांथी छुटीये. १०

इति निश्चित्य स तया सहागच्छद्बहिर्गृहात् । श्रीकेलिकोमलान्नक्तं कमलादिव षट्पदः ॥ ११ ॥

अन्वयः-इति निश्चित्य श्रीकेलि कोमलात् कमलात् षट्पदः इव नक्तं सः तया सह गृहात् बहिः अगच्छत्. ॥ ११ ॥

अर्थः-एवो निश्चय करीने, लक्ष्मीने क्रीडा करवानां कोमल कमलमांथी भ्रमरनीपेठे रात्रिए ते विद्यापतिशेठ (पोतानी) ते स्त्री

सहित घरथी बहार निकळी गयो. ॥ ११ ॥

**करण्डमण्डिनीं बिभ्रत्तीर्थेशप्रतिमामसौ । स्मरन्पञ्चनमस्कारान्नगरद्वारमास्थितः ॥ १२ ॥**

अन्वयः–करंड मंडिनीं तीर्थ ईश प्रतिमां बिभ्रत् असौ पंच नमस्कारान् स्मरन् नगर द्वारं आस्थितः. ॥ १२ ॥

अर्थः–करंडीयामां रहेली तीर्थंकरप्रभुनी प्रतिमाने धारण करनारो ते शेठ, पंच परमेष्ठिना नमस्कारोनुं स्मरण करतोथको नगरना दरवाजापासे आव्यो. ॥ १२ ॥

**मृते शूलादपुत्रेऽथ शूराख्ये तत्पुरोपतौ । मन्त्रिभिः कल्पितो दिव्यहस्ती तत्रापतत्तदा ॥ १३ ॥**

अन्वयः–अथ शूर आख्ये तत् पुरी पतौ शूलात् अपुत्रे मृते मंत्रिभिः कल्पितः दिव्य हस्ती तदा तत्र आपतत्. ॥ १३ ॥

अर्थः–एवामां शूरनामनो ते नगरीनो स्वामी शूलरोगथी अपुत्र मरण पामवाथी मंत्रिओए शणगारेलो दिव्य हाथी ते समये त्यां (नगरना दरवाजापासे) आवी पहोंच्यो. ॥ १३ ॥

**तं पुण्यकलशाम्भोभिरभिषिच्य प्रियान्वितम् । पृष्ठमारोपयामास करेण करिणां वरः ॥ १४ ॥**

अन्वयः–करिणां वरः प्रिया अन्वितं तं पुण्य कलश अंभोभिः अभिषिच्य करेण पृष्ठं आरोपयामास. ॥ १४ ॥

अर्थः–ते उत्तम हाथीए स्त्री सहित ते विद्यापति शेठने पवित्र कलशना जलथी सींचीने सुंढवडे (पोतानी) पीठपर बेसाड्यो

**निन्ये महोत्सवेनाथ करीश्वरशिरःस्थितः । राजसौधाय हृष्यद्भिरहृष्यन् सचिवैरसौ ॥ १५ ॥**

अन्वयः-अथ करीश्वर शिरः स्थितः असौ अहृष्यन् महोत्सवेन हृष्यद्भिः सचिवैः राजसौधाय निन्ये. ॥ १५ ॥

अर्थः—पछी ते हस्तिराजना मस्तकपर बेठला ते शेठने तेनी खुशी नही छतां पण महोत्सवपूर्वक आनंदित थयेला मंत्रीओ राजमेहेलमां लेइ गया, ॥ १५ ॥

**श्रीपङ्कान्निःसृतं राज्यमहापङ्कप्रपातिनम् । स स्वं मेनेऽम्बुदोन्मुक्तं राहुग्रस्तमिवोडुपम् ॥ १६ ॥**

अन्वयः—सः अंबुद उन्मुक्तं राहु ग्रस्तं उडुपं इव. स्वं श्रीपंकात् निःसृतं, राज्य महापंक प्रपातिनं मेने. ॥ १६ ॥

अर्थः-ते शेठ वादळांओमांथी छूटीने राहुए ग्रसेला चंद्रनीपेठे, पोताने लक्ष्मीना कादवमांथी निकळीने राज्यरूपी उंडा चीकणा कीचडमां पडेलो मानवा लाग्या. ॥ १६ ॥

**भद्रपीठाश्रये तस्मिन्नभिषेकं निषेधति । विलक्षे मन्त्रिलक्षेऽथ दिव्याभूद्दिव्यभारती ॥ १७ ॥**

अन्वयः-अथ तस्मिन् भद्र पीठ आश्रये अभिषेकं निषेधति, मंत्रि लक्षे विलक्षे दिवि दिव्य भारती अभूत्. ॥ १७ ॥

अर्थः-पछी तेमने सिंहासनपर बेसाडी राज्याभिषेक करावतां तेणे ते माटे मने करवाथी, ते लाखोगमे मंत्रीओ विलखा पड्या, एवामां आकाशनी अंदर देवताइ वाणी थइ के, ॥ १७ ॥

**अद्यापि विद्यते भूरि कर्म भोगफलं तव । तदङ्गीकृत्य राज्यश्रीरुत्संगीकुरु संमदम् ॥ १८ ॥**

अन्वयः—अद्य अपि तव भूरि भोगफलं कर्म विद्यते, तत् राज्य श्रीः अंगीकृत्य संमदं उत्संगीकुरु? ॥ १८ ॥

अर्थः—हजु पण तारे घणुं भोगावली फलवाळुं कर्म विद्यमान छे, माटे राज्यलक्ष्मीनो स्वीकार करी तुं आनंद मेळव? ॥ १८ ॥

**स्वभाग्यदेवतावाचमित्याकर्ण्य स वर्ण्यधीः । सिंहासने जिनेशस्य प्रतिमां विन्यवीविशत् ॥ १९ ॥**

अन्वयः–वर्ण्य धीः सः इति स्व भाग्य देवता वाचं आकर्ण्य, सिंहासने जिन ईशस्य प्रतिमां विन्यवीविशत्, ॥ १९ ॥

अर्थः–प्रशंसनीय बुद्धिवाळा ते विद्यापति शेठे एरीतनी पोतानी भाग्यदेवीनी वाणी सांभळीने, सिंहासनपर जिनेश्वरप्रभुनी प्रतिमा स्थापन करी. ॥ १९ ॥

**धर्मज्ञैर्मन्त्रिभिः प्रीतैः पादपीठोपवेशनः । जिनदास्याभिषेकं स स्वस्मिन्धीमानकारयत् ॥ २० ॥**

अन्वयः–पादपीठ उपवेशनः सः धीमान् धर्म ज्ञैः प्रीतैः मंत्रिभिः स्वस्मिन् जिन दास्य अभिषेकं अकारयत्. ॥ २० ॥

अर्थः—पछी पादपीठपर बेसीने ते बुद्धिवान शेठे, धर्मने जाणनारा तथा आनंदित थयेला ते मंत्रिओ पासे पोतानो जिनेश्वरप्रभुना दासपणानो अभिषेक कराव्यो. ॥ २० ॥

**सुधीः संधारयन्भुक्तमात्रं स्वस्मै परिग्रहम् । समस्तं जिननामाङ्कं वस्तुचक्रमचीकरत् ॥ २१ ॥**

अन्वयः–सुधीः स्वस्मै भुक्त मात्रं परिग्रहं संधारयन्, समस्तं वस्तु चक्रं जिन नाम अंकं अचीकरत्. ॥ २१ ॥

अर्थः–पछी उत्तम बुद्धिवाळा ते शेठे फक्त पोताना उपयोग जेटलो परिग्रह पोता माटे राखीने, बाकीनी वस्तुओनो समस्त समूह जिनेश्वरप्रभुना नामपर चडावी दीधो. ॥ २१ ॥

नित्यं यात्रोत्सवं तत्र स पवित्रमनाः प्रभोः । प्रभूतवित्तव्ययतः कारयामास कृत्यवित् ॥ २२ ॥

अन्वयः–पवित्रमनाः, कृत्य वित् सः तत्र नित्यं प्रभूत वित्त व्ययतः प्रभोः यात्रा उत्सवं कारयामास. ॥ २२ ॥

अर्थः–पवित्र मनवाळा, तथा कृत्यने जाणनारा एवा ते शेठ त्यां हमेशां घणुं द्रव्य खरचीने जिनेश्वरप्रभुनी यात्रानो महोत्सव करवा लाग्या. ॥ २२ ॥

भूरिव्ययकृते तस्मिन्नगृह्णति करं जनात् । तद्भाग्यदेवतावर्षन्नित्यं रत्नैर्नृपोकसि ॥ २३ ॥

अन्वयः—जनात् तस्मिन् करं अगृह्णति, भूरिव्यय कृते तद् भाग्य देवता नित्यं नृप ओकसि रत्नैः अवर्षत्. ॥ २३ ॥

अर्थः–लोकोपासेथी ते कर न लेते छते, घणुं खरच करवामाटे तेनी भाग्यदेवी हमेशां तेना राजमेहेलमां रत्नोनी वृष्टि करवा लागी.

धर्माधीनोऽयमित्येतं जेतुं जातोद्यमा नृपाः । जिनाधिष्ठायिभिर्यक्षै रोगमुत्पाद्य नाशिताः ॥ २४ ॥

अन्वयः–अयं धर्म आधीनः, इति एतं जेतुं जात उद्यमाः नृपाः जिन अधिष्ठायिभिः यक्षैः रोगं उत्पाद्य नाशिताः. ॥ २४ ॥

अर्थः–आ विद्यापति धर्मनेज आधीन थइ गयो छे, एम जाणी तेने जीतवामाटे उद्यमवंत थयेला राजाओने जिनेश्वरप्रभुना अधिष्ठायक यक्षोए रोग उत्पन्न करीने नसाडी मेल्या. ॥ २४ ॥

विकटं कटकारम्भं शक्तिस्तम्भं च विद्विषाम् । ज्ञात्वाथ हर्षहृद्यात्मा विद्यापतिरचिन्तयत् ॥ २५ ॥

अन्वयः—अथ विद्विषां विकटं कटक आरंभं च शक्ति स्तंभं ज्ञात्वा हर्ष हृद्य आत्मा विद्यापतिः अचिंतयत्. ॥ २५ ॥

अर्थः—पछी ते शत्रुओना सैन्योना भयंकर पडावने, तथा तेओनी शक्तिना स्तंभनने जाणीने खुशी थयेलो ते विद्यापतिशेठ विचारवा लाग्यो के, ॥ २५ ॥

**अहो ये शक्रविक्रान्तिभाजस्तेऽप्यरिभूभुजः । धर्मप्रभावाद्दुःकीर्तिनिलय विलयं ययुः ॥ २६ ॥**

अन्वयः-अहो! ये अरि भूभुजः शक्रविक्रांति भाजः, ते अपि धर्म प्रभावात् दुःकीर्ति निलयं विलयं ययुः. ॥ २६ ॥

अर्थः-जे शत्रुराजाओ इंद्रने पण हंफावे एवा हता, तेओ पण धर्मना प्रभावथी अपकीर्तिना स्थानरूप विनाशने प्राप्त थया छे.

**मां धर्मः कलयन्सेवमानमल्पपरिग्रहम् । महापरिग्रहाञ्शत्रून्जेतुं भेजे सहायताम् ॥ २७ ॥**

अन्वयः-सेवमानं मां अल्प परिग्रहं कलयन् धर्मः महापरिग्रहान् शत्रून् जेतुं सहायतां भेजे. ॥ २७ ॥

अर्थः-सेवा करता एवा मने स्वल्प परिग्रहवाळो जाणीने धर्मे महान् परिग्रहवाळा ते शत्रुओने जीतवामाटे सहाय करी छे.

**तदहं यद्यमुं सेवे त्यक्ताशेषपरिग्रहः । तदन्तरारिभङ्गेऽपि भवत्ययमुपक्रमी ॥ २८ ॥**

अन्वयः-तत् अहं त्यक्त अशेष परिग्रहः यदि अमुं सेवे, तत् अंतर अरि भंगे अपि अयं उपक्रमी भवति. ॥ २८ ॥

अर्थः-माटे हुं सर्व परिग्रहने तजीने जो आ धर्मनी सेवा करुं, तो अंतरंग शत्रुओनो नाश करवामां पण ते धर्म (जरुर) उद्यमवंत थइ (मने सहाय करशेज.) ॥ २८ ॥

**इति संचिन्त्य शृङ्गारसुन्दरीकुक्षिसंभवम् । सुतं शृङ्गारसेनं स्वे पदे विद्यापतिर्न्यधात् ॥ २९ ॥**

अन्वयः—इति संचिंत्य विद्यापतिः शृंगारसुंदरी कुक्षि संभवं शृंगारसेनं सुतं स्वे पदे न्यधात्. ॥ २९ ॥

अर्थः—एम विचारीने ते विद्यापतिशेठे शृंगारसुंदरीनी कुक्षिथी उत्पन्न थयेला शृंगारसेन नामना पुत्रने पोतानी गादीए स्थाप्यो.

**पुरः संयमसूरिणामूरीकृत्य व्रतं स्वयम् । कल्याणमयमात्मानं शुद्धं चक्रे तपोऽग्निना ॥ ३० ॥**

अन्वयः—स्वयं संयमसूरीणां पुरः व्रतं ऊरीकृत्य तपः अग्निना कल्याणमयं आत्मानं शुद्धं चक्रे ॥ ३० ॥

अर्थः—पछी पोते संयमसूरिनामना आचार्यनी पासे दीक्षा लेइने तपरूपी अग्निथी (पोताना) कल्याणमय (पक्षे–सुवर्णमय) आत्माने निर्मल कर्यो. ॥ ३० ॥

**पूरितायुरियाय द्यां विद्यापतियतिस्ततः । मर्त्यामर्त्यभवैर्भेजे पञ्चभिः परमं पदम् ॥ ३१ ॥**

अन्वयः—ततः विद्यापतियतिः पूरित आयुः द्यां इयाय, पंचभिः मर्त्य अमर्त्य भवैः परमं पदं भेजे. ॥ ३१ ॥

अर्थः—पछी ते विद्यापतिमुनि आयु संपूर्ण थयाबाद देवलोकमां गया, अने मनुष्य तथा देवोना पांच भवो करीने ते मोक्षपदने पाम्या.

**तद्विद्यापतिदृष्टान्तविद्यानिश्चलचेतनैः । भाव्यं भव्यजनैर्धर्मस्पृहैर्मितपरिग्रहैः ॥ ३२ ॥**

अन्वयः—तत् विद्यापति दृष्टांत विद्या निश्चल चेतनैः, धर्म स्पृहैः भव्य जनैः मित परिग्रहैः भाव्यं. ॥ ३२ ॥

अर्थः—माटे एरीते ते विद्यापतिना दृष्टांतना ज्ञानथी निश्चळ हृदयवाळा, अने धर्मनी इच्छा राखनारा भव्य लोकोए परिग्रहनुं प्रमाण करवुं ॥ ३२ ॥

दशदिक्क्लृप्तसंचारे सीमानुल्लङ्घनं पुनः । प्रथमं प्रथयन्ते दिग्विरत्याख्यं गुणव्रतम् ॥ ३३ ॥

अन्वयः–पुनः दश दिक् क्लृप्त संचारे सीम अनुल्लंघनं प्रथमं दिग् विरति आख्यं गुण व्रतं प्रथयंते. ॥ ३३ ॥

अर्थः–वळी दशे दिशाओमां कराता गमनना संबंधमां सीमाने नही उल्लंघन करवापूर्वक ( श्रद्धालु श्रावको ) पेहेलुं दिग्विरिति-नामनुं गुणव्रत आचरे छे. ॥ ३३ ॥

पापद्विपदुरुत्थानपातसंवर्तगर्तिका । इदं भाति व्रतं धर्मधात्रीशकनकासनम् ॥ ३४ ॥

अन्वयः–पाप द्विप दुरुत्थान पात संवर्त गर्तिका, धर्म धात्री ईश कनक आसनं इदं व्रतं भाति. ॥ ३४ ॥

अर्थः–पापरूपी हाथीने पाछुं उठी न शकाय एवां पतनमाटे घूमरीवाळा घूनासरखुं, तथा धर्मरूपी राजाना सुवर्णना सिंहासनसरखुं आ व्रत शोभे छे. ॥ ३४ ॥

उच्चैर्धर्मप्रसूनस्य शाखी दिग्विरतिव्रतम् । नृणां यदधिरूढानां न पापश्वापदाद्भयम् ॥ ३५ ॥

अन्वयः–दिग् विरति व्रतं धर्म प्रसूनस्य उच्चैः शाखी, यत् अधिरूढानां नृणां पाप श्वापदात् भयं न. ॥ ३५ ॥

अर्थः–आ दिग्विरतिनामनुं व्रत धर्मरूपी पुष्पोना उंचां वृक्षसरखुं छे, के जेपर चडेला माणसोने पापोरूपी हिंसक जंगली प्राणी-ओतरफथी भय थतो नथी. ॥ ३५ ॥

गतौ संकोचयत्येव यः स्वं दिग्विरतिव्रती । संसारलङ्घनोत्तालफालारम्भः स सिंहवत् ॥ ३६ ॥

अन्वयः—दिग् विरति व्रती यः स्वं गतौ संकोचयति एव, सः सिंहवत् संसार लंघन उत्ताल फल आरंभः. ॥ ३६ ॥

अर्थः—दिग्विरति व्रतवाळो जे माणस पोतानुं आवागमन संकोचे छे, ते सिंहशेठनीपेठे संसारनो पार पामवारूप उमदां फलना प्रारंभवाळो थाय छे. ॥ ३६ ॥

**तथाहि द्रङ्गप्रस्तारेष्वस्ति सर्वगुरुः पुरी । वासन्तीति श्रुता चित्रमवक्रगुणपूरिता ॥ ३७ ॥**

अन्वयः—तथाहि—द्रंग प्रस्तारेषु सर्व गुरुः वासंती इति श्रुता पुरी अस्ति, चित्रं अवक्र गुण पूरिता. ॥ ३७ ॥

अर्थः—ते सिंहशेठनुं उदाहरण कहे छे—गामोना विस्तारोमां सर्वथी म्होटी वासंतीनामनी ( पक्षे—माधवीलता सरखी ) प्रसिद्ध नगरी छे, परंतु आश्चर्यनी वात छे के, ते नगरी सरल गुणोवाळा लोकोथी भरेली छे, ( पक्षे—वक्रतारहित ) सरल तंतुओथी भरेली छे. ॥ ३७ ॥

**कीर्तिपाल इति क्षोणिपालस्तस्यामजायत । यत्कीर्तिकन्याकेलीषु वियदङ्कोऽपि संकटः ॥ ३८ ॥**

अन्वयः—तस्यां कीर्तिपालः इति क्षोणिपालः अजायत, यत् कीर्तिकन्या केलीषु वियत् अंकः अपि संकटः ॥ ३८ ॥

अर्थः—ते नगरीमां कीर्तिपालनामनो राजा हतो, के जेनी कीर्तिरूपी कन्याओने क्रीडा करवाभाटे आकाशरूपी मेदान पण सांकडुं पडतुं हतुं. ॥ ३८ ॥

**रूपश्रीस्पर्शसंलुब्धैरिवाशेषैर्वृतो गुणैः । ननन्द नन्दनः श्रीमान्भीमाख्यस्तस्य भूपतेः ॥ ३९ ॥**

अन्वयः—तस्य भूपतेः रूप श्री स्पर्श संलुब्धैः इव अशेषैः गुणैः वृतः, श्रीमान् भीमाख्यः नंदनः ननंद ॥ ३९ ॥

अर्थः—ते राजानो रूपनी शोभाना स्पर्शमाटे जाणे लालचु थयेला होय नहीं! एवा समस्त गुणोथी भरेलो श्रीमान् भीमनामनो पुत्र शोभतो हतो. ॥ ३९ ॥

**तस्मात्पुत्रादपि स्वेभ्यः प्राणेभ्योऽप्यतिवल्लभः । तत्र मित्रं महीभर्तुः श्रेष्ठीन्दुः सिंह इत्यभूत् ॥ ४० ॥**

अन्वयः—तस्मात् पुत्रात् अपि, स्वेभ्यः प्राणेभ्यः अपि अतिवल्लभः तत्र मही भर्तुः सिंह इति श्रेष्ठि इंदुः मित्रं अभूत्. ॥ ४० ॥

अर्थः—ते पुत्रथी पण, अने पोताना प्राणोथी पण अत्यंत व्हालो त्यां ते राजानो सिंहनामनो उत्तमशेठ मित्र हतो. ॥ ४० ॥

**जिनभक्तिजिनमतज्ञानं तद्धर्मनिर्मितिः । इति सारमलङ्कारत्रयं शश्वद्दधार सः ॥ ४१ ॥**

अन्वयः—जिनभक्ति जिन मत ज्ञानं, तद्धर्म निर्मितिः, इति सारं अलंकार त्रयं सः शश्वत् दधार. ॥ ४१ ॥

अर्थः—जिनेश्वरप्रभुनी भक्ति, जैनशासननुं ज्ञान, अने ते जैन धर्मनुं आचरण एम सारभूत त्रण अभूषणोने ते हमेशां धारण करतो हतो.

**तदीयवदनन्यस्तनेत्रं वेत्रभृतां वरः । कदाप्युदारसदसं तं महीशं व्यजिज्ञपत् ॥ ४२ ॥**

अन्वयः—तदीय वदन न्यस्त नेत्रं, उदार सदसं तं महीशं कदापि वेत्रभृतां वरः व्यजिज्ञपत् ॥ ४२ ॥

अर्थः—ते शेठना मुखतरफ राखेल छे चक्षु जेणे, तथा मनोहर सभावाला, एवा ते राजाने एक दिवसे छडीदारोना उपरीए आवीने विनंति करीके, ॥ ४२ ॥

देव दिव्याकृतिर्द्वारि कोऽप्यस्ति नरपुङ्गवः । चक्षुर्भवन्मुखाम्भोजे भ्रमरीकर्तुमुत्सुकः ॥ ४३ ॥

अन्वयः—(हे) देव ! दिव्य आकृतिः, भवत् मुख अंभोजे चक्षुः भ्रमरीकर्तुं उत्सुकः कः अपि नर पुंगवः द्वारि अस्ति. ॥ ४३ ॥

अर्थः—हे स्वामी ! मनोहर आकारवाळो, तथा आपना मुखरूपी कमलप्रते ( पोताना ) चक्षुने भ्रमररूप करवाने उत्कंठित थयेलो कोइपण उत्तम पुरुष दरवाजे उभो छे. ॥ ४३ ॥

अथैष वेत्रभृद्भूपभ्रूपल्लवकसंज्ञया । आशु प्रवेशयामास तं पुमांसं सभाभुवि ॥ ४४ ॥

अन्वयः—अथ एषः वेत्रभृत् भूप भ्रू पल्लवक संज्ञया आशु तं पुमांसं सभा भुवि प्रवेशयामास. ॥ ४४ ॥

अर्थः—पछी ते छडीदारे राजानी भ्रकुटिना छेडानी संज्ञाथी तुरत ते पुरुषने सभानी भूमिमां प्रवेश कराव्यो. ॥ ४४ ॥

कृती कृतनमस्कारः संनिविष्टोऽथ विष्टरे । वचःसुधाभिः स्नपयामास भूवासवश्रव ॥ ४५ ॥

अन्वयः—अथ कृती कृत नमस्कारः विष्टरे सनिविष्टः, वचः सुधाभिः भू वासव श्रवः स्नपयामास. ॥ ४५ ॥

अर्थः—पछी ते विचक्षण पुरुष ( राजाने )नमस्कार करीने आसनपर बेठो, तथा वचनोरूपी अमृतथी राजाना कर्णोने स्नान कराववा लाग्यो. ॥ ४५ ॥

जानासि जगतीनाथ विरोधकाथकृन्महाः । श्रीनागचन्द्र इत्यस्ति पुरे नागपुरे नृपः ॥ ४६ ॥

अन्वयः—(हे) जगती नाथ ! जानासि, नागपुरे पुरे विरोधि क्वाथकृत् महाः श्रीनागचंद्रः इति नृपः अस्ति. ॥ ४६ ॥

अर्थः—हे जगत्ना स्वामी! आपने मालुम छे के, नागपुरनामना नगरमां शत्रुओना तेजनो लोप करनारो श्रीनागचंद्रनामे राजा छे.

**तस्य प्रियास्ति प्रस्तावबाच्या सुरवधूक्तिषु । मकरध्वजकीरैकपञ्जरी रत्नमञ्जरी ॥ ४७ ॥**

अन्वयः—तस्य सुर वधू उक्तिषु प्रस्ताव वाच्या, मकरध्वज कीर एक पंजरी रत्नमंजरी प्रिया अस्ति. ॥ ४७ ॥

अर्थः—ते राजाने देवांगनाओना वर्णनमां प्रस्तावे प्रशंसा करवा लायक, तथा कामदेवरूपी शुकना पांजरांसरखी रत्नमंजरी-नामे राणी छे. ॥ ४७ ॥

**कामभूभर्तुरस्तित्वमुच्चैरस्ति तयोः सुता । विश्रुता गुणमालेति गुणमालेव देहिनी ॥ ४८ ॥**

अन्वयः—काम भू भर्तुः उच्चैः अस्तित्वं, दिहिनी गुणमाला इव तयोः गुणमाला इति विश्रुता सुता अस्ति. ॥ ४८ ॥

अर्थः—कामदेवरूपी राजानी उंचा प्रकारनी हयातिसरखी, अने शरीरधारी गुणोनी मालासरखी, तेओनी गुणमालानामनी प्रख्यात पुत्री छे. ॥ ४८ ॥

**तदङ्गसंगता लक्ष्मीः साक्षाल्लक्ष्मीमुपाहसत् । स्फुरदम्भोजकुम्भीन्द्रकुम्भद्वन्द्वेन्दुवासिनीम् ॥ ४९ ॥**

अन्वयः—साक्षात् तत् अंग संगता लक्ष्मीः, स्फुरत् अंभोज कुंभि इंद्र कुंभ द्वंद्व इंदु वासिनीं लक्ष्मीं उपाहसत्. ॥ ४९ ॥

अर्थः—साक्षात् तेणीना शरीरमां प्राप्त थयेली लक्ष्मी विकस्वर कमल, हस्तींद्रना बन्ने कुंभस्थलो, तथा चंद्रमां निवास करनारी लक्ष्मीनी हांसी करती हती. ॥ ४९ ॥

तारुण्यचारवे तस्यै वरान्ध्यायन्धराधिपः । त्वत्सुतं निश्चिकायैव प्रभायै भास्करं यथा ॥ ५० ॥

अन्वयः—तारुण्य चारवे तस्यै वरान् ध्यायन् धराधिपः, प्रभायै यथा भास्करं ( तथा ) त्वत्सुतं एव निश्चिकाय. ॥ ५० ॥

अर्थः—युवावस्थाथी शोभती एवी ते कन्यामाटे वर संबंधि विचार करतां राजाए, प्रकाशमाटे जेम सूर्यनो तेम आपना पुत्रनोज निश्चय करेलो छे. ॥ ५० ॥

इत्यर्थमभ्यर्थयितुं त्वयि मामीश मे प्रभुः । विश्वासभाजनोभूतं मुख्यदूतं नियुक्तवान् ॥ ५१ ॥

अन्वयः-( हे ) ईश! इति अर्थं त्वयि अभ्यर्थयितुं मे प्रभुः, विश्वास भाजनीभूतं मां मुख्य दूतं नियुक्तवान्. ॥ ५१ ॥

अर्थः-हे स्वामी! एटलामाटे आपने प्रार्थना करवामाटे मारा स्वामीए विश्वासपात्र एवा मने मुख्य दूतने ( आपनी पासे ) मोकलेलो छे. ॥ ५१ ॥

तत्प्रभो सत्प्रभोल्लासनिर्विलासमनोभुवे । रतिनिर्जयिनीं कामं तामङ्गीकुरु सूनवे ॥ ५२ ॥

अन्वयः-तत् ( हे ) प्रभो! सत् प्रभा उल्लास निर्विलास मनोभुवे सूनवे कामं रतिनिर्जयिनीं तां अंगीकुरु? ॥ ५२ ॥

अर्थः-माटे हे प्रभु! मनोहर कांतिना उल्लासथी विलास रहित करेल छे कामदेवने जेणे ( एवा आपना ) पुत्रमाटे आनंदपूर्वक रतिने पण जीतनारी ते राजपुत्रीने स्वीकारो? ॥ ५२ ॥

तं भूपमुत्सवाभोगात्तां कन्यां वरलाभतः । दौत्यसाफल्यतो मां च स्वामिन्ननुगृहाण तत् ॥ ५३ ॥

अन्वयः–तत् ( हे ) स्वामिन्! उत्सव आभोगात् तं भूपं, वर लाभतः तां कन्यां, च दौत्य साफल्यतः मां अनुगृहाण? ॥५३॥

अर्थः–माटे हे स्वमी! महोत्सवना लाभथी ते राजाने, वरना लाभथी ते राजकन्याने, तथा दूतपणानी सफलताथी मने (आप) आनंदित करो? ॥ ५३ ॥

**इदं वादिनि दूतेऽस्मिन्नानन्दी मेदिनीपतिः। सिंहश्रेष्ठिमुखाम्भोजे न्यस्तनेत्रयुगो जगौ ॥ ५४ ॥**

अन्वयः—इति अस्मिन् दूते वादिनि आनंदी मेदिनी पतिः सिंह श्रेष्ठि मुख अंभोजे न्यस्त नेत्र युगः जगौ. ॥ ५४ ॥

अर्थः–एरीते ते दूत बोल्याबाद आनंद पामेलो ते राजा सिंहशेठना मुखरूपी कमलप्रते ( पोतानां ) बन्ने नेत्रो राखीने कहेवा लाग्यो के, ॥ ५४ ॥

**नावयोरन्तरं किंचिदमुमादाय नन्दनम्। व्रज नागपुरं बन्धो संबन्धोऽयं विधीयताम् ॥ ५५ ॥**

अन्वयः—(हे) बंधो! आवयोः किंचित् अंतरं न, अमुं नंदनं आदाय नागपुरं व्रज? अयं संबंधः विधीयतां? ॥ ५५ ॥

अर्थः–हे बंधु! आपण बन्नेवच्चे कंइ पण अंतर नथी, माटे आ पुत्रने साथे लेइ जइने तुं नागपुर जा? अने आ संबंध करी आव?

**अनर्थदण्डादुद्दण्डादतः स चकितः कृतो। किंचिन्न्यञ्चन्मुखः सिंहो नोत्तरं नृपतेर्ददौ ॥ ५६ ॥**

अन्वयः–अतः उद्दंडात् अनर्थ दंडात् चकितः सः कृती सिंहः किंचित् न्यंचत् मुखः नृपतेः उत्तरं न ददौ. ॥ ५६ ॥

अर्थः–आवा भयंकर अनर्थदंडथी डरेला, एवा ते कृतज्ञ सिंहशेठे कंइक नीचुं मुख करीने राजाने प्रत्युत्तर न आप्यो. ॥ ५६ ॥

किंचित्कोपकडाराक्षस्ततः क्ष्मादयितोऽवदत् । संबन्धोऽयं न किं साधुर्यद्दत्से मित्र नोत्तरम् ॥ ५७ ॥

अन्वयः—ततः किंचित् कोप कडार (कराल) अक्षः क्ष्मादयितः अवदत्, (हे) मित्र ! अयं संबंधः किं साधुः न ? यत् उत्तरं न दत्से.

अर्थः—तेथी कंइक क्रोधथी विक्राल आंखोवाळा ते राजाए कह्युं के हे मित्र ! आ संबंध तने शुं ठीक नथी लागतो ? के जेथी तुं प्रत्युत्तर आपतो नथी. ॥ ५७ ॥

अथ पृथ्वीपतिं कोपकणाङ्कमवलोकयन् । वाक्कलां कलयामास सिंहः पीयूषपेशलाम् ॥ ५८ ॥

अन्वयः—अथ पृथ्वी पतिं कोप कण अंकं अवलोकयन् सिंहः पीयूष पेशलां वाक् कलां कलयामास. ॥ ५८ ॥

अर्थः—पछी राजाने क्रोधना लेशना चिह्नवाळो जोइने ते सिंहशेठ अमृतसरखी मधुर वचन चतुराइ करवा लाग्यो के, ॥ ५८ ॥

न योजनशतादूर्ध्वं व्रजामीति व्रतं मम । अतस्तु योजनशतं साग्रं नागपुरं पुरम् ॥ ५९ ॥

अन्वयः—योजन शतात् उर्ध्वं न व्रजामि, इति मम व्रतं, तु अतः नागपुरं पुरं साग्रं योजन शतं. ॥ ५९ ॥

अर्थः—एकसो जोजनथी आगळ जवुं नही, एवुं मने व्रत छे, अने ते नागपुर नगर तो अहींथी एकसो जोजन करतां वधारे दूर छे.

तदहं न विवाहेऽस्मिन्व्रजामि व्रतभङ्गभीः । एवंविधेषु कार्येषु दृश्यन्ते न च मादृशाः ६० ॥

अन्वयः—तत् व्रत भंग भीः अहं अस्मिन् विवाहे न व्रजामि, च एवंविधेषु कार्येषु मादृशाः न दृश्यंते. ॥ ६० ॥

अर्थः—माटे व्रत भंगना डरथी हुं आ विवाहमां जइ शकीश नही, तेमज आवां कार्योमां माराजेवाने हुकम करवो योग्य नथी.

इत्युक्तिघृतहोमेन ज्वलत्कोपमहानलः । तज्ज्वालाजालसंततामिव भूपोऽभजद्गिरम् ॥ ६१ ॥

अन्वयः—इति उक्ति घृत होमेन ज्वलत् कोप महानलः भूपः, तत् ज्वाला जाल संततां इव गिरं अभजत्. ॥ ६१ ॥

अर्थः-( तेनां ) ए रीतनां वचनोरूपी घृत होमावाथी सळगी उठ्यो छे क्रोधरूपी महान् अग्नि जेनो, एवो ते राजा तेनी ज्वालाना समूहथी जाणे तपी उठी होय नहि ! एवी वाणी बोल्यो के, ॥ ६१ ॥

स्याद्गन्तुं यत्र मे युक्तं मया तत्र निदिश्यसे । कार्यं तदप्यदेश्यं ते तन्महामहिमासि भोः ॥ ६२ ॥

अन्वयः-यत्र मे गंतुं युक्तं स्यात्, तत्र मया ( त्वं ) निदिश्यसे, तत् अपि कार्यं ते अदेश्यं, तत् भोः महामहिमा असि ! ६२

अर्थः—ज्यां मारे जवुं लायक हतुं, त्यां में तने जवानी आज्ञा आपी, अने ते कार्यने पण तें नही फरमाववायोग्य जणाव्युं, माटे अहे ! तुं तो कोइक महाराजाधिराज जेवो डोळ धरावे छे ! ॥ ६२ ॥

न यासि योजनशतादूर्ध्वमित्यस्ति ते व्रतम् । सहस्राद्योजनेभ्योऽग्रे त्वां मोक्ष्याम्यौष्ट्रिकैस्ततः ॥ ६३ ॥

अन्वयः-योजन शतात् ऊर्ध्वं न यासि, इति ते व्रतं अस्ति, ततः त्वां औष्ट्रिकैः ( सह ) सहस्रात् योजनेभ्यः अग्रे मोक्ष्यामि.

अर्थः-एकसो जोजनथी आगळ तुं जतो नथी, अने तने ज्यारे एवुं व्रत छे, तो तने उंटोना स्वारोसाथे एक हजार जोजनथी पण आगळ मोकली आपीश. ॥ ६३ ॥

सिंहः श्रुत्वेत्यथ क्रोधावहित्थविहितस्मितः । उच्चेऽग्रतो नृणां पत्युः प्रत्युत्पन्नमतिः कृती ॥ ६४ ॥

अन्वयः-अथ इति श्रुत्वा क्रोध अवहित्थ विहित स्मितः कृती सिंहः मत्युत्पन्न मतिः नृणां पत्युः अग्रतः ऊचे. ॥ ६४ ॥

अर्थः-हवे एम सांभळीने क्रोधने दबावी हास्य करीने ते चतुर सिंहशेठ समयसूचकता धारण करीने राजाने कहेवा लाग्यो के,

**स्वामिन्नसहमानस्ते विरहं निरहंकृतिः । अकार्षमुत्तराण्येवं देवादेशः शिरोमणिः ॥ ६५ ॥**

अन्वयः—( हे ) स्वामिन्! ते विरहं असहमानः निरहंकृतिः ( अहं ) एवं उत्तराणि अकार्षं, देव आदेशः शिरोमणिः. ६५

अर्थः—हे स्वामी! आपनो विरह सहन न थवाथी अहंकार राख्याविना में आवा उत्तरो आपने आप्या छे, परंतु आपनी आज्ञा तो मारा मस्तकपर मुकुट समान छे. ॥ ६५ ॥

**नृपः प्रीतोऽथ तद्वाचा विवाहाय व्यहारयत् । महासैन्यमहामन्त्रिमहाभटयुतं सुतम् ॥ ६६ ॥**

अन्वयः—अथ तत् वाचा प्रीतः नृपः विवाहाय, महासैन्य महामंत्रि महाभट युतं सुतं व्यहारयत्. ॥ ६६ ॥

अर्थः—पछी तेना वचनथी खुशी थयेला ते राजाए विवाहमाटे महान् सैन्य, महान् मंत्रिओ, तथा महान् सुभटोसहित पोताना पुत्रने प्रयाण कराव्युं. ॥ ६६ ॥

**पृथग्भूतमिवात्मानं सुहृदं हृदयप्रियम् । नृसिंहः सिंहमकरोत्तत्र सर्वक्रियागुरुम् ॥ ६७ ॥**

अन्वयः—पृथग् भूतं आत्मानं इव, हृदय प्रियं सुहृदं सिंहं तत्र नृ सिंहः सर्व क्रिया गुरुं अकरोत्. ॥ ६७ ॥

अर्थः-जाणे भिन्न स्वरूपे रहेलो पोतेज होय नही! एवा हृदयप्रिय मित्रसरखा ते सिंहशेठने त्यां राजाए सर्व कार्योमां मुख्य

अधिकारी बनाव्यो. ॥ ६७ ॥

**कृतयात्रस्ततः सिंहो गुप्तसंवेगवाग्भरैः । अत्रोटयत्कुमारस्य संसारावासवासनाम् ॥ ६८ ॥**

अन्वयः—ततः कृत यात्रः सिंहः गुप्त संवेग वाग्भरैः कुमारस्य संसार आवास वासनां अत्रोटयत्. ॥ ६८ ॥

अर्थः—हवे त्यांथी प्रयाण कर्याबाद ते सिंहशेठ गुप्त रीते वैराग्यवाळां वचनोना समूहथी ते राजकुमारजी संसारमां वसवानी अभिलाषाने तोडवा लाग्यो. ॥ ६८ ॥

**व्यक्तमुक्तिवधूलोभः शोभमानाः श्रियोऽथ ताः । तृणवद्गणयामास महीवासवनन्दनः ॥ ६९ ॥**

अन्वयः—अथ व्यक्त मुक्ति वधू लोभः मही वासव नंदनः ताः शोभमानाः श्रियः तृणवत् गणयामास. ॥ ६९ ॥

अर्थः—पछी प्रगट थएल छे मुक्तिस्त्रीनी लालच जेने, एवो ते राजकुमार ते शोभती (संसार संबधि) लक्ष्मीने तृणसमान गणवा लाग्यो ॥ ६९ ॥

**कृतव्याजोत्तरः श्रेष्ठी दिग्विरामव्रतस्थितः । न योजनशतादूर्ध्वं स प्रयाणमकारयत् ॥ ७० ॥**

अन्वयः—दिग् विराम व्रत स्थितः सः श्रेष्ठी कृत व्याज उत्तरः योजन शतात् ऊर्ध्वं प्रयाणं न अकारयत्. ॥ ७० ॥

अर्थः—दिग्विरति व्रतमां रहेला ते शेठे कंइक बहानुं कहाडीने एकसो जोजनथी आगळ प्रयाण कराव्युं नही. ॥ ७० ॥

**यात्राविरामाद्यातेषु पञ्चषेषु दिनेष्वथ । कुमारमूचुः सचिवा रहसि प्रहसद्गिरः ॥ ७१ ॥**

अन्वयः—अथ यात्रा विरामात् पंचषेषु दिनेषु यातेषु प्रहसद्गिरः सचिवाः कुमारं रहसि ऊचुः. ॥ ७१ ॥

अर्थः—पछी प्रयाणना अटकाववाद पांच छ दिवसो गये छते हास्ययुक्त वाणी बोलता मंत्रिओ ते राजकुमारने एकांतमां कहेवा लाग्या के, ॥ ७१ ॥

**यात्रां कुत्रापि सिंहश्चेन्निषेधति विधिच्छलात् । तद्बलादपि कुर्वन्तो न यूयमपराधिनः ॥ ७२ ॥**

**इत्यस्मानशिषद्गुप्तं प्रयाणसमये नृपः । तद्बध्वाप्यधुना सिंहं यामो नागपुरं न किम् ॥७३॥ युग्मम्॥**

अन्वयः—सिंहः चेत् विधि च्छलात् कुत्र अपि यात्रां निषेधति, तत् बलात् अपि कुर्वतः यूयं अपराधिनः न, ॥ ७२ ॥ इति प्रयाण समये नृपः अस्मान् गुप्तं अशिषत्, तत् अधुना सिंहं बध्ध्वा अपि नागपुरं किं न यामः? ॥ ७३ ॥ युग्मं ॥

अर्थः—कदाच आ सिंहशेठ कंइक बाहानुं कहाडीने क्यांक पण जो प्रयाणने अटकावे, तो बळात्कारे पण आगळ प्रयाण करवामां तमो गुन्हेगार नथी, ॥ ७२ ॥ एम प्रयाणसमये राजाए अमोने गुप्तपणे शिखामण आपी छे, माटे हवे आ समये आ सिंहशेठने बांधीने पण आपणे नागपुरतरफ शामाटे प्रयाण न करीये? ॥ ७३ ॥ युग्मं ॥

**इत्यात्तवाचः सचिवानाचष्ट नृपनन्दनः । श्वः कर्तव्यमिदं यात्रा नाद्य निर्णीयते यदि ॥ ७४ ॥**

अन्वयः—इति आत्त वाचः सचिवान् नृप नंदनः आचष्ट, यदि अद्य यात्रा न निर्णीयते, इदं श्वः कर्तव्यं ॥ ७४ ॥.

अर्थः—एम बोलता ते मंत्रिओने राजकुमारे कह्युं के, जो आजे प्रयाणमाटे निर्णय न करवामां आवे, तो आवती काले तमारो

विचार अमलमां मेलजो. ॥ ७४ ॥

**अथैकान्ते महीकान्तजन्मा तन्मानसाप्रियम् । वचोऽवोचत सिंहस्य पुरो धर्मकलागुरोः ॥ ७५ ॥**

अन्वयः-अथ मही कांत जन्मा एकांते तत् मानस अप्रियं वचः धर्म कला गुरोः सिंहस्य पुरः अवोचत. ॥ ७५ ॥

अर्थः-पछी ते राजकुमारे एकांतमां तेमना मनने अणगमतुं वचन धर्मकलाना गुरुसरखा ते सिंहशेठनी आगळ निवेदन कर्युं.

**धर्माम्बुधिसुधाधामा सिंहनामा महामतिः । ततः कुमारमारब्धसंसारशमनोऽभ्यधात् ॥ ७६ ॥**

अन्वयः-ततः धर्म अंबुधिसुधाधामा, आरब्ध संसार शमनः, महामतिः सिंहनामा कुमारं अभ्यधात्. ॥ ७६ ॥

अर्थः—पछी धर्मरूपी महासागरप्रते चंद्रसरखो, अने प्रारंभेल छे संसारसंबंधि शांति जेणे, एवो महाबुद्धिवान् ते सिंहशेठ राजकुमारने कहेवा लाग्यो के, ॥ ७६ ॥

**नेदं मेऽङ्गमपीत्युक्त्वा भूतले प्रतिलेखिते । पतित्वा पादप इव प्रस्थिरावयवव्रजः ॥ ७७ ॥**

**शुचौ क्वचिद्वनोद्देशे पादपोपगमाभिधम् । ग्रहीष्यामि व्रतं तत्ते बध्ध्वा नेष्यन्ति किं मम ॥७८॥ युग्मम्**

अन्वयः—इदं अंगं अपि मे न, इति उक्त्वा प्रतिलेखिते भूतले पतित्वा पादपः इव प्रस्थिर अवयव व्रजः, ॥ ७७ ॥ क्वचित् शुचौ वनोद्देशे पादप उपगम अभिधं व्रतं ग्रहीष्यामि, तत् ते मम बध्ध्वा किं नेष्यंति ! ॥ ७८ ॥ युग्मं ॥

अर्थः-आ शरीर पण मारुं नथी, एम कहीने प्रतिलेखेला पृथ्वीतलपर पडीने वृक्षनीपेठे अंगोपांगोने स्थिर करीने, ॥ ७७ ॥

कोइक पवित्र वनप्रदेशमां पादपोपगमनामनुं हुं व्रत ग्रहण करीश, तो पछी तेओ मने बांधीने शुं लेइ जशे? ॥ ७८ ॥ युग्मं ॥

**इत्युक्त्वा सिंहवत्सिंहः काननं निशि जग्मिवान् । त्वमेव मे गतिरिति क्ष्मापजोऽप्यनु तं ययौ ॥७९॥**

अन्वयः–इति उक्त्वा सिंहः निशि सिंहवत् काननं जग्मिवान्, त्वं एव मे गतिः, इति क्ष्मापजः अपि तं अनुययौ. ॥ ७९ ॥

अर्थः—एम कहीने ते सिंहशेठ रात्रिए सिंहनी पेठे वनमां चाल्या गया, मारो आधार तमोज छे, एम कहीने ते राजकुमार पण तेनी पाछड गयो. ॥ ७९ ॥

**निशान्ते तावपश्यन्तः शयनादिषु मन्त्रिणः । पदश्रेण्यनुसारेण भुवं भूरितरां ययुः ॥ ८० ॥**

अन्वयः–निशा अंते शयन आदिषु ता अपश्यंतः मंत्रिणः पद श्रेणि अनुसारेण भूरितरां भुवं ययुः. ॥ ८० ॥

अर्थः–रात्रिने अंते शय्याआदिकमां तेओ बन्नेने नही जोवाथी, मंत्रीओ तेओना पगलांओनी पंक्तिने अनुसारे घणी जमीन ओळंगी गया. ॥ ८० ॥

**तौ गृहीतपरिव्रज्यौ पादपोपगमस्थितौ । नित्यव्योमभ्रमश्रान्तौ सुप्तौ सूर्योडुपाविव ॥ ८१ ॥**

**कश्चिच्छैलतले वीक्ष्य वैलक्ष्यकलुषाननाः । मन्त्रिणः प्रणिपत्योचुश्चाटूच्चयमयं वचः ॥ ८२ ॥ युग्मं ॥**

अन्वयः–गृहीत परिव्रज्यौ, पादप उपगम स्थितौ, नित्य व्योम भ्रम श्रांतौ सुप्तौ सूर्य उडुपौ इव, तौ, ॥ ८१ ॥ कचित् शैल-

तले वीक्ष्य वैलक्ष्य कलुष आननाः मंत्रिणः प्रणिपत्य चटु उच्चयमयं वचः ऊचुः. ॥ ८२ ॥ युग्मं ॥

अर्थः—ग्रहण करेल छे दीक्षा जेओए, तथा पादपोपगम आसने रहेला, अने हमेशां आकाशमां भ्रमण करवाथी थाकीने सूइ गयेला जाणे सूर्य अने चंद्र होय नही! एवा तेओ बन्नेने, ॥ ८१ ॥ कोइक पर्वतनी मेखलामां पडेला जोइने वीलखा पडवाथी उतरी गयेला मुखवाळा एवा ते मंत्रीओ तेओने नमीने काकलुदी भरेलां वचनो कहेवा लाग्या के, ॥ ८२ ॥ युग्मं ॥

**क्षम्यतामपराधो नः सकटूक्तिपटूकृतः । उत्तिष्ठतं द्रुतं यामः स्वामिनौ नागपत्तनम् ॥ ८३ ॥**

अन्वयः—सकटु उक्ति पटूकृतः नः अपराधः क्षम्यतां? (हे) स्वामिनौ! द्रुतं उत्तिष्ठतं, नागपत्तनं यामः. ॥ ८३ ॥

अर्थः—कडवां वचनोना संबंधमां हवे सुधारेला अमारा अपराधनी आप क्षमा करो? हे स्वामी! तुरत उठो? हवे आपणे नागपुरतरफ जइये. ॥ ८३ ॥

**मत्वा वृत्तमिदं भूपः कुप्यन्यन्त्रे तिलानिव । दुःखश्यामतनूनस्मान्सान्वयान्पीलयिष्यति ॥ ८४ ॥**

अन्वयः—इदं वृत्तं मत्वा भूपः कुप्यन् यंत्रे तिलान् इव, दुःख श्याम तनून् अस्मान् सान्वयान् पीलयिष्यति. ॥ ८४ ॥

अर्थः—आ वृत्तांत जाणीने राजा क्रोध पामीने घाणीमां तलनीपेठे, दुःखथी श्याम शरीरवाळा अमोने कुटुंबसहित पीली नाखशे.

**तत्कृपाब्धी कृपां कृत्वा पश्यतं जल्पतं च नः । दृग्भिः प्रसादसार्द्राभिः स्मितधौताधरैर्मुखैः ॥ ८५ ॥**

अन्वयः—तत् (हे) कृपाब्धी! कृपां कृत्वा प्रसाद सार्द्राभिः दृग्भिः नः पश्यतं? च स्मित धौत अधरैः मुखैः जल्पतं? ॥ ८५ ॥

सान्वय भाषांतर ॥१४६२॥

अर्थः-माटे हे दयासागर! तमो कृपा करीने आनंदाश्रुथी भीनी आंखोवडे अमारीतरफ जुओ? अने हास्ययुक्त होठोवाळा मुखवडे अमारी साथे बोलो? ॥ ८५ ॥

**व्यर्थीभूयाथ सचिवैरित्यादिचटुवादिभिः । स्वरूपमाशु भूपस्तज्ज्ञापितः सत्वरैश्चरैः ॥ ८६ ॥**

अन्वयः-अथ इत्यादि चटु वादिभिः सचिवैः व्यर्थीभूय सत्वरैः चरैः आशु तत् स्वरूपं भूपः ज्ञापितः. ॥ ८६ ॥

अर्थः-पछी इत्यादि मिष्ट वचनो बोलनारा ते मंत्रिओनां वचनोपर ते बन्नेए कंइ लक्ष न आपवाथी कंटाळीने तेओए वेगवंत दूतोमारफते तुरत ते वृत्तांत राजाने जणाव्यो. ॥ ८६ ॥

**बध्ध्वा विवाह्यस्तनुजः सिंहो वध्यस्तु वैरिवत् । इति कुप्यन्नृपोऽप्यागाद्वाहनैर्वेगवत्तरैः ॥ ८७ ॥**

अन्वयः-तनुजः बध्ध्वा विवाह्यः, सिंहः तु वैरिवत् वध्यः, इति कुप्यन् नृपः अपि वेगवत्तरैः वाहनैः आगात्. ॥ ८७ ॥

अर्थः—पुत्रने बांधीने (पण) परणाववो, अने ते सिंहशेठने तो वैरीनीपेठे मारीज नाखवो, एम क्रोध पामतो राजा पण अति वेगवाळां वाहनो मारफते (त्यां) आवी पहोंच्यो. ॥ ८७ ॥

**ईदृग्विरुद्धबुद्धिस्तौ स ददर्श महामुनी । सेव्यमानपदौ व्याघ्रद्वीपिसिंहादिजन्तुभिः ॥ ८८ ॥**

अन्वयः—ईदृग् विरुद्ध बुद्धिः सः, व्याघ्र द्वीपि सिंह आदि जंतुभिः सेव्यमान पादौ तौ महामुनी ददर्श. ॥ ८८ ॥

अर्थः—एरीते विपरीत बुद्धिवाळा ते राजाए वाघ दीपडा, तथा सिंह आदिक प्राणीओथी सेवाता चरणोवाळा ते बन्ने महान् मुनिराजोने जोया. ॥ ८८ ॥

**प्रभाविनाविमौ शक्यौ न पराभवितुं बलात् । भक्त्यैव भाष्यावित्यन्तर्ध्यायान्राजा जगाम तौ ॥ ८९ ॥**

अन्वयः—प्रभाविनौ इमौ बलात् पराभवितुं शक्यौ न, भक्त्या एव भाष्यौ, इति अंतः ध्यायन् राजा तौ जगाम ॥ ८९ ॥

अर्थः—महान् प्रभाववाळा एवा आ बन्नेनो बळात्कारे पराभव थइ शकशे नही, माटे भक्तिथीज तेओने बोलाववा, एम मनमां विचारतो राजा तेओनी पासे गयो. ॥ ८९ ॥

**श्वापदैर्दत्तमार्गं तं मार्गन्तं वीक्षणान्यपि । नमन्तं चटुमन्तं च नेक्षांचक्रतुरप्यमू ॥ ९० ॥**

अन्वयः—श्वापदैः दत्त मार्गं, वीक्षणानि अपि मार्गंतं, नमंतं च चाटुमंतं तं अमू ईक्षांचक्रतुः अपि न. ॥ ८९ ॥

अर्थः—ते जंगली प्राणीओए दीधेलो छे जवानो मार्ग जेने, तथा फक्त सामे जोवानीज मागणी करता, नमता, अने मिष्ट वचनो बोलता एवा ते राजानी सामे पण तेओ बन्नेए जोयुं नही. ॥ ९० ॥

**तौ तु मासोपवासान्ते स्तूयमानौ सुरासुरैः । शुद्धध्यानवशीभूतां भेजाते मुक्तिवल्लभाम् ॥ ९१ ॥**

अन्वयः—तु मास उपवास अंते सुर असुरैः स्तूयमानौ तौ शुद्ध ध्यान वशीभूतां मुक्ति वल्लभां भेजाते. ॥ ९१ ॥

अर्थः—पछी एक मासना उपवासने अंते देव दानवोथी स्तुती कराता एवा तेओ बन्ने शुद्ध ध्यानथी वश थएली मुक्तिरूपी स्त्रीने प्राप्त थया. ॥ ९१ ॥

**न योजनशतादूर्ध्वं यामीति तव निश्चयः । असंख्यैर्योजनैर्मित्र मां मुक्त्वा किमगाः शिवम् ॥ ९२ ॥**

अन्वयः—(हे) मित्र ! योजन शतात् ऊर्ध्वं न यामि, इति तव निश्चयः, मां मुक्त्वा असंख्यैः योजनैः शिवं किं अगाः ? ॥९२॥

अर्थः—हे मित्र ! एकसो जोजनथी आगळ हुं जतो नथी, एवो तारो निश्चय हतो, छतां मने छोडीने असंख्य जोजन दूर मोक्षमां तुं केम गयो ? ॥ ९२ ॥

**इति क्रन्दन्नृपः सिंहनाम्नो मित्रस्य विग्रहम् । पुत्रस्य चाग्नौ चिक्षेप स्वं च शोकमहानले ॥ ९३ ॥**

अन्वयः—इति क्रंदन् नृपः सिंहनाम्नः मित्रस्य, च पुत्रस्य विग्रहं अग्नौ चिक्षेप, च स्वं शोक महानले. ॥ ९३ ॥

अर्थः—एरीते विलाप करता ते राजाए ते सिंहनामना पोताना मित्रना, तथा पुत्रना शरीरनो अग्निसंस्कार कर्यो, अने पोताना आत्माने शोकरूपी भयंकर अग्निमां बाळवा लाग्यो. ॥ ९३ ॥

**तयोः सत्त्वातिरेकोक्त्या विबुधैर्बोधितस्ततः । धर्मकर्मठधीः प्राप स्वपुरं भूपुरन्दरः ॥ ९४ ॥**

अन्वयः—ततः तयोः सत्त्व अतिरेक उक्त्या विबुधैः बोधितः, धर्म कर्मठ धीः भू पुरंदरः स्वपुरं प्राप. ॥ ९४ ॥

अर्थः—पछी तेओ बन्नेना अतिपराक्रमना वर्णनथी देवोए प्रतिबोधेलो, तथा तेथी धर्मकार्यनी बुद्धिवाळो ते राजा पोताना

नगरमां गयो. ॥ ९४ ॥

**वरं तत्याज यः प्राणान्न पुनः स्वीकृतं व्रतम् । स सिंह इव सेवध्वं जना दिग्विरतौ रतिम् ॥ ९५ ॥**

अन्वयः–वरं यः प्राणान् तत्याज, पुनः स्वीकृतं व्रतं न, सः सिंहः इव (हे) जनाः! दिग् विरतौ रतिं सेवध्वं? ॥ ९५ ॥

अर्थः–खुशीथी जेणे प्राणोनो त्याग कर्यो, पण अंगीकार करेलुं व्रत तज्युं नही, एवा ते सिंहशेठनीपेठे, हे मनुष्यो! तमो दिग्विरमणनामना व्रतमां प्रेम करो? ॥ ९५ ॥

**यद्भोग्यमुपभोग्यं च पारिमित्येन गृह्यते । भोगोपभोगमानाख्यं तद्द्वितीयं गुणव्रतम् ॥ ९६ ॥**

अन्वयः–भोग्यं च उपभोग्यं यत् पारिमित्येन गृह्यते, तत् भोग उपभोग मान आख्यं द्वितीयं गुण व्रतं. ॥ ९६ ॥

अर्थः–भोगमां तथा उपभोगमां लेवानी वस्तुओने जे (तेना) (नियमित) प्रमाणपूर्वक लेवामां आवे छे, तेने "भोगोपभोग परिमाण" नामनुं बीजुं गुणव्रत कहेवामां आवे छे. ॥ ९६ ॥

**सुकृतश्रीनिवासैकसरोजं सप्तमं व्रतम् । चित्रमत्र परत्रापि सुरभीकुरुते सतः ॥ ९७ ॥**

अन्वयः–सप्तमं व्रतं सुकृत श्रीनिवास एक सरोजं, चित्रं अत्र परत्र अपि सतः सुरभीकुरुते. ॥ ९७ ॥

अर्थः–आ सातमुं व्रत पुण्यरूपी लक्ष्मीना निवासमाटे एक कमलसरखुं छे, परंतु आश्चर्यनी बिना छे के, (ते व्रतरूपी कमल) आलोक अने परलोकमां पण सज्जनोने सुगंधी करे छे. ॥ ९७ ॥

कृती मितीकृताहारः सप्तमव्रतलीलया । मुच्यते संचितेनापि कर्मरोगेण धर्मवत् ॥ ९८ ॥

अन्वयः-मितीकृत आहारः कृती सप्तम व्रत लीलया धर्मवत् संचितेन कर्म रोगेण अपि मुच्यते. ॥ ९८ ॥

अर्थः—प्रमाणपूर्वक भोजन करनारो चतुर मनुष्य सातमा व्रतनी लीलाथी धर्मराजानीपेठे संचित करेलां कर्मोरूपी रोगथी पण मुक्त थाय छे. ॥ ९८ ॥

तथाहि सिद्धं साहित्यमिव विद्यासु भासुरम् । नगरीषु गुरुश्रीकमस्ति श्रीकमलं पुरम् ॥ ९९ ॥

अन्वयः-तथाहि-विद्यासु सिद्ध साहित्यं इव भासुरं, नगरीषु गुरुश्रीकं श्रीकमलं पुरं अस्ति. ॥ ९९ ॥

अर्थः-ते धर्मराजानुं उदाहरण कहे छे-विद्याओमां सिद्ध करेलां साहित्यनीपेठे देदीप्यमान, अने नगरीओमां महान् शोभावाळुं श्रीकमलनामनुं नगर छे. ॥ ९९ ॥

तत्राजनिष्ट राजेन्दुः सत्याख्यो राजशेखरः । कालरात्रेरिवादर्शो यदसिर्ददृशेऽरिभिः ॥ ६०० ॥

अन्वयः-तत्र राजशेखरः सत्य आख्यः राजेंदुः अजनिष्ट, यत् असिः काल रात्रेः आदर्शः इव अरिभिः ददृशे. ॥ ६०० ॥

अर्थः—ते नगरमां राजाओनेविषे मुकुटसमान सत्यनामनो राजा हतो, के जेनी तलवारने काळरात्रिना आदर्शनीपेठे शत्रुओ जोता हता. ॥ ६०० ॥

सकलैः स कलापात्रैः क्षात्रैरिव गुणैः श्रितः । कस्य कस्य नमस्यत्वं भूभुजङ्गो न जग्मिवान् ॥ १ ॥

अन्वयः–क्षात्रैः गुणैः इव सकलैः कलापात्रैः श्रितः सः भू भुजंगः कस्य कस्य नमस्यत्वं न जग्मिवान ? ॥ १ ॥

अर्थः–क्षत्रीयसंबंधी गुणोसरखा सघळा कलापात्र विद्वानोवडे आश्रित थयेलो ते राजा कोना कोना नमस्कारपणाने न पाम्यो हतो ? (अर्थात् सर्व लोको तेने नमता हता.) ॥ १ ॥

**संभावि भुवि दुर्भिक्षं देव द्वादशवार्षिकम् । इत्येकदा पुरस्तस्य ज्योतिःशास्त्रविदोऽवदन् ॥ २ ॥**

अन्वयः–(हे) देव ! भुवि द्वादश वार्षिकं दुर्भिक्षं भावि, इति एकदा ज्योतिः शास्त्र विदः तस्य पुरः अवदन्. ॥ २ ॥

अर्थः–हे स्वामी ! पृथ्वीपर बार वर्षोनो दुकाळ पडवानो छे, एम एक दिवसे ज्योतिःशास्त्रोना जाणकार विद्वानोए तेनी पासे कह्युं

**सर्वथा नान्यथादृष्टगीरमीषां मनीषिणाम् । चकम्पे वचसा तेन स वातेन तृणं यथा ॥ ३ ॥**

अन्वयः—अमीषां मनीषिणां अदृष्ट गीः सर्वथा अन्यथा न, यथा वातेन तृणं, तेन वचसा सः चकंपे. ॥ ३ ॥

अर्थः–आ बुद्धिवंत ज्योतिषीओनी भविष्यवाणी कोइ पण रीते जूठी पडशे नही, ( एम विचारी ) वायुथी घासनीपेठे (तेओना) ते वचनथी ते कंपवा लाग्यो. ॥ ३ ॥

**रौप्यकाञ्चनरत्नादिसर्वस्वव्ययतस्ततः । कणानां च तृणानां च स चक्रे संग्रहं बहुम् ॥ ४ ॥**

अन्वयः–ततः रौप्य कांचन रत्न आदि सर्वस्व व्ययतः कणानां च तृणानां च सः बहुं संग्रहं चक्रे. ॥ ४ ॥

अर्थः–पछी रूपुं, सुवर्ण तथा रत्नआदिक सर्व मिलकत वेचीने अनाजनो तथा घासनो तेणे घणो संग्रह कर्यो. ॥ ४ ॥

**अथान्नसंग्रहव्यग्रे समग्रेऽपि जनेऽभितः । विवेश मध्ये देशस्य कापि दुर्भिक्षवर्णिका ॥ ५ ॥**

अन्वयः—अथ अभितः समग्रे अपि जने अन्न संग्रह व्यग्रे देशस्य मध्ये का अपि दुर्भिक्ष वर्णिका विवेश ॥ ५ ॥

अर्थः—पछी चारे बाजुथी सर्व लोको अनाजनो संग्रह करवामांज व्यग्र थवाथी देशनी अंदर थोडोघणो दुष्काळनो नमुनो दाखल थयो. ॥ ५ ॥

**अन्नसंग्रहविक्रीतसर्वालंकरणो जनः । फाल्गुणच्युतपत्रालिशालजालवदाबभौ ॥ ६ ॥**

अन्वयः–अन्न संग्रह विक्रीत सर्व अलंकरणः जनः, फाल्गुण च्युत पत्र आलि शाल जालवत् आबभौ ॥ ६ ॥

अर्थः–अनाजना संग्रह माटे वेची नाखेल छे सर्व आभूषणो जेओए एवा लोको फागण मासमां खरी गयेलां पत्रोनी श्रेणिओवाळां (ठुंठ) वृक्षोनां समूहनीपेठे देखावा लाग्या. ॥ ६ ॥

**निर्धान्या निर्धनाः काश्चिद् व्रजिष्यन्ति प्रजाः क मे । शुचेत्यचिन्तयद्राजा प्राजापत्येन लज्जितः ॥७॥**

अन्वयः—मे काश्चित् निर्धान्याः निर्धनाः प्रजाः क्व व्रजिष्यंति ? इति प्राजापत्येन लज्जितः राजा शुचा अचिंतयत् ॥ ७ ॥

अर्थः–मारी केटलीक धान्य विनानी तथा धन विनानी प्रजा क्यां जशे ? एम (पोताना) प्रजापतिपणाथी शरमायेलो ते राजा शोकथी चिंतातुर बनवा लाग्यो. ॥ ७ ॥

**इति नित्यं ज्वलच्चिन्तातप्तस्योर्वीशितुर्मुदे । आषाढस्याद्य एवाह्नि पौरस्त्यपवनो ववौ ॥ ८ ॥**

अन्वयः-इति नित्यं ज्वलत् चिंता तप्तस्य उर्वीशितुः मुदे आषाढस्य आद्ये एव अह्नि पौरस्त्य पवनः ववौ. ॥ ८ ॥

अर्थः-ए रीते हमेशां (हृदयमां) बळती चिंताथी तपेला ते राजाने हर्ष करनारो असाडमासना पहेलेज दिवसे पूर्व दिशा तरफनो पवन वावा लाग्यो. ॥ ८ ॥

**अथाङ्कुर इव प्राच्यां सुभिक्षफलशाखिनः । अम्बुदस्य लवोऽदर्शि मुदितेन महोभुजा ॥ ९ ॥**

अन्वयः—अथ सुभिक्ष फल शाखिनः अंकुरः इव, प्राच्यां मुदितेन महीभुजा अंबुदस्य लवः अदर्शि. ॥ ९ ॥

अर्थः—पछी सुकाळरूपी फलद्रुप वृक्षना अंकुरासरखो पूर्व दिशामां हर्षित थयेला ते राजाए वादळांनो लेशमात्र जोयो. ॥९॥

**श्रीरिवाभ्युदयद्भाग्यभरस्य जलभृल्लवः । अवर्धतातिमात्रं स धात्रीश्वरमुदा समम् ॥ १० ॥**

अन्वयः-अभ्युदयत् भाग्यस्य श्रीः इवः सः जलभृत् लवः, धात्री ईश्वर मुदा समं अतिमात्रं अवर्धत. ॥ १० ॥

अर्थः-(पछी) उदय पामता भाग्यवाळा मनुष्यनी लक्ष्मीनीपेठे ते वादळांनो लेश राजाना हर्षनी साथे अत्यंत वृद्धि पामवा लाग्यो.

**अवग्रहग्रहान्विद्युदङ्गुल्या तर्जयन्निव । बलाकादर्शनैर्ज्योतिर्विदां वाचो हसन्निव ॥ ११ ॥**

**दर्शनादेव दुर्भिक्षं द्विषं भुक्त्वेव निर्नदन् । धारामुशलसंपातैः क्ष्मादुःखमिव खण्डयन् ॥ १२ ॥**

**अब्धिद्वयजलाकर्षनालयन्त्राभकार्मुकः । स ववर्ष प्रजाहर्षप्रकर्षाश्रुघनं घनः ॥१३॥ त्रिभिर्विशेषकम् ॥**

अन्वयः-विद्युत् अंगुल्या अवग्रह ग्रहान् तर्जयन् इव, बलाका दशनैः ज्योतिर्विदां वाचः हसन् इव, ॥ ११ ॥ दर्शनात् एव दुर्भिक्षं द्विषं भुक्त्वा निर्नदन् इव, धारा मुशल संपातैः क्ष्मा दुःखं खंडयन् इव, ॥ १२ ॥ अब्धि द्वय जल आकर्ष नाल यंत्र आभ कार्मुकः सः घनः प्रजा हर्ष प्रकर्ष अश्रु घनं ववर्ष. ॥ १३ ॥ त्रिभिर्विशेषकं ॥

अर्थः—विजळीरूपी आंगळीथी अटकायत करनारा ग्रहोनो जाणे तिरस्कार करतो होय नही! तथा बगलांओरूपी दांतोवडे ते ज्योतिषीओनां वचनोनी जाणे हांसी करतो होय नही!॥ ११ ॥ देखावमात्रथीज दुष्काळरूपी शत्रुनुं भक्षण करीने जाणे गाजतो होय नही! तथा धाराओरूपी सांबेलानां घाथी पृथ्वीपरनां दुःखने जाणे खांडी नाखतो होय नही! ॥ १२ ॥ तथा बन्ने महासागरोना जलने खेंची लेवामाटे नळना संचासरखा मेघधनुषवाळो ते वरसाद, प्रजाना हर्षना उभराथी झरतां अश्रुओ सरखो जोरथी वरसवा लाग्यो. ॥ १३ ॥ त्रिभिर्विशेषकं ॥

**अन्योन्यकरतालाभिर्ज्योतिषज्ञोपहासकृत् । वृष्टयानयैव निष्पन्नः काल इत्यालपज्जनः ॥ १४ ॥**

अन्वयः—अन्योन्य करतालाभिः ज्योतिषज्ञ उपहासकृत् जनः अनया वृष्ट्या एव कालः निष्पन्नः इति आलपत्. ॥ १४ ॥

अर्थः-परस्पर हाथमां तालीओ देइने ते ज्योतिषिओना अज्ञाननी हांसी करता लोको, आ वरसादथी दुष्काळ पूरो थयो! एम कहेवा लाग्या. ॥ १४ ॥

**कृतार्थां पृथिवीं कृत्वा लोकस्तवभयादिव । अब्दोऽथ क्वाप्यगादेष एषैव महतां गतिः ॥ १५ ॥**

अन्वयः—पृथिवीं कृतार्थां कृत्वा अथ लोक स्तव भयात् इव, एषः अब्दः क्व अपि अगात्, महतां गतिः एषा एव. ॥१५॥

अर्थः—(ए रीते) पृथ्वीने आनंदित करीने, पछी जाणे मनुष्योनी प्रशंसाना भयथी होय नही! तेम ते वरसाद क्यांक चाल्यो गयो, केमके महान परोपकारीओनी एवीज रीत होय छे. ॥ १५ ॥

**निवृत्तचिन्तासंतापं ततः क्ष्मापं परेऽहनि । एत्य हस्तमिलद्भालो वनपालो व्यजिज्ञपत् ॥ १६ ॥**

अन्वयः-ततः निवृत्त चिंता संतापं क्ष्मापं परे अहनि वनपालः एत्य हस्त मिलत् भालः व्यजिज्ञपत्. ॥ १६ ॥

अर्थः—पछी नष्ट थयेल छे चिंतानो संताप जेनो, एवा ते राजाने, वळते दिवसे वनपाले आवीने, ललाटपर हाथ जोडीने वधामणी आपी के, ॥ १६ ॥

**त्वदुद्याने चतुर्मासवासमासूत्र्य तस्थुषः । युगन्धरमुनेरद्योत्पेदे केवलमुज्ज्वलम् ॥ १७ ॥**

अन्वयः—चतुर्मास वासं आसूत्र्य त्वत् उद्याने तस्थुषः युगंधर मुनेः अद्य उज्ज्वलं केवलं उत्पेदे. ॥ १७ ॥

अर्थः-चतुर्मास रहेवानो निश्चय करीने आपना बगीचामां रहेला युगंधरनामना मुनिराजने आजे निर्मल केवलज्ञान उत्पन्न थयुं छे.

**अथारामिकमापूर्य परमैः पारितोषिकैः । आरामाय जगामायममायसुकृतः कृती ॥ १८ ॥**

अन्वयः—अथ अमाय सुकृतः कृती अयं आरामिकं परमैः पारितोषिकैः आपूर्य आरामाय जगाम. ॥ १८ ॥

अर्थः—पछी निष्कपट पुण्यशाली तथा चतुर एवो ते राजा ते वनपालने उमदां इनामोथी भरीने ( खुशी करीने पोताना ) ते

बगीचामां गयो. ॥ १८ ॥

**स त्रिः प्रदक्षिणीकृत्य प्रणिपत्य च तं मुनिम् । सद्धर्मदेशनां श्रुत्वा पप्रच्छेति कृताञ्जलिः ॥ १९ ॥**

अन्वयः—सः तं मुनिं त्रिः प्रदक्षिणीकृत्य च प्रणिपत्य सद्धर्म देशनां श्रुत्वा कृत अंजलिः इति पप्रच्छ. ॥ १९ ॥

अन्वयः-(त्यां) ते राजा ते मुनिराजने त्रण प्रदक्षिणा करीने तथा उत्तम धर्मदेशना सांभळीने हाथ जोडी एम पूछवा लाग्यो के,

**प्रभो ज्योतिर्विदां तेषामवृष्टिविषयं वचः । कथं विघट्टितं पृथ्व्यामथ स प्राह केवली ॥ २० ॥**

अन्वयः—( हे ) प्रभो! पृथ्व्यां तेषां ज्योतिर्विदां अवृष्टि विषयं वचः कथं विघट्टितं? अथ सः केवली प्राह, ॥ २० ॥

अर्थः—हे स्वामी! पृथ्वीपर ते ज्योतिषीओनुं वरसाद नही थाय, एरीतनुं वचन केम जूठुं पड्युं? त्यारे ते केवली भगवाने कह्युं के, ॥ २० ॥

**ग्रहयोगेन दुर्भिक्षं भवद्द्वादशवार्षिकम् । कारणेन न येनाभूत्तदमीषामगोचरम् ॥ २१ ॥**

अन्वयः—ग्रह योगेन भवत् द्वादश वार्षिकं दुर्भिक्षं येन कारणेन न अभूत्, तत् अमीषां अगोचरं. ॥ २१ ॥

अर्थः-ग्रहोना योगथी थनारो बार वर्षोनो दुष्काळ जे कारणथी थयो नही, ते कारण तेओना जाणवामां नहोतुं आव्युं. ॥२१॥

**पुरे पुरिमतालाख्ये नरः प्रवर इत्यभूत् । महारोगैः पराभूतः स युवापि स्वकर्मतः ॥ २२ ॥**

अन्वयः-पुरिमतालाख्ये पुरे प्रवरः इति नरः अभूत्, सः युवा अपि स्वकर्मतः महारोगैः पराभूतः. ॥ २२ ॥

अर्थः—पुरिमतालनामना नगरमां प्रवरनामनो (एक) पुरुष हतो, ते युवान छतां पण पोताना कर्मयोगे महान् रोगोथी पराभव पामेलो हतो. ॥ २२ ॥

**सैष स्वाद्यं रसस्वादविलोलरसनारसः । जग्राह यं यमाहारं विकारमकरोत्स सः ॥ २३ ॥**

अन्वयः—रस स्वाद विलोल रसना रसः सः एषः यं यं आहारं जग्राह, सः सः विकारं अकरोत्. ॥ २३ ॥

अर्थ—रसोना स्वादमां लालचु थएली जिह्वाना रसवाळो ते प्रवर जे जे आहार ग्रहण करतो हतो, ते ते तेने विकार उत्पन्न करतो हतो. ॥ २३ ॥

**सोऽथ दध्यौ य आहारः शरीराहितकारकः । प्रत्याख्यानादनाहारफलं किं तस्य नाददे ॥ २४ ॥**

अन्वयः—अथ सः दध्यौ, यः आहारः शरीर अहित कारकः, तस्य प्रत्याख्यानात् अनाहार फलं किं न आददे? ॥ २४ ॥

अर्थः—पछी तेणे विचार्युं के, जे भोजन शरीरने नुकशान करनारुं छे, तेनुं पच्चक्खाण करीने अनाहारनुं फल हुं शा माटे न लेउं ?

**शूकासंकोचितदृशो भजन्ति सुदृशो न माम् । ताः प्रत्याख्याय किं साक्षान्न गृह्णे मर्त्यताफलम् ॥२५॥**

अन्वयः—शूका संकोचित दृशः सुदृशः मां न भजंति, ताः प्रत्याख्याय साक्षात् मर्त्यता फलं किं न गृह्णे ? ॥ २५ ॥

अर्थः—सूगथी संकोचेली आंखोवाळी स्त्रीओ मने स्वीकारती नथी, तो हवे तेओसंबंधी पच्चक्खाण करीने साक्षात् (हुं) मनुष्यजन्मनुं फल शामाटे ग्रहण न करुं? ॥ २५ ॥

इत्युज्ज्वलीकृतमतिर्मतिभाजां मतल्लिका । गुरून्गुणगुरूनेष साक्षीकृत्येदमब्रवोत् ॥ २६ ॥

अन्वयः–इति उज्ज्वलीकृत मतिः, मति भाजां मतल्लिका, एषः गुण गुरून् गुरून् साक्षीकृत्य इदं अब्रवीत्. ॥ २६ ॥

अर्थः–ए रीते निर्मल करेली छे, बुद्धि जेणे, तथा बुद्धिवानोमां शिरोमणि एवा ते प्रवरे श्रेष्ट गुणोवाळा गुरुमहाराजने साक्षीरूप करीने एम कह्युं के, ॥ २६ ॥

स्निग्धाम्लमधुरक्षारानाहारान्नाहमाहरे । कटुतिक्तकषायांस्तु गृह्णाम्यूनोदरव्रतः ॥ २७ ॥

अन्वयः–स्निग्ध आम्ल मधुर क्षारान् आहारान् अहं न आहरे, तु ऊन उदर व्रत कटु तिक्त कषायान् गृह्णामि. ॥ २७ ॥

अर्थः–घृतआदिकवाळां पुष्ट, खाटां, मिष्ट, तथा खारां भोजन हुं नही करुं, अने ऊनोदरी व्रत स्वीकारीने कडवां, तीखां, तथा तूरां ( स्वल्प ) भोजन हुं करीश. ॥ २७ ॥

यदासक्तान्नरान्मुक्तिरीर्ष्ययेवेक्षतेऽपि न । ताः प्रत्याख्यामि वामाक्षीर्भवाब्धेरधिदेवताः ॥ २८ ॥

अन्वयः–यत् आसक्तान् नरान् मुक्तिः ईर्ष्यया इव ईक्षते अपि न, भव अब्धेः अधिदेवताः ताः वामाक्षीः प्रत्याख्यामि. २८

अर्थः—जे स्त्रीमां आसक्त थयेला पुरुषोने मुक्ति जाणे इर्ष्याथी सामे पण जोती नथी, अने जे संसारसागरनी (जाणे) अधिष्टायक देवीओ छे, एवी स्त्रीओनुं पण हुं पच्चख्खाण करुं छुं. ॥ २८ ॥

इत्यादृतं व्रतं सत्त्वविशालः पालयन्नयम् । क्रमेण मुमुचे रोगैरसाध्यं सुकृतस्य किम् ॥ २९ ॥

अन्वयः—इति आदृतं व्रतं सत्त्व विशालः अयं पालयन् क्रमेण रोगैः मुमुचे, सुकृतस्य किं असाध्यं? ॥ २९ ॥

अर्थः—एरीते स्वीकारेलां व्रतने महापराक्रमी एवो ते प्रवर पालतो थको अनुक्रमे रोगरहित थयो, केमके पुण्यथी शुं साधी शकातुं नथी? ॥ २९ ॥

**तदमुञ्चन्व्रतं धीरो नीरोगत्वं गतोऽपि सः । क्रमेणाभूद्विभूतीनां प्रभूतानामपि प्रभुः ॥ ३० ॥**

अन्वयः—नीरोगत्वं गतः अपि तत् व्रतं अमुंचन् सः धीरः क्रमेण प्रभूतानां विभूतीनां अपि प्रभुः अभूत्. ॥ ३० ॥

अर्थः—नीरोगीपणाने पाम्या छतां पण ते व्रतने नही छोडतो एवो ते धैर्यवान् प्रवर अनुक्रमे घणी समृद्धिओनो स्वामी थयो.

**तद्गृहे व्यलसन्दास्यः स्मरलास्यलसद्दृशः । स्वर्गवेश्या इव स्वर्गमुन्मुच्याल्पविभूतिकम् ॥ ३१ ॥**

अन्वयः—अल्प विभूतिकं स्वर्गं उन्मुच्य स्वर्ग वेश्याः इव, स्मर लास्य लसद् दृशः दास्यः तत् गृहे व्यलसन्. ॥ ३१ ॥

अर्थः—स्वल्प समृद्धिवाळा स्वर्गने छोडीने जाणे अप्सराओ (आवी) होय नही! एवी कामदेवना नृत्य माटे उल्लसायमान चक्षुओवाळी दासीओ तेने घेर आनंदपूर्वक रहेती हती. ॥ ३१ ॥

**सत्संयमगुणस्वान्तावष्टम्भस्तम्भयन्त्रितः । नाक्रष्टुं विषयैः शेके तस्येन्द्रियगणः स तैः ॥ ३२ ॥**

अन्वयः—सत् संयम गुण स्वांत अवष्टंभ स्तंभ यंत्रितः तस्य सः इंद्रिय गणः तैः विषयैः आक्रष्टुं न शेके. ॥ ३२ ॥

अर्थः—तेना उत्तम संयमगुणवाळा हृदयना आधाररूप स्तंभमां बांधेला तेना ते इंद्रियोना समूहने ते विषयो खेंची शक्या नही.

आययौ मार्गकोटिभिर्धनं यत्तस्य नित्यशः । ययो पात्रदयोचित्यदानमार्गत्रयेण तत् ॥ ३३ ॥

अन्वयः—नित्यशः तस्य यत् मार्ग कोटीभिः धनं आययौ, तत् पात्र दान दया औचित्य दान मार्ग त्रयेण ययौ. ॥ ३३ ॥

अर्थः—हमेशां तेने जे क्रोडो मार्गेथी धन आवतुं हतुं, ते सुपात्रदान, दयादान अने औचित्यदानरूपी त्रण मार्गेथी जतुं हतुं.

अन्नार्थविग्रहव्यग्रपितृमातृसुतोद्धतम् । एकदा रङ्कदुःप्रेक्षं दुर्भिक्षं समभूद्भुवि ॥ ३४ ॥

अन्वयः—एकदा अन्न अर्थ विग्रह व्यग्र पितृ मातृ सुत उद्धतं, रंक दुःप्रेक्षं दुर्भिक्षं भुवि समभूत्. ॥ ३४ ॥

अर्थः—एक वखते अनाजमाटे लडी मरता माता, पिता, तथा पुत्रोना भयंकर देखाववाळो, अने रंकोथी न जोइ शकाय एवो दुष्काळ पृथ्वीपर प्रगट थयो. ॥ ३४ ॥

विलीनं दानिनां दानैस्तद्दानं ववृधे तदा । ग्रीष्मे सरोऽम्भः शुष्येत स्यादुद्वीचिस्तु वारिधिः ॥ ३५ ॥

अन्वयः—तदा दानिनां दानैः विलीनं, तत् दानं ववृधे, गीष्मे सरः अंभः शुष्येत, वारिधिः तु उद्वीचिः स्यात्. ॥ ३५ ॥

अर्थः—ते वखते दानेश्वरीओनुं दान नष्ट थयुं, परंतु तेनुं दान वृद्धि पाम्युं, केमके गीष्मऋतुमां तळावनुं जळ सूकाइ जाय छे, परंतु समुद्र उछाळा मारे छे. ॥ ३५ ॥

दुर्भिक्षभीरुभिर्भेजे स एवैको जगज्जनैः । सर्वज्ञदिष्टः संसारभीतैर्धर्म इवाभितः ॥ ३६ ॥

अन्वयः—संसार भीतैः सर्वज्ञ दिष्टः धर्मः इव, दुर्भिक्ष भीरुभिः जगत् जनैः अभितः स एव एकः भेजे. ॥ ३६ ॥

अर्थः—संसारथी डरेला मनुष्यो सर्वज्ञप्रभुए उपदेशेला धर्मने जेम सेवे छे, तेम दुष्काळथी डरेला जगतना लोको चोतरफथी तेनेज एकने सेववा लाग्या. ॥ ३६ ॥

**प्रासुकैः पेयपक्वान्नदधिदुग्धघृतादिभिः । स दिगन्तागतान्साधूँल्लक्षशः प्रत्यलाभयत् ॥ ३७ ॥**

अन्वयः—सः दिगंत आगतान् लक्षशः साधून् प्रासुकैः पेय पक्वान्न दधि दुग्ध घृत आदिभिः प्रत्यलाभयत्. ॥ ३७ ॥

अर्थः-वळी ते प्रवरशेठ दूरदूरथी आवेला लाखोगमे मुनिओने प्रासुक जल, पक्वान्न, दहीं दूध तथा घृतआदिकथी प्रतिलाभता हता,

**पितृभ्रातृसुतीकृत्य श्रावकान्स वयःक्रमात् । प्रत्यहं गृह एवोच्चैरसंख्यातानभोजयत् ॥ ३८ ॥**

अन्वयः-सः प्रत्यहं असंख्यातान् श्रावकान् वचः क्रमात् पितृ भ्रातृ सुतीकृत्य गृहे एव उच्चैः अभोजयत्. ॥ ३८ ॥

अर्थः-(वळी) ते हमेशां असंख्याता श्रावकोने वयना क्रममुजब पिता, भाइ तथा पुत्ररूप लेखीने (पोताने) घेरज सन्मानपूर्वक जमाडतो हतो. ॥ ३८ ॥

**इत्यखण्डव्रतः श्रीमान्प्रवरस्तु वरस्तुतिः । दानैकव्यसनः कालयोगतस्त्रिदिवं गतः ॥ ३९ ॥**

अन्वयः—इति अखंड व्रतः, वर स्तुतिः, श्रीमान्, दान एक व्यसनः प्रवरः तु काल योगतः त्रिदिवं गतः. ॥ ३९ ॥

अर्थः-एरीते अखंडित व्रतवाळो उत्तम प्रशंसावाळो, लक्ष्मीवान्, तथा फक्त दाननाज व्यसनवाळो ते प्रवर शेठ काळ योगे देवलोकमां गयो. ॥ ३९ ॥

**शाश्वतार्हन्महायात्रानित्यनिर्मलधर्मधीः । पूर्णायुश्चिन्तयामास स वासवसमः सुरः ॥ ४० ॥**

अन्वयः—शाश्वत अर्हत् महायात्रा नित्य निर्मल धर्म धीः वासवसमः सः सुरः पूर्ण आयुः चिंतयामास. ॥ ४० ॥

अर्थः—शाश्वता जिनेश्वर प्रभुओनी महान् यात्राओ करवामां हमेशां निर्मल धर्मबुद्धिवाळो ते इन्द्रसामानिक देव आयु पूर्ण थयेथी विचारवा लाग्यो के, ॥ ४० ॥

**श्राद्धो युगप्रधानोऽस्ति यः कश्चिद् भुवि तत्सुतः । भूयासं सार्वभौमोऽपि मा भूवं कलुषे कुले ॥४१॥**

अन्वयः-यः कश्चित् भुवि युग प्रधानः श्राद्धः अस्ति, तत् सुतः भूयासं, कलुषे कुले सार्वभौमः अपि माभूवं. ॥ ४१ ॥

अर्थः—जे कोइ पृथ्वीपर युगप्रधान श्रावक होय, तेना पुत्र तरीके हुं थाउं तो ठीक, परंतु मलीन कुलमां चक्रवर्ती थवुं पण ठीक नही. ॥ ४१ ॥

**इतश्च चित्रशालाख्ये त्वपुरोपपुरे पुरे । श्राद्धोऽस्ति शुद्धबुद्ध्याख्यो विमलाया मनःप्रियः ॥ ४२ ॥**

अन्वयः—इतश्च चित्रशाल आख्ये त्वत्पुर उपपुरे पुरे विमलायाः मनः प्रियः शुद्ध बुद्धि आख्यः श्राद्धः अस्ति. ॥ ४२ ॥

अर्थः–हवे चित्रशालानामना तमारा नगरना परांमां विमलानामनी स्त्रीना हृदयने व्हालो शुद्धबुद्धि नामनो (एक) श्रावक छे.४२॥

**द्वादशव्रतनिर्व्याजपालनोज्ज्वलजीवितः । ईदृग्दुर्भिक्षवाधापि न चक्रे योऽन्नसंग्रहम् ॥ ४३ ॥**

अन्वयः—द्वादश व्रत निर्व्याज पालन उज्ज्वल जीवितः यः ईदृग् दुर्भिक्ष वाचा अपि अन्न संग्रहं न चक्रे. ॥ ४३ ॥

अर्थः–बारे व्रतोने निष्कपटपणे पालवामां निर्मल जीवनवाळा एवा जे श्रावके, आवा दुष्काळनी अफवाथी पण अनाजनो संग्रह कर्यो नथी. ॥ ४३ ॥

**स देवस्तत्प्रियाकुक्षिमाप सुस्वप्नसूचितः । साप्यसूत सतो पुत्रं पवित्रं ह्यस्तने दिने ॥ ४४ ॥**

अन्वयः–सः देवः सुस्वप्न सूचितः तत् प्रिया कुक्षिं आप, सा सती अपि ह्यस्तने दिने पवित्रं पुत्रं असूत. ॥ ४४ ॥

अर्थः–(हवे) ते देव उत्तम स्वप्नथी सूचित थइने ते श्रावकनी स्त्रीनी कुक्षिमां उत्पन्न थयो, अने ते सती स्त्रीए पण गइकालेज ते पवित्र पुत्रने जन्म आप्यो छे. ॥ ४४ ॥

**महाभाग्यवतो जन्म तस्य जित्वाशु दुर्ग्रहान् । बभञ्ज बत दुर्भिक्षमिह द्वादशवार्षिकम् ॥ ४५ ॥**

अन्वयः–तस्य महाभाग्यवतः जन्म आशु दुर्ग्रहान् जित्वा बत इह द्वादश वार्षिकं दुर्भिक्षं बभंज. ॥ ४५ ॥

अर्थः–ते महाभाग्यशाली पुरुषना जन्मे तुरत दुष्ट ग्रहोने जीतीने खरेखर अहींना बार वर्षोना दुष्काळने तोडी पाड्यो छे. ४५

**इति श्रुत्वाद्भुतप्रीतिर्नत्वा केवलिनं नृपः । तत्राशु गत्वा तं बालं भाले न्यस्येदमूचिवान् ॥ ४६ ॥**

अन्वयः—इति श्रुत्वा अद्भुत प्रीतिः नृपः केवलिनं नत्वा, आशु तत्र गत्वा तं बालं भाले न्यस्य इदं ऊचिवान्. ॥ ४६ ॥

अर्थः—एम सांभळीने अद्भुत प्रेमवाळो ते राजा केवली भगवानने नमीने, तथा तुरत त्यां जइने, ते बाळकने ( पोताना ) ललाटपर स्थापन करीने एम कहेवा लाग्यो के, ॥ ४६ ॥

**दुर्भिक्षमज्जज्जगदुद्धारधोर नमोऽस्तु ते । राजा त्वमेव मे राज्ये तलारक्षोऽस्मि तावकः ॥ ४७ ॥**

अन्वयः—(हे) दुर्भिक्ष मज्जत् जगत् उद्धार धीर ! ते नमः अस्तु ? त्वं एव मे राज्ये राजा, तावकः तलारक्षः अस्मि. ॥४७॥

अर्थः—दुष्काळमां डुबता जगतनो उद्धार करवामां धैर्यवान एवा (हे) बाळक ! तने नमस्कार थाओ ? तुंज मारां राज्यनो राजा छो, हुं तो तारो कोटवाळ छुं. ॥ ४७ ॥

**मूर्तिमानेव धर्मोऽयमित्थं दुर्भिक्षभङ्गकृत् । इति तस्याभिधा धर्म इति धात्रीभृता कृता ॥ ४८ ॥**

अन्वयः—इत्थं दुर्भिक्ष भंग कृत् अयं मूर्तिमान् धर्मः एव, इति धात्रीभृता तस्य धर्मः इति अभिधा कृता. ॥ ४८ ॥

अर्थः—आरीते दुष्काळनो विनाश करनार आ देहधारी धर्मज छे, एम विचारी ते राजाए तेनुं धर्म एवुं नाम पाड्युं. ॥ ४८ ॥

**चरैर्मत्वेदमन्येऽपि भूभुजः स्वस्वभूमिषु । धर्माज्ञां वर्तयित्वाशु वर्षयामासुरम्बुदान् ॥ ४९ ॥**

अन्वयः–चरैः इदं मत्वा अन्ये अपि भूभुजः स्व स्व भूमिषु आशु धर्म आज्ञां वर्तयित्वा अंबुदान् वर्षयामासुः. ॥ ४९ ॥

अर्थः—बातमीदारोमारफते आ हकीकत जाणीने बीजा राजाओए पण पोतपोतानी भूमिमां ते धर्मनी आज्ञा वर्तावीने वरसादने वरसाव्यो. ॥ ४९ ॥

**वयःकालोचितैश्चित्रैः प्राभृतैः सर्वभूभुजाम् । अश्रान्तानन्दसंदर्भः सोऽर्भकः समवर्धत ॥ ५० ॥**

अन्वयः–सर्व भूभुजां वयः काल उचितैः चित्रैः प्राभृतैः अश्रांत आनंद संदर्भः सः अर्भकः समवर्धत. ॥ ५० ॥

अर्थः–सघळा राजाओतरफथी आवेली, तथा वय अने समयने लायक नाना प्रकारनी भेटोवडे अति आनंदना उल्लासवाळो ते बाळक वृद्धि पामवा लाग्यो. ॥ ५० ॥

**समस्तभूभृतां पुत्र्यः सकलः कमलेक्षणाः । पतिंवरास्तमाजग्मुः समुद्रमिव निम्नगाः ॥ ५१ ॥**

अन्वयः–समुद्रं निम्नगाः इव, समस्त भूभृतां सकलाः कमल ईक्षणाः पुत्र्यः तं पतिंवराः आजग्मुः. ॥ ५१ ॥

अर्थः–समुद्रपासे जेम नदीओ जाय, तेम सर्व राजाओनी कलावंत, तथा कमलसरखां चक्षुओवाळी पुत्रीओ ते धर्मकुमारने (परणवामाटे) स्वयंवरतरीके आववा लागी. ॥ ५१ ॥

**धर्मः समग्रभूगोललोलाज्ञो गुरुभक्तिभाक् । धर्मी कर्माण्यसंचिन्वन्स भोगान्बुभुजेऽद्भुतान् ॥ ५२ ॥**

अन्वयः–समग्र भू गोल लोल आज्ञः, गुरु भक्तिभाक् सः धर्मी धर्मः कर्माणि असंचिन्वन् अद्भुतान भोगान् बुभुजे. ॥ ५२ ॥

अर्थः—समस्त पृथ्वीपीठपर वर्तोती छे आज्ञा जेनी, तथा गुरुमहाराजनी भक्ति करनारो ते धर्मी धर्मकुमार कर्मोनो संचय कर्या-विना अद्भुत भोगो भोगववा लाग्यो. ॥ ५२ ॥

**भुक्तभोगस्त्वसौ योगबलमुज्ज्वलमाश्रितः । उत्पन्नकेवलज्ञानमहिमा मुक्तिमाप्तवान् ॥ ५३ ॥**

अन्वयः–तु भुक्त भोगः, उज्ज्वलं योगबलं आश्रितः, उत्पन्न केवल ज्ञान महिमा असौ मुक्तिं आप्तवान्. ॥ ५३ ॥

अर्थः–पछी भोगो भोगव्याबाद ते योगबलने प्राप्त थयो, अने तेथी केवलज्ञान उत्पन्न थवाथी महिमाळो थयोथको ते मोक्ष पाम्यो.

**इति धन्यस्य धर्मस्य भवद्वयनिदर्शनात् । जितसंपत्तिसंपातैः सेव्यतां सप्तमं व्रतम् ॥ ५४ ॥**

अन्वयः–इति धन्यस्य धर्मस्य भव द्वय निदर्शनात् जित संपत्ति संपातैः सप्तमं व्रतं सेव्यतां ? ॥ ५४ ॥

अर्थः—एरीते आ भाग्यशाली धर्मश्रावकना बन्ने भवोना दाखलाथी, समृद्धिनी आवक्रने जीतनारा मनुष्योए सातमुं व्रत सेववुं.

**रौद्रार्तधी–शस्त्रदान–पापशिक्षा–प्रमादिताः । अनर्थदण्डस्तत्त्यागः स्यात्तृतीयं गुणव्रतम् ॥ ५५ ॥**

अन्वयः—रौद्र आर्त धी शस्त्र दान पाप शिक्षा प्रमादिताः, अनर्थ दंडः, तत् त्यागः तृतीयं गुण व्रतं स्यात्. ॥ ५५ ॥

अर्थः–रौद्रध्यान, आर्तध्यान, शस्त्रो आपवां, अने पापकार्योनो उपदेश, तथा प्रमादपणुं, ए अनर्थ दंड छे, तेओनो जे त्याग करवो, ते त्रीजुं गुणव्रत कहेवाय. ॥ ५५ ॥

**अनर्थदण्डवीरामव्रतधीरा महोदयम् । लभन्ते शुभसंभारभासुराः सुरसेनवत् ॥ ५६ ॥**

अन्वयः—अनर्थ दंड वीराम व्रत धीराः, शुभ संभार भासुराः सुरसेनवत् महोदयं लभंते. ॥ ५६ ॥

अर्थः—अनर्थदंडविरमण नामना व्रतनुं (पालन करवामां) धैर्यवाळा, तथा पुण्यना समूहथी देदीप्यमान थयेला मनुष्यो सुरसेननीपेठे म्होटो उदय पामे छे. ॥ ५६ ॥

**तथाहि देवपूजोद्यद्गन्धान्धैर्मधुपैर्मुहुः । गीतप्रशस्तिरस्ति श्रीबन्धुरा बन्धुरा पुरी ॥ ५७ ॥**

अन्वयः–तथाहि–देव पूजा उद्यत् गंध अंधैः मधुपैः मुहुः गीत प्रशस्तिः, श्री बंधुरा बंधुरा पुरी अस्ति. ॥ ५७ ॥

अर्थः–ते सूरसेनमहासेननुं उदाहरण कहे छे–जिनपूजामां बेहेकी रहेली सुगंधिमां आसक्त थयेला भमराओए वारंवार गायेली छे प्रशंसा जेनी, तथा लक्ष्मीथी मनोहर थयेली बंधुरानामनी नगरी छे. ॥ ५७ ॥

**श्रीवीरसेन इत्युग्रवीरसेनाशिरोमणिः । वृत्तैः पवित्रैरश्यामस्तस्यामजनि भूधवः ॥ ५८ ॥**

अन्वयः—तस्यां उग्र वीर सेना शिरः मणिः, पवित्रैः वृत्तैः अश्यामः श्री वीरसेनः इति भूधवः अजनि. ॥ ५८ ॥

अर्थः—ते नगरीमां प्रचंड सुभटोना सैन्यनो मालिक, तथा निर्मल आचरणोथी उज्ज्वल श्रीवीरसेननामनो राजा हतो. ॥ ५८॥

**अन्तरारिप्रहारेषु धर्मकाण्डाद्भुतौ सुतौ । सुरसेनमहासेनौ तस्याभूतामुभौ शुभौ ॥ ५९ ॥**

अन्वयः—तस्य अंतर अरि प्रहारेषु धर्म कांड अद्भुतौ, सुरसेन महासेनौ उभौ शुभौ सुतौ अभूतां. ॥ ५९ ॥

अर्थः—ते राजाने (कषायोरूपी) अंतरंग शत्रुओने मारवामां धर्मरूपी बाणोवडे आश्चर्य करावनारा, सुरसेन अने महासेननामना

बे उत्तम पुत्रो हता. ॥ ५९ ॥

उपमानोपमेयत्वमभिधानाभिधेयता । रूपे च साहचर्ये च व्यचार्यत तयोर्जनैः ॥ ६० ॥

अन्वयः–तयोः रूपे च साहचर्ये च उपमान उपमेयत्वं, अभिधान अभिधेयता जनैः व्यचार्यत. ॥ ६० ॥

अर्थः–तेओना रूपमाटे तथा सहचारीपणामाटे (परस्पर) उपमा तथा उपमेयपणाने, अने अभिधान तथा अभिधेयपणाने लोको मनमां धारण करता हता. ॥ ६० ॥

दृशौ सदवलोकेषु बाहू मोहादिमर्दने । चरणौ सच्चरित्रेषु तौ धर्मस्य व्यराजताम् ॥ ६१ ॥

अन्वयः–सदवलोकेषु धर्मस्य दृशौ, मोह आदि मर्दने बाहू, सत् चरित्रेषु चरणौ तौ व्यराजतां. ॥ ६१ ॥

अर्थः—उत्तम कार्योने अथवा सज्जनोने जोवामां धर्मनी बन्ने आंखोसरखा, मोहआदिकनो नाश करवामां बे हाथसरखा, तथा उत्तम आचरणोमां बे पगोसरखा, ते बन्ने कुमारो शोभता हता. ॥ ६१ ॥

अजायत रसज्ञायामन्येद्युः श्वयथुः पृथुः । अकस्माद्विस्मयकरो महासेनस्य दुःसहः ॥ ६२ ॥

अन्वयः–अन्येद्युः महासेनस्य रसज्ञायां पृथुः, विस्मयकरः, दुःसहः श्वयथुः अकस्मात् अजायत. ॥ ६२ ॥

अर्थः—एकदिवसे ते महासेनकुमारनी जिह्वामां, विस्तीर्ण, आश्चर्यकारक तथा न सहन थइ शके एवो सोजो अकस्मात् उत्पन्न थयो. ॥ ६२ ॥

उपशान्त्यै व्यधुर्वैद्या यद्यदोषधमुच्चकैः । ववृधे तेन तेनापि जिह्वाशोफः स लोभवत् ॥ ६३ ॥

अन्वयः—उपशांत्यै वैद्याः यत् यत् औषधं उच्चकैः व्यधुः, तेन तेन अपि सः जिह्वा शोफः लोभवत् ववृधे. ॥ ६३ ॥

अर्थ.—तेनी शांतिमाटे वैद्योए जे जे औषध अति उद्यमथी कर्यां, ते ते औषधथी पण जिह्वानो ते सोजो लोभनीपेठे वृद्धि पामवा लाग्यो. ॥ ६३ ॥

औषधं धर्म एवास्य युक्तमित्युक्तयस्ततः । तं वैद्या मुमुचुर्निःस्वं भुजंगं गणिका इव ॥ ६४ ॥

अन्वयः—अस्य औषधं धर्मः एव युक्तं, इति उक्तयः वैद्याः, गणिकाः निःस्वं भुजंगं इव, तं मुमुचुः. ॥ ६४ ॥

अर्थः—आनेमाटे हवे धर्मरूपी औषधज योग्य छे, एम कहीने वैद्योए, वेश्याओ जेम निर्धन आशकने तजी दे, तेम तेने तजी दीधो. (अर्थात् वैद्यो निराश थइ चाल्या गया.) ॥ ६४ ॥

क्रमेण कुथिता तस्य रसज्ञा राजजन्मनः । मक्षिकाणामनिर्वारसत्रागारत्वमाययौ ॥ ६५ ॥

अन्वयः—क्रमेण तस्य राज जन्मनः कुथिता रसज्ञा, मक्षिकाणां अनिर्वार सत्र आगारत्वं आययौ. ॥ ६५ ॥

अर्थः—अनुक्रमे ते राजपुत्रनी सडी गयेली जिह्वा, मक्षिकाओ माटे अटकावरहित दानशालापणाने प्राप्त थइ. (अर्थात् घणी मक्षिकाओ तेने हेरान करवा लागी.) ॥ ६५ ॥

उग्रदुर्गन्धभूः कान्तापितृमातृभिरप्यसौ । चण्डालपाटक इवाध्वगैर्दूरादमुच्यत ॥ ६६ ॥

अन्वयः-अध्वगैः चंडाल पाटकः इव, उग्र दुर्गंध भूः असौ, कांता पितृ मातृभिः अपि दूरात् अमुच्यत. ॥ ६६ ॥

अर्थः—वटेमार्गुओ जेम कसाइवाडाने दूर छोडी दीये तेम भयंकर दुर्गंधना स्थानरूप एवा ते राजकुमारने (तेनी) स्त्रीए तथा मातापिताए पण दूर तजी दीधो. ॥ ६६ ॥

तं तथाभूतमुद्वाव्य भ्रातृस्नेहवशंवदः । दुर्गन्धं दुःसहं जित्वा सुरसेनः समोपगः ॥ ६७ ॥

रोगोऽसौ यावदस्यास्ति न किंचित्तावदाहरे । म्रियते यद्यनेनैष म्रियेऽनशनतस्ततः ॥ ६८ ॥

इति न्यविशत भ्रातुरग्रे स दृढनिश्चयः । वीजयन्वसनान्तेन मक्षिका मुखपातिनीः ॥६९॥ त्रिभिर्विशेषकम् ॥

अन्वयः-तथाभूतं तं उद्वाव्य भ्रातृ स्नेह वशंवदः सुरसेनः दुःसहं दुर्गंधं जित्वा समीपगः, ॥ ६७ ॥ यावत् अस्य असौ रोगः अस्ति, तावत् किंचित् न आहरे, यदि अनेन एषः म्रियते ततः अनशनतः म्रिये, ॥ ६८ ॥ इति दृढ निश्चयः सः मुख पातिनीः मक्षिकाः वसन अंतेन वीजयन् भ्रातुः अग्रे न्यविशत. ॥ ६९ ॥ त्रिभिर्विशेषकम् ॥

अर्थः-ए रीतनी दुर्गंधथी तेने एकाकी पडेलो जाणीने भाइना स्नेहने वश थयेलो ते सुरसेन ते दु.सह दुर्गंधनी दरकार कर्या विना तेनी पासेज बेसवा लाग्यो, ॥ ६७ ॥ तथा ज्यांसुधी आनो आ रोग छे, त्यां सुधी मारे कंइ पण खावुं नथी, अने कदाच आ रोगथी ते मरी जाय, तो मारे पण अनशन करीने मरी जवुं, ॥ ६८ ॥ एवो दृढ निश्चय करीने ते मुखमां पडती माखीओने

वस्त्रना छेडाथी उडाडतोथको भाइनी पासेज बेसी रहेवा लाग्यो. ॥ ६९ ॥ त्रिभिर्विशेषकं ॥

**नमस्काराख्यमन्त्रेणाभिमन्त्र्य प्रासुकं पयः । तं मुहुः स्मारयंश्चास्य सिषेच रसनामसौ ॥ ७० ॥**

अन्वयः-असौ नमस्कार आख्य मंत्रेण प्रासुकं पयः अभिमंत्र्य, मुहुः तं स्मारयन् अस्य रसनां सिषेच. ॥ ७० ॥

अर्थः—वळी ते सुरसेनकुमार नवकारनामना मंत्रथी प्रासुक जल मंत्रीने, तथा वारंवार ते नवकारमंत्रनु स्मरण करावतोथको तेनी जीह्वाने (ते जलवडे) सींचवा लाग्यो. ॥ ७० ॥

**सेके सेके व्यथाशान्तिर्विशेषं समजायत । क्रमात्तस्य क्षुधार्तस्य कवले कवले यथा ॥ ७१ ॥**

अन्वयः-क्षुधा आर्तस्य यथा कवले कवले, (तथा) सेके सेके क्रमात् तस्य विशेषं व्यथा शांतिः समजायत. ॥ ७१ ॥

अर्थः—क्षुधाथी पीडित थयेला मनुष्यने जेम कोळीए कोळीए शांति थाय छे, तेम (ते जलना) सिंचनथी अनुक्रमे तेने विशेष प्रकारे व्याधिनी शांति थवा लागी. ॥ ७१ ॥

**निर्व्यथं निर्व्रणं नीरुग्निर्गन्धं च सुगन्धि च । मुहूर्तात्तन्मुखं जज्ञे क्व न धर्मः प्रभावभाक् ॥ ७२ ॥**

अन्वयः-मुहूर्तात् तत् मुखं निर्व्यथं, निर्व्रणं, नीरुक्, च निर्गंध, च सुगंधि जज्ञे, धर्मः क्व प्रभाव भाक् न? ॥ ७२ ॥

अर्थः-(एरीते) एक मुहूर्तजेटला समयमांज तेनुं मुख व्याधिरहित, चांदांरहित, निरोगी, दुर्गंधविनानुं, अने सुगंधि थयुं, केमके धर्म क्यां प्रभावशाली नथी होतो? ॥ ७२ ॥

**धर्मेणास्तः स रोगः श्राग्मुक्तो वैद्यगणेन यः । भानुच्छेद्यं तमश्छेत्तुं खद्योताः क किल क्षमाः ॥ ७३ ॥**

अन्वयः-यः वैद्य गणेन मुक्तः, सः रोगः श्राग् धर्मेण अस्तः, भानु च्छेद्यं तमः छेत्तुं किल खद्योताः क्व क्षमाः ? ॥ ७३ ॥

अर्थः-जे रोगने वैद्योना समूहे तजी दीधो, ते रोगने तुरत धर्मे नष्ट कर्यो, केमके सूर्यथी नष्ट थनारां अंधकारने छेदवाने खरेखर पतंगीयांओ क्यांथी समर्थ थइ शके? ॥ ७३ ।'

**राहुमुक्तं रविमिव प्राप्तपूर्वच्छविच्छटम् । तं रोगमुक्तं वीक्ष्याभूल्लोकः सर्वोऽपि सोत्सवः ॥ ७४ ॥**

अन्वयः—राहु मुक्तं रविं इव, रोग मुक्तं तं प्राप्त पूर्वच्छवि च्छटं वीक्ष्य सर्वः अपि लोकः सोत्सवः अभूत्. ॥ ७४ ॥

अर्थः-राहुथी मुक्त थयेला सूर्यनीपेठे, रोग रहीत थयेला ते राजकुमारने पूर्वनी पेठे शरीरनी (मनोहर) कांतिवाळो जोइने सर्व कोइ मनुष्यो आनंदित थया. ॥ ७४ ॥

**विशेषतस्ततस्तारे धर्मभारे सहोदरौ । तौ बभूवतुरुद्भासौ शरदीवेन्दुभास्करौ ॥ ७५ ॥**

अन्वयः—ततः तौ, सहोदरौ, शरदि इंदु भास्करौ इव तारे धर्मभारे विषेषतः उद्भासौ बभूवतुः. ॥ ७५ ॥

अर्थः-पछी ते बन्ने भाइओ शरदऋतुमां चंद्र अने सूर्यनीपेठे मनोहर जैनधर्म धारण करवामां विशेष प्रकारे तेजस्वी थया. ॥

**श्रीभद्रबाहुराचार्योऽवधिज्ञानमधिष्ठितः । कदापि तत्पुरोद्यानं द्यामिवेन्दुरभूषयत् ॥ ७६ ॥**

अन्वयः—कदापि अवधि ज्ञानं अधिष्ठितः श्रीभद्रबाहुः आचार्यः, इन्दुः द्यां इव तत् पुर उद्यानं अभूषयत्. ॥ ७६ ॥

अर्थः—(एवामां) एक दिवसे अवधिज्ञानवाळा श्रीभद्रबाहुनामना आचार्य, चंद्र जेम आकाशने, तेम नगरीना उद्यानने विभूषित करवा लाग्या. ॥ ७६ ॥

**प्रदक्षिणात्रयेणोपश्रेमतुर्नेमतुश्च तम् । उपविश्य ततो धर्मदेशनां पपतुश्च तौ ॥ ७७ ॥**

अन्वयः—ततः तौ तं प्रदक्षिणा त्रयेण उपश्रेमतुः, च नेमतुः, च उपविश्य धर्मदेशनां पपतुः. ॥ ७७ ॥

अर्थः—पछी ते बन्ने भाइओए आचार्यमहाराजने त्रण प्रदक्षिणा करी, वांद्या, तथा (त्यां) बेसीने (तेमनी) धर्मदेशनानुं पान कर्युं. (अर्थात् तेमनो धर्मोपदेश सांभळ्यो.) ॥ ७७ ॥

**सुरसे सुरसेनेन निपीते देशनामृते । अपृच्छ्यत गुरुर्भ्रातृरसनारोगकारणम् ॥ ७८ ॥**

अन्वयः–सुरसेनेन सुरसे देशना अमृते निपीते, गुरुः भ्रातृ रसना रोग कारणं अपृच्छयत. ॥ ७८ ॥

अर्थः–(पछी) ते सुरसेने उत्तमरसवाळुं देशनारूपी अमृत पीधाबाद गुरुमहाराजने (पोताना) भाइनी जिह्वाना रोगनुं कारण पूछयुं. ॥ ७८ ॥

**स च प्रवचनक्षीरार्णववीचीनिभं वचः । उपाददे भवदवोद्भवक्लेशहरं गुरुः ॥ ७९ ॥**

अन्वयः–च सः गुरुः प्रवचन क्षीर अर्णव वीची निभं, भव दव उद्भव क्लेश हरं वचः उपाददे. ॥ ७९ ॥

अर्थः–त्यारे ते गुरुमहाराज आगमोरूपी क्षीरसमुद्रना मोजां सरखुं, तथा संसाररूपी दावानळथी उत्पन्न थयेलां कष्टने हरनारुं वचन बोल्या के, ॥ ७९ ॥

**भूभूषाभूतमाहूतपुरुहूतपुरप्रभम् । पुरं मणिपुरं नाम विद्यते विश्वविश्रुतम् ॥ ८० ॥**

अन्वयः–भू भूषा भूतं, आहूत पुरुहूत पुर प्रभं, विश्व विश्रुतं मणिपुरं नाम पुरं विद्यते. ॥ ८० ॥

अर्थः—पृथ्वीना अलंकारसरखुं, तथा इंद्रनी नगरीनी कांतिने धारण करनारुं, अने जगतमां मख्यात मणिपुर नामनुं नगर छे.

**तस्मिन्कश्मलितारातिवदनो मदनो भटः । बभूव भगवद्धर्मसुधाम्बुधिसुधाकरः ॥ ८१ ॥**

अन्वयः–तस्मिन् कश्मलित अराति वदनः, भगवत् धर्म सुधा अंबुधि सुधाकरः मदनः भटः बभूव. ॥ ८१ ॥

अर्थः—ते नगरमां झांखां करेल छे शत्रुओना मुखो जेणे, तथा जिनेश्वरप्रभुना धर्मरूपी अमृतना महासागरने (वृद्धिपमाडवामां) चंद्रसरखो मदननामनो सुभट (रहेतो) हतो. ॥ ५१ ॥

**तुल्याकृती तुल्यशक्तो तुल्यार्थौ तुल्यतेजसौ । धीरवीराभिधौ तस्य सुतौ जातौ भुजाविव ॥ ८२ ॥**

अन्वयः—तस्य भुजौ इव, तुल्य आकृती, तुल्य शक्ती, तुल्य अर्थौ, तुल्य तेजसौ, धीर वीर अभिधौ सुतौ जातौ. ॥ ८२ ॥

अर्थः–तेना बन्ने हाथनीपेठे, सरखा आकारवाळा, सरखां बळवाळा, सरखी समृद्धिवाळा, अने सरखां तेजवाळा धीर अने वीर-नामना बे पुत्रो थया. ॥ ८२ ॥

**जिनप्रवचनस्वादानन्दामन्दसुधारसौ । तौ भवाहिभुवा ग्रस्तौ न मोहविषमूर्छया ॥ ८३ ॥**

अन्वयः—जिन प्रवचन स्वाद आनंद अमंद सुधा रसौ तौ, भव अहि भुवा मोह विषमूर्छया न ग्रस्तौ. ॥ ८३ ॥

अर्थः-जैन आगमोना स्वादना आनंदरूपी अति अमृतरसमां मग्न थयेला एवा तेओ संसाररूपी सर्पथी उत्पन्न थयेली मोहरूपी विषनी मूर्छाथी ग्रस्त थया नही. ॥ ८३ ॥

**कदाप्येतौ गतावात्मोद्याने दद्दशतुर्मुनिम् । स्वमातुलं वसन्ताख्यं पुंवृतं पतितं भुवि ॥ ८४ ॥**

अन्वयः-कदापि आत्म उद्याने गतौ एतौ वसंत आख्यं स्व मातुलं मुनिं पुं वृतं भुवि पतितं दद्दशतुः ॥ ८४ ॥

अर्थः-एक वखते पोताना बगीचामां गयेला एवा तेओ बन्नेए वसंत नामना पोताना मामा मुनिराजने पुरुषोथी वींटायेला तथा पृथ्वीपर पडेला जोया. ॥ ८४ ॥

**किमभूत्किमभूदेतदिति व्याकुलचेतसि । धीरेऽथ पृच्छति पुमानेकस्तत्राश्रुमुग्जगौ ॥ ८५ ॥**

अन्वयः—अथ किं अभूत्? किं अभूत्? इति व्याकुल चेतसि धीरे पृच्छति, तत्र एकः पुमान् अश्रुमुग् जगौ. ॥ ८५ ॥

अर्थः-पछी (अरे!) आ शुं थयुं? शुं थयुं? एम व्याकुल हृदयथी धीरे पूछवाथी, त्यां एक माणसे आंखोमां आंसुओ लावी कह्युं के, ॥ ८५ ॥

**प्रतिमास्थमिमं साधुं दष्ट्वैको दुष्टपन्नगः । दुर्गे नृपापराधीव प्रविष्टोऽस्मिन्महाबिले ॥ ८६ ॥**

अन्वयः—प्रतिमास्थं इमं साधुं दष्ट्वा एकः दुष्ट पन्नगः, नृप अपराधी दुर्गे इव अस्मिन् महाबिले प्रविष्टः. ॥ ८६ ॥

अर्थः—काउसगमां उभेला आ साधुने दंश मारीने एक दुष्ट सर्प, राजानो गुन्हेगार जेम किल्लामां भराइ बेसे, तेम आ म्होटां बिलमां भराइ बेठो छे. ॥ ८६ ॥

**अथ मातुलमोहेन क्रुधा धीरानुजोऽभ्यधात् । रे रङ्काः किमसौ नश्यन्नहिः पापी हतो न हि ॥ ८७ ॥**

अन्वयः—अथ मातुल मोहेन धीर अनुजः क्रुधा अभ्यधात्, रे रंकाः ! असौ नश्यन् पापी अहिः हि किं न हतः ? ॥ ८७ ॥

अर्थः—(त्यारे) मामाना मोहथी ते धीरना न्हाना भाइ वीरे क्रोधथी कह्युं के, अरे नामर्दो ! ते नाशी जता पापी सर्पने खरेखर (तमोए) केम मारी न नाख्यो ? ॥ ८७ ॥

**धीरस्तमभ्यधात्सर्पे गते जीवति कर्मतः । हहा महात्मन्किं पापं मुधा बध्नासि जिह्वया ॥ ८८ ॥**

अन्वयः—धीरः तं अभ्यधात्, हहा ! महात्मन् ! कर्मतः सर्पे जीवति गते, मुधा जिह्वया पापं किं बध्नासि ? ॥ ८८ ॥

अर्थः—त्यारे धीरे तेने कह्युं के, अरे ! भलामाणस ! कर्मयोगे ते सर्प जीवतो चाल्यो गयो छे, हवे फोकट जीभथी शामाटे (तुं) पाप बांधे छे ? ॥ ८८ ॥

**क्रुधाभ्यधीत वीरोऽपि दुष्टे दष्टमहामुनौ । तस्मिन् हतेऽपि धर्मः स्याद्धतिवाचा क पातकम् ॥ ८९ ॥**

अन्वयः-वीरः अपि क्रुधा अभ्यधीत, दष्ट महामुनौ तस्मिन् दुष्टे हते अपि धर्मः स्यात्, इति वाचा पातकं क्व ? ॥ ८९ ॥

अर्थः—(त्यारे) ते वीरे पण क्रोधथी कह्युं के, जेणे (आवा) महामुनिराजने दंश मार्यो छे, एवा ते दुष्ट सर्पने मारवाथी तो धर्म थाय, (तेने) मारवानी फक्त वात करवाथीज वळी पाप क्यां वळगी जवानुं हतुं ? ॥ ८९ ॥

**क्षत्रधर्मो ह्ययं साधुपालने दुष्टनिग्रहे । इत्यसत्यं यदि ततो मज्जिह्वामेतु पातकम् ॥ ९० ॥**

अन्वयः—अत्र हि साधु पालने, दुष्ट निग्रहे क्षत्र धर्मः, इति यदि असत्यं, ततः मत् जिह्वां पातकं एतु. ॥ ९० ॥

अर्थः-आ जगतमां खरेखर साधुओनुं पालन करवुं, अने दुष्टोनो नाश करवो, ए क्षत्रिओनो धर्म छे, जो ते वात असत्य होय, तो भले मारी जिह्वाने पाप वळगी जाय. ॥ ९० ॥

**धीरस्त्ववचिन्तयन्वाचं तस्यापारकृपारसः । यतीन्द्रं जीवयामास मणिमन्त्रौषधीबलात् ॥ ९१ ॥**

अन्वयः—धीरः तु तस्य वाचं अचिंतयन् अपार कृपा रसः मणि मन्त्र ओषधी बलात् यति इन्द्रं जीवयामास. ॥ ९१ ॥

अर्थः—धीरे तो तेना वचननी दरकार कर्या विना अत्यंत कृपारसमां मग्न थइने, मणि, मन्त्र तथा औषधीओनां बळथी ते मुनिराजने जीवाड्या. ॥ ९१ ॥

**यतीन्द्रजीवनात्प्रीतिं महानन्दस्य वर्णिकाम् । धारयन्तौ भटस्यैतौ सुतौ सर्वजनस्तुतौ ॥ ९२ ॥**

**पालयन्तौ शुभं धर्मं ज्वालयन्तौ च पातकम् । क्षालयन्तौ च कीर्त्या स्वं सुचिरं तौ ननन्दतुः ९३ युग्मं**

अन्वयः–यतींद्र जीवनात् महानंदस्य वर्णिकां प्रीतिं धारयंतौ, सर्व जन स्तुतौ, भटस्य एतौ सुतौ ॥ ९२ ॥ शुभं धर्मं पालयंतौ, च पातकं ज्वालयंतौ, च कीर्त्या स्वं क्षालयंतौ. तौ सुचिरं ननंदतुः. ॥ ९३ ॥ युग्मं ॥

अर्थः–ते मुनिराजने जीवाडवाथी महान् आनंदना नमुनारूप प्रीतिने धारण करता, तथा सर्व लोकोथी प्रशंसा पामेला, सुभटना ते बन्ने पुत्रो, ॥ ९२ ॥ मनोहर धर्म पालताथका, तथा पापोने बालता थका, अने कीर्तिवडे पोताना आत्माने निर्मल करताथका तेओ घणा काळ सुधी समृद्धि पाम्या. ॥ ९३ ॥

**धीरः क्रमेण पूर्णायुः सुरसेन भवानभूत् । अनालोचितताद्दग्वाग्वीरस्त्वेष तवानुजः ॥ ९४ ॥**

अन्वयः–(हे) सुरसेन! क्रमेण पूर्णायुः धीरः भवान् अभूत्, अनालोचित ताद्दग् वाग् वीरः तु एषः तव अनुजः ॥ ९४ ॥

अर्थः–हे सुरसेन! अनुक्रमे आयु संपूर्ण थयाबाद धीरनो जीव तुं थयो, अने तेवां वचननी आलोचना नही करीने वीरनो जीव आ तारो न्हानो भाइ थयो छे. ॥ ९४ ॥

**असाध्यः सर्ववैद्यानामनवद्यौषधीविदाम् । सर्पप्रहतिवाक्पापाज्जिह्वारोगोऽस्य जातवान् ॥ ९५ ॥**

अन्वयः–अनवद्य ओषधी विदां सर्व वैद्यानां असाध्यः अस्य जिह्वा रोगः सर्प प्रहतिवाक् पापात् जातवान्. ॥ ९५ ॥

अर्थः–(वळी) निर्मल औषधीओने जाणनारा एवा सर्व वैद्यो पण जेनो उपाय न करी शक्या, एवो आ महासेनने जीभनो रोग सर्पने मारवाना वचनना पापथी थयो हतो. ॥ ९५ ॥

यतिसंजीवनादेव लब्धरुग्भङ्गलब्धिना । निरासि रसनारोगो महासेनस्य स त्वया ॥ ९६ ॥

अन्वयः—यति संजीवनात् एव लब्ध रुग् भंग लब्धिना त्वया महासेनस्य सः रसना रोगः निरासि. ॥ ९६ ॥

अर्थः—मुनिने जीवाडवाथीज प्राप्त थयेल छे रोगो मटाडवानी लब्धि जेने, एवा तें महासेननो ते जीभसंबंधी रोग दूर कर्यो. ९६

इति ज्ञात्वा स्ववृत्तान्तं जातजातिस्मृती तदा । सुरसेनमहासेनौ भवार्तौ भेजतुर्व्रतम् ॥ ९७ ॥

अन्वयः—इति स्व वृत्तांतं ज्ञात्वा जात जाति स्मृती सुरसेन महासेनौ तदा भव आर्तौ व्रतं भेजतुः. ॥ ९७ ॥

अर्थः—एवीरीतनुं पोतानुं वृत्तांत जाणीने थयेल छे जातिस्मरण ज्ञान जेओने, एवा ते सुरसेन अने महासेने तेज वखते संसारथी वैराग्य पमीने दीक्षा लीधी. ॥ ९७ ॥

व्रतं व्रततिवत्सिक्त्वा तौ चारुचरितामृतैः ॥ धर्मप्रसूनजं मुक्तिफलं कालादवापतुः ॥ ९८ ॥

अन्वयः—तौ व्रततिवत् व्रतं चारु चरित अमृतैः सिक्त्वा कालात् धर्म प्रसूनजं मुक्ति फलं अवापतुः. ॥ ९८ ॥

अर्थः—पछी तेओ बन्ने वेलडीनीपेठे ते चारित्रने मनोहर आचरणोरूपी अमृतवडे सींचीने, समय आव्ये धर्मरूपी पुष्पमांथी उत्पन्न थयेलां मुक्तिरूपी फलने प्राप्त थया. ॥ ९८ ॥

सुरसेनमहासेनदृष्टान्तेनामुना जनाः । अनर्थदण्डं दुःखौघहेतुं त्यजत दूरतः ॥ ९९ ॥

अन्वयः—(हे) जनाः! अमुना सुरसेन महासेन दृष्टांतेन, दुःख ओघ हेतु अनर्थदंडं दूरतः त्यजत? ॥ ९९ ॥

अर्थः—हे लोको! आ सुरसेन तथा महासेनना दृष्टांतथी दुःखोना समूहना कारणरूप अनर्थदंडने दूरथीज तजी आपो? ॥९९॥

॥ ए रीते अनर्थदंडव्रतना संबंधमां सुरसेन महासेननी कथा कही. ॥

॥ इति श्रीवर्धमानसूरिविरचिते वासुपूज्यचरित्रे सप्तमो भागः समाप्तः ॥ श्रीरस्तु ॥ आ ग्रंथना अन्वय तथा गुजराती भाषांतर जामनगर निवासी पंडित श्रावक हीरालाल हंसराजे करीने स्वपरना श्रेय माटे ते पोताना श्री जैनभास्करोदय प्रेसमां छापी प्रसिद्ध करेल छे.

॥ समाप्तोऽयं सप्तमो भागः गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

॥ इति श्रीवासुपूज्यचरित्रे सप्तमो भागः समाप्तः ॥